प्रमाणानां सामान्ये पक्षपात इत्यर्थस्याविज्ञापनात् अन्यथास्तत्रोपस्थितङिःसम्बुद्धिमात्रविषयकतात्पर्यादिति राजव
दृषाविद्धिः स्वष्टावर्यंरीतिः सार्द्धधातुकमविदित्यत्र भाष्ये प्रकृतसूत्रे भाष्ये चेदं स्पष्टम् अजन्तप्रतिपादिति तयोः प्रा
तिपादिकत्वे तत्सामर्थ्यादौत्सर्गिकैकवचनेन तत्स्वरूपापत्तिः विभक्त्यर्थस्यालिङ्गसंख्यातिरिक्तरूपाभावात्वेन न नपुंसक
त्वाश्रयो विभक्तिलुक् तत्र स्वतुपदादित्वे नणत्वनिषेधापत्तिर्दोषइति भावः तत्रैवेति अत्राप्यौत्सर्गिकैकवचनाप
त्तिः सुपो धात्विति लुगापत्तिश्च पचेरन्नित्यादौ नलोपापत्तिश्चेति भावः स्यादेवेति पूर्वस्मिन्विभक्त्युत्पत्तये ज्ञातस्या
तिदेशेन विभक्त्यन्ते वृद्धिरिति भावः पयोदेशेऽपीति अविनाकार्यकालपक्षेऽपि न हि तत्र पदे उपदेशेनैककवाक्यता नातिदे
शेनेत्य आनमस्तीत्यतिदेशैकवाक्यतैव हृस्वप्राप्तेः सकृञ्चत्वात् प्रातिपदिकग्रहणस्येति नपुंसकवृत्तित्वस्य प्रातिपदिकधर्म
त्वान्नपुंसके वर्त्तमानस्येत्यर्थे नैव प्रातिपादिकलाभे सिद्धे तस्य व्यर्थत्वादिति भावः उक्तेऽर्थे विभक्त्येकादशस्यान्तवर्
त्वाभावे सामान्यापेक्षमिति अन्यथा हृस्व एव न स्यात्त्वात्पुरुषत्वात्तिसुस्यादेवेति भावः यद्यपीदं प्रातिपदिकग्रहणं सत्त्व
प्रधानप्रातिपदिकग्रहणार्थं तेनात्र न हृस्वः मूलोक्तार्थे ज्ञापिते चारितार्थ्यं नुर्निरूपं च सङ्ग्राकर्माद्ययोगात्तथापुत्य
त्तिरपि न औत्सर्गिकमेकवचनमपि न गमकं विनात[.]दनुपपत्तेः सुपो धात्विति लुगपि न धातुसाहचर्यात्तास्सृत्रिङि ३१

तरसमभिव्याहृतस्यैव तेन लुग्विधानात् एवञ्च प्रत्ययान्तपर्य्युदासो न कार्य्य इति सूत्रशेषे भाष्ये ध्वनितम् पचेरन्नसर्व्वस्मिंर
न्नित्यादौ नकारोच्चारणसामर्थ्येन न लोपस्तथापि ए तावत्क्लिष्टकल्पनापेक्षया लाघवात्प्रत्ययान्तपर्य्युदास एवोचित इति
भावः अतएवात्वादिति यस्माद्विहितस्तदादित्वस्याशास्त्रीयत्वेन व्यपदेशिवद्भावालभ्यत्वादिति भावः नियमादिति
यद्यपि व्यपदेशिवद्भावेनैकाच्त्वादेरिवास्याप्यशास्त्रीयत्वस्यातिदेशेन लाभसम्भवः अतएव भवतीत्यादौ भवतेः प्रा
वनिरूपिताङ्गत्वसिद्धिर्य्यतिसे इत्यादौ स इत्यस्य पदत्वसिद्धिश्च इरियानित्यादौ कार्य्यकालपक्षे तद्धितान्तत्वनिबन्धनप्राति
पदिकत्वसिद्धिश्च पुत्रापत्ये ततइञन्तत्वनिबन्धनकत्वसिद्धिश्च तथापि असहायएव व्यपदेशिवद्भावो न तु सहायेते
नेतरावयवत्वे तदप्रवृत्तिः स्पष्टञ्चेदं परीतिशब्दे चउपदेश इत्यत्र कैयटे अतएव समासे न यने व्यपदेशिवद्भावेनार
कारस्य नादित्वं दरिद्राधातोरिकारस्यानान्तत्वं तथासति वत्वप्रयुक्त अच्छ इव वर्णान्तत्वप्रयुक्तोऽपि प्रत्ययश्च न स्यात्
ततोऽत्र न किञ्चिद्दुष्टं लोके पि वहु पुत्रवत्त्वे नैकस्मिन्नप्येकनिष्ठादिव्यवहारः विजातीयकन्या सत्त्वे तु एक
स्मिन्नपि तथा व्यवहारो भवत्येवेति बोध्यम् अतएव हरिश्चित्यादौ सोः पदत्वं न निर्जो चत्वार एकाच इति भाष्यन्त्वेकस्मिन्नि
त्यस्यापर्य्यालोचनैवैकदेशयुक्तिरिति तात्पर्य्यम् वस्तुतस्तु पर्य्युदासेनैवार्थवत्त्वलब्धेऽर्थव ग्रहणादत्रास्त्रेपि विभक्ती
तरानपेक्षयार्थबोधकत्वमर्थवत्त्वं गृह्यते एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वमिवेदमप्यलौकिके आरोपित
मस्तीति दक्ष अस् इत्यवस्थायां प्रातिपदिकत्वाक्षतिः तदा प्रत्ययत्वप्राप्तिरेव नेति केवलप्रत्ययपर्य्युदासो व्यर्थः ध्व
नितश्चेदं प्रत्ययपर्य्युदासानुक्त्या भाष्ये स्कृत्रिङन्तमिति सूत्रस्य भाष्ये पदयोरप्यत्रैव तात्पर्य्यमिति बोध्यम् इत्याद

स॰प्रा॰१० अन्यथा विभक्त्यन्तस्योदात्ततास्यात् प्रातिपदिकत्वे तु एवं विभक्तिलुकि टकारोकारस्योदात्तत्वे पुनर्जातिटकाराकारोदा
३२ त्तत्वसिद्धिरिति भावः ह्रस्वान्तत्वेनेति नच समासविकल्पविधानस्य वैयर्थ्यम् समासे एकस्वरत्वं असमासे प्रातिप
दिकत्वे तु पूर्वोत्तरपदयोर्भिन्नस्वरत्वमिति विशेषात् दधि उपदंशमित्यादौ पक्षे प्रकृतिभाव प्रवृत्तेर्विफलस्य वक्तुं
शक्यत्वाच्च तत्सामर्थ्यादिति अन्यथा संज्ञाविधित्वात् स्यात् नप्रत्ययमात्रेलोति प्रकृतेरपेक्षणादिति भावः अधा
तुरितीति कर्तृरूपार्थस्याधिकस्य भाने पि क्रियावाचकत्वात्सत्त्वाधातुत्वात् प्रसक्तेरिति भावः स्त्रीप्रत्यये इति अनुपसर्जनस्त्री
प्रत्यये इत्यर्थः तस्य येन केनापि रूपेण ग्रहणे तन्निषेधस्त्वभिमानः शङ्कितुः राजकुमारीति नन्वत्र प्रातिपदिकत्वस्य न फ
लं लिङ्गविशिष्टपरिभाषयैव तत्कार्यसिद्धेरिति चेन्न प्रातिपदिकत्वतव्याप्यधर्माक्रान्तं लिङ्ग प्रत्ययरहिते दृष्टान्तं तद्विशि
ष्टेऽनयातिदेशेन तस्या अत्राप्रवृत्तेः नहि ङीपूरहिते राजकुमारत्वादौ तदस्ति ग्राह्यग्रहणं न्यावाच्यमिति विवक्ष्यते शङ्कितुः अभि
मानानुसारेणेवोत्तरयति अनोरङ्गस्यापीति यदि तु अस्य निषेधस्य प्रत्ययग्रहणपरिभाषाशेषत्वमेव न्याय्यं यथासा प्रत्य
यग्रहणे एव न तु प्रत्ययाप्रत्ययग्रहणे इति उगितश्चेति सूत्रे भाष्ये स्पष्टम् तथापि निषेधोपि स्त्रीप्रत्ययमात्रग्रहणे न तु स्त्रीप्रत्य
यास्त्रीप्रत्ययग्रहणे इत्युच्यते तदा न दोषः समुदायस्य प्रत्ययान्तत्वाभावादिति दिक् असमर्थसमासे इति असमर्थस्य पर
स्यादावित्यर्थः धर्मिग्राहकेति प्रातिपदिकसंज्ञाधर्मस्य धर्मी असमर्थसमासः ग्राहकं स्वरविधायकं अन्यथा परस्वरम
सम्बन्धेनैकार्थीभावाभावात्समासो दुर्ज्ञेयः स्यात् आर्षप्रायइति तत्प्रकृतिके क्यवन्त इत्यर्थः कृपीत्यधिकारात् उपप ३२
दमिति महासंज्ञाकरणाच्च तदेतदाह पदमित्यादि शब्दान्तादि पदानां च बोधे तस्मिन्नारोपित शब्दसम्बन्धवत् समङ्गा
दौ का शक्तिः इति नत्वर्थं अविसमासग्रहणमिति वो ध्वम् पञ्चमद्यातइतीति अर्थवतीति शेषः सजातीयापेक्षानियमसौ

प्रत्ययो नेत्यस्य पूर्वभागप्रकृतिकप्रत्ययो नेत्यर्थः तेन राजाश्वानित्यादौ न दोषः जन्मवानित्यादाविति तत्र पूर्वभागस्य
पदत्वादिति भावः ननु तद्धितग्रहणसामर्थ्यं न त्वत्राह तद्धितेति तत्र पूर्वभागस्य भत्वात् पूर्वभागः पदमित्यत्र च पदशब्दे
न पदसंज्ञकग्रहणमिति भावः नन्वत्र पक्षे गवित्ययमाहेत्यादौ दोषः गवित्ययमाहेत्यादौ सुबन्तत्वाभावेन पदत्वा
भावात् बभ्रावस्करीत्यादिसमासे पूर्वभागस्य भत्वेन तत्साजात्येन पूर्वो भागः पदमित्यर्थे लाभात् समासश्चेत्यत्रा
र पदेति प्रकृतसूत्रे भाष्ये तु अर्थवत्समुदायानां समासग्रहणं नियमार्थमित्युक्तम् अत्र तत्र [illegible] षष्ठीतत्पुरुषः कर्म
धारयश्च तत्र षष्ठीसमासोऽर्थवदिति तस्यत्वात [illegible] प्रयोगार्हार्थवदित्यर्थः गवित्ययमित्यादावनुकरणस्या[illegible]निति
परत्वावि[illegible] प्रयोगसत्त्वेन तत्त्वमत्येव प्रकृतिप्रत्ययसमुदायस्य तु न व्यावृत्तिः प्रत्ययत्वात [illegible] प्रयोगार्हार्थवत्त्वा
भावात् वाससूत्रे भाष्ये सुबन्तानामित्यनेनेदमेवोपलक्ष्यत इति स्पष्टमेव कैयटे नोक्तमिति बोध्यम् पुरुषावि
त्यादेरित्यादि परस्य तत्प्रकृतिकप्रत्ययत्वाभावादि[illegible]ति भावः वाक्यस्येति कृदन्तत्वादिति भावस्तदाह कृदिति
न चास्य भुजौ कारलत्वेनोपदेशमूर्तिन कारकत्वं मत्वकस्योपदेशे कर्मत्वेनान्वयो विभक्तिस्त प्रधानानुरोधिकरण
त्वकृता तत्तृतीयैवेति तत्प्रत्ययिकारकत्वमित्याशयात् परत्वाद्बाधादिति नियमस्यार्थतो निषेधपिता त्यर्थलार्थवत्त्वात्रा
पवादस्यास्य परत्वेन कृदन्तत्वप्रयुक्तस्याविनिषेधतात्पर्यादिति निषेधानामबलवत्त्वाच्चेत्यपि बोध्यम् निष्फलत्वादि
ति स्पष्टमेवेदं पुंयोगादिति सूत्रे भाष्यकैयटयोः न च समास इति नापि वाक्यमित्यपि बोध्यम् एकार्थीभावेति एकोप
स्थितिनियामिका समुदायशक्तिरेकार्थीभाव इति भावः एवं समासे वृत्तिः विशिष्टा वाक्ये विशक्तिरस्ति विशेषणविशेष्य

ल०श०२० भावांशेतच्छ लोऽर्थवत्सूत्रभाष्यादावुक्तत्वात् लक्षणेति वृत्तौ वाक्ये चेति भावः असिद्धेति समासइव तद्धितेऽपि
३२ शक्तिलक्षणयोरभावादिति भावः पचतकीत्यादाविति नच पूर्ववर्त्तित्वोत्तरवर्त्तित्वाभ्यामेव वैशिष्ट्यं निवेशनीयम् वि
निगमनाविरहेणमध्यवर्त्तित्वस्याविग्रहणापत्तेरित्याशयात् किञ्च बहुपटवस्तिष्ठन्तीति वाक्यस्यापि सञ्ज्ञापत्तिः
एवं समासग्रहणस्य नियमार्थत्वाभावेन चात्रार्थवत्त्वाभावाद्धारणम् ल्यापनयेऽत्तारस्त्वेतदसम्बन्धात् ततीयाश्र
भ्रतीनित्वस्वरे विशेषार्थोम् अभेदविवक्षायामिति साहश्यमूला भेदविवक्षायामित्यर्थः अनुकरणञ्चेत्स्वसादृश्य
उकार्य्येसुपस्यावयति तथोपस्थितस्य शाब्देनान्वयप्रतियोगित्वं व्युत्पत्तिवैचित्र्यात् एवञ्च वत्त्वार्थबोधकत्वरूपार्थ
वत्त्वाभावइति भावः अतएव भूसत्तायामित्यादिनिर्देशास्सङ्गच्छन्ते तदाह भूइति अपदं नप्रयुञ्जीतेत्यस्यापत्तिनिरि।
तमित्यर्थः अस्य चास्मादेवलिङ्गात्पाणिनिष्टितत्वम् भेदविवक्षायामिति अर्थवच्छब्दोपस्थितिविषयएवैतत्पक्षेइतिभावः
अपंपक्षोमतोऽस्य ः सूत्रे भाष्ये अनयोश्चलक्ष्यानुरोधाद्व्यवस्थेतिदिक् स्याद्वीत्यर्थइति प्रातिपदिकव्याप्यधर्म्मोत्तं
लिङ्गप्रत्ययविशिष्टेति देशादिति भावः स्वष्टश्चोदं वहुव्रीहेस्सधसइत्यत्र भाष्ये इयञ्च प्रातिपदिकसामान्यग्रहणेन
द्विशोबग्रहणेच तद्गुनयन्नाह अयसूम्मीति किञ्चेत्यादिच उत्तरपदेष्विति अत्र चङ्गान्तमुत्तरपदमितिभावः टिलो
पइति इदमुपलक्षणंपुम्वत्त्वस्यालिङ्गस्य सामान्यग्रहणे विभ्रवन्त्ते रेवानयापरिभाषयाङ्गाश्च ग्रहणं भाष्ये शङ्कित
मस्व हस्तामालाइस्तागौरीति समुदायस्यानुपसर्ज्जनस्त्रीप्रत्ययेततादिनियमाभावात् ङ्याबन्तत्वेनततः कृत्वुत्यत्त्यर्थ ३३
न्तदस्तु लिङ्गविशिष्टपरिभाषयानुनात्र सिद्धिः ङ्याप्रहितस्य हस्तामालाइत्यादेः समुदायस्य प्रातिपदिकत्वाभावेनत

इतिदेशोप्रवृत्तेरेवमुचाम् इष्टामालादेवदत्तेत्यादावेकपदान्तरितत्वेनैकान्तरतापत्तिरितिवाच्यम् एतद्भाष्यप्रामाण्ये
नप्रातिपदिकसाहचर्य्येणपृथगर्थोपस्थापकविभक्त्यन्तानवयवकङ्यावन्तस्यैवग्रहणेनादोषात् प्रत्येकमविपदत्वसत्त्वे
नैकान्तरत्वाभावाच्च उत्तरसङ्ख्यायाः पूर्वसङ्ख्याबाधकत्वात् नियमार्थेन्तुनेत्सूत्रे नेदोषापत्तेः कुत्सार्थस्वा
र्थिकानां कुत्सितइतिसूत्रस्थभाष्योक्तरीत्याङ्यावन्तादुत्पत्तेः सिद्धत्वादित्यन्तस्वार्थिकेफलमाह तथाहीत्यादिना ।
स्वार्थिकत्वेन अत्यन्तस्वार्थिकत्वेन परस्त्वेत्यम्युच्चयः एवञ्चत्वोहितादित्रिङ्बाधनमेवेतिनवक्तव्यमितिभावः वि
कल्पः ।सिध्यतीति अन्यथा आर्थ्यप्राकात्कनिसमुदायोत्तरं टापेवलिङ्सम्बन्धबोधनसमर्थवादेकाजद्विर्वचनन्याये
नसमुदायादेवटापिकनःपूर्वं टाबभावे आतः स्थानिकत्वाभावाद्विकल्पासिद्धिरितिभावः ङीप्प्रसङ्गादिति अन्य
पदार्थस्यस्त्रीत्वाभावादितिभावः अकृतएवेति इदंगोस्त्रियोरितिसूत्रेभाष्येस्पष्टम् समासान्ताइत्यत्रतादर्थ्योत्ताच्छ
ब्द्यमितिहितत्रभाष्यम् अलौकिकेप्रक्रियावाक्यएवेत्यस्यप्रवर्त्ततेइत्यनेनान्वयः कुप्रवर्त्तते तत्राहोत्तरपदस्येति अन
न्तरमितिशेषः अवयवीभूयेत्यस्यप्रक्रियावाक्यस्येत्यादिः एतत्सर्वंत्वरूपकथनम् अवयवत्वेप्रमाणमाह समा
सान्तइति तच्छब्दवाच्यत्वादिति समासस्यैवायमन्तावयवइत्यन्तइतिसूत्रेभाष्येस्पष्टम् इत्येकेइति अत्रारुचिबीज
न्तुसमासार्थवाक्यस्यान्तइतिगोस्त्रियोरितिसूत्रस्थभाष्यस्यबाध्यार्थबोधः नहिस्त्वग्रहितंसमासार्थ्यम् किन्तुतद्वि
शिष्टमेव किञ्च ततःपूर्वंकपितततःसमाससञ्ज्ञायांकवृत्तुकिटाविबहुचर्मिकेत्यादावापः कपः परत्वादित्त्वानाप
त्तिः तत्रविभक्त्यन्तेन्यपदार्थबोधकत्वाराखेलस्त्रीत्ववाधकत्वस्यतदन्तेसत्त्वात्क वलुकः पूर्वंकवनादावितिवक्तुम
शक्यमिति परत्वादिति पक्षेत्विति नचविशिष्टस्यकवन्तत्वाभावेनकवन्तात्तद्धितइतिसिद्धान्तविरोधः तेषामतिरिक्ता

लं० श० २० र्थाभावेन परिपूर्णमस्य दमितिन्यायाविषयतया तस्य सिद्धान्तस्य समासान्तविधेरभावात् एवञ्च समासान्तेषु ज्ञा
३४ प्रप्रातिपदिकादित्यस्यासम्बन्ध एव तस्यामवस्थायां वाक्यस्य प्रातिपदिकत्वाभावादिभावः तद्धितान्तत्वादिति प्रा
तिपदिकत्वेनेतिशेषः पुनः स्फपिचाहृतेरिति प्रत्ययलक्षणेन स्फवन्तत्वात्समाससञ्ज्ञा रूपत्तद्वाक्यावयवत्वेन
तद्ग्रहणेन तदन्तस्य ग्रहणात् स्फपिचहृतेरिति क्वाचित्कः पाठः प्रामादिकः तदुत्पत्तिपर्य्यन्तं समाससञ्ज्ञायाः अप्रव ल४
त्तेर्मानाभावात् न च स्फवन्तत्वाभावः अनेन स्फपासमुदायस्य स्फवन्तत्वेपि उत्तरपदमात्रस्य तत्त्वाभावात् पूर्वप
दस्य स्फवन्ततायाः प्रत्ययलक्षणेनैवोपपाद्यत्वात् एवञ्च पूर्वपदान्तकरणफलाभावात् वहिर्भूतसङ्ख्याकारकसा
पेक्षस्फपस्तस्यामवस्थायां तत्रनभिव्यक्त्याऽप्रवृत्तेश्च वस्तुतस्तु तद्धितान्तनिमित्तप्रातिपदिकसञ्ज्ञासमकालमे
व विरोधाभावेन तत्पूर्वभागस्य समाससञ्ज्ञेति बोध्यम् योगपद्यासम्भव एव शास्त्राणां क्रमप्रवृत्त्यङ्गीकारादितिदि
क् यत्त्वाहुरिति ङीग्रहणानुलोहनिकेत्यर्थमितितद्भावः अनेनेति आर्थिकेत्यसाधनेनेत्यर्थः स्फवन्तात्तद्धितोत्प
त्तेः प्रागेवङ्ज्ञापोः प्रवृत्तौ च वीजमाह स्वार्थादीति स्वार्थद्रव्यलिङ्गसङ्ख्याकारके त्यर्थः स्वार्थः प्रवृत्तिनिमित्तं
विशिष्टवुद्धौ विशेषणज्ञानस्य कारणत्वात्पूर्वं जात्यादिज्ञानं ततो धर्मित्वेन प्रधानत्वाल्लिङ्गादिभिराकाङ्क्षित
त्वात्तदाश्रयज्ञानं ततः स्वमात्रापेक्षत्वाल्लिङ्गस्यज्ञानं ततो विजातीयक्रियापेक्षकारकापेक्षया सजातीयपदार्थापे
क्षसङ्ख्यायाः प्रथममुपस्थितत्वात् ज्ञानं ततः कारकरूपविभक्त्यर्थाकाङ्क्षातन्निवृत्तौ वहिर्भूतकृत्तादियोग इति ३४
कुत्सित इति सूत्रे भाष्ये स्पष्टम् एवञ्च ज्ञानक्रमानुरोधेनैव तत्तत्प्रत्ययकार्य्यप्रवृत्तेरौचित्येन क्रमिकत्वं स्पष्टमेव

यद्यपि लोकानां बोधानक्रमेण तथापि शास्त्रप्रक्रियायां शास्त्रकृत्कल्पितोऽयं क्रमः अर्थवदुद्देशेन प्रातिपदिकत्वविधाना
त् प्रातिपदिकोद्देशेन ङीबादिविधानादित्यादि बोध्यम् अत एव घकालतनेष्विति चरितार्थम् स्वरूपञ्चेदमचः परस्मिन्नि
त्यत्र भाष्यकैयटयोः एवञ्चैतन्न्यायसिद्धार्थानुवाद एवाऽतराम् अत्यन्तस्वार्थिकानारभ्य तस्य निवृत्तेस्तत्कन्यायविषया
भावात्समासान्तेषु न दोषः अत्यन्तस्वार्थिके कनि स्वार्थिकेत्येव यद्यभिधानमस्ति लोहितिकेत्यत तत्सिद्ध्यर्थं च लोहिताल्लि
ङ्बाधनं चेति कार्यमेवेति भावः स्वरूपञ्चेदं तत्र शेषे भाष्ये स्पष्टम् इत्यन्यत्र विस्तरः पञ्चम्या इत्यनुवृत्तेरिति तृतीयाया वृत्तपर
ति भावः टाङसीति तत्रेकारानुच्चारणे ह्रस्वस्य यथासङ्ख्यस्यानापत्तिरिति भावः ङित्वमिति ततश्च टिलोपः स्यादिति भावः
विशेषणार्थ इति तत्फलं त्वनुस्कपांस्कलुगिति सञ्ज्ञे णाकारादेशो इनादेशाभावः घेर्ङितीति न च घेः स्कपिगुण इत्येवास्तु ज
५८ सि चेति नियमात्तु नाङितीति वृत्तिरिति वाच्यम् यतः इत्यर्थं जसि चेत्यस्यावश्यकत्वात् तान्येकेति तत्रानुवर्तनस्य तानीत्यस्य
लब्धा व्याकरणान्तरोक्तप्रथमादिसंज्ञानीत्यर्थः वीप्सायां द्विर्वचन इति शासः कारकाद्विधाने न मङ्क्ष्लामङ्क्ष्लादिरू
पार्थापेक्षणे न च शासो बहिरङ्गतया द्विर्वचने कृते शास इति भावः यद्यपि कश्चिदुक्तार्थानामप्रयोगो भवति तथापि प
त्र तद्धितेनानुक्ता वीप्सा भवति तत्र द्विर्वचनं यथा एकैकशो ददातीत्यादि भाष्योक्त्या अल्पार्थे कैकशः शाब्दवीप्सायां द्विर्वचने
बह्वल्पार्थादिति शसिति कैयटोक्त्या च प्रकृते तद्युक्तमशाक्यम् न चैवं रूपाभिसहस्रमेकां कपिलामेकैकशः सहस्रं कृत्वा
दत्वा तपाते सर्वैः सहस्रदक्षिणाः सम्पन्ना इत्यत्र इडाः सत्रस्य भाष्ये एकैकश इति प्रयोगाः सङ्गतिरिति वाच्यम् एकेति प्रधाना
र्थकसम्बोधनसत्वेनैक[illegible] शा इत्यस्य प्रत्येकमित्यर्थकत्वेनादोषात् एतद्भाष्यप्रामाण्येन स्वार्थिकद्विर्वचनकल्पनापेक्ष

तत्र वार्त्तिके प्रा[ति]पदिकैकशेष इति प्रबलात्र जननीवाचि पदे ...त वाचि मातृप्रा...यो प्रातिपदिकत्वे तु तरुविकल्पेन पतत्संबोरेकशेष एतज्जन्तु
विवक्षायामेव न ते इत्युक्तेरित्यभिप्रायेणा ...ते नान्विति ८ श्रीराम: १ विभक्त्यन्तानां तत्रैकशेषनिषेध आवश्यक: १ शुद्धि:

ल०प्रा०र०

यामनुक्तस्यैवन्याय्यत्वात् किंच नायमभाष्यप्रयोगः किंच गोलपसुत्तरासङ्ख्याम्बिसङ्ख्याम्बाधत इत्यत्र श्रोतो
३५ वाक्यान्तर्भावायमव्यवहारो दृष्टान्तत्वेनोक्तो भगवतेति तत्र च्छान्दसत्वान्न दोषः एकैकशः पितृसंयुक्तानीत्यादिवदिति दि
क् इतिभावः इति एतेनैतवच्छन्दोपवादः एकशेष इति व्यवहार इति भावः एतेनैकशेषारम्भफलमपि निरूपितं छन्दुनि
वृत्तिरूपम् उत्तरसूत्रेति वृद्धोपूनेतीत्यर्थः अनुकर्षणादिति अनुपश्चात्कर्षणादाकर्षणादित्यर्थः क्वचिदपक
र्षणादित्येव पाठः नैकशेष इति भ्रामादावपीत्यर्थः भ्रामित्री पुंसयोस्ताभ्यामित्यनुप्रयोगस्य समत्वात् एतेनार
त्येद्द नुप्रयोगविरोधादत्र नैकशेष इत्यपास्तम् पुमान् स्त्रियैकशेषोपि न तत्राप्येकविभक्तौ सरूपाण्येवेत्यनुवृत्तेः अ न पुमान् स्त्रियेत्येकशे
त एव प्रातिपदिकैकशेषे मातृमात्रोः प्रतिषेधो वक्तव्य इति वार्त्तिककृतोक्तम् नैनु वार्त्तिके प्रातिपदिकैकशेष इ षविधेयो माताच माता
त्युक्तम् विभक्त्यन्तानामेकशेषेपि जननीमातृधान्यमात्रर्थके मातृभ्यां देहि मातृभ्यां त्वेत्यत्र प्रतिषेध आवश्य चेति विलत एवित्य...विवेति
कः न च तत्पक्षे इष्टापत्तिः किमुच्यते प्रातिपदिकानामेकशेष इति न पुनर्वस्याविविभक्त्यन्तानामेकशेषस्तेनापि प्रति चेत्याह ६
षेधो वक्तव्यस्तत्यापि हिये तानि क्वचिद्विभक्त्यन्तानि सरूपाणि मातृभ्यां मातृभ्यां चेति अयमतमेतत् विभक्त्य
न्तानां सारूप्ये भवितव्यमेकशेषेणेति भाष्योक्तेरितिवाच्यम् सूत्रव्याख्यानपक्षभेदेनैकलक्ष्यस्य साधुत्वासाधुत्वयो
रनौचित्यात् अत एवायमतमेतदिति प्रतीकमुपादायाभ्युपगमवादेन त्वेतदुच्यत इति कैयटादिभिर्व्याख्यातमिति
चेन्न ईदृशाविरुद्धमभ्युपेत्यैव वार्त्तिके तदुक्तेः अत एव तदुत्तरमेव भ्रत्रकृत्वा चोद्यते इत्युक्तं भाष्ये अस्य प्रातिपदि
पद्म १ कानामेकशेष इत्यादीति शेषः अनेन चास्य पूर्ववार्त्तिकत्वस्फुटमेवोक्तम् तत्र मातृग्रहणं च विभक्तौ विरूपाणामुप ३५

लक्षणम् अयं च पूर्वपक्षः प्रातिपदिकैकशेषस्यैकविभक्ताविति पदाभावे एवोपपत्तिं मत्वा कृतः तदभावे हि यानि मह(
पातितेषामेकशेष इत्यर्थक एव प्राप्नोति प्रयोगमात्रावच्छेदेन सारूप्यस्य हरिणीहरितप्रकृतिकहरिणीशब्दादौ तद्वि(र
तैवैरूप्येणासम्भवात्प्रयोगसामानाधिकरण्येनैव सारूप्यस्य ग्राह्यतया तस्यात्रापि सत्त्वात् प्राप्तस्य स निषेधः अत
एवाग्रे विभक्तौ सारूप्ये उपलक्षणत्वमाश्रित्य तत्पक्षस्यापनेन तत्खण्डनं कृतमिति एवकारापकर्षो भाष्ये ध्वनितः
तद्विना तावन्मात्रेण तत्खण्डनायोगात् एतेनैकविभक्ताविति यावत्त्यैकविभक्तौ सरूपाणामेकविभक्तौ विवक्षितायां
मेकशेष इत्यर्थे यस्यां विभक्तावेकशेषस्तस्यां विभक्तौ सरूपाणामित्यर्थस्य प्रत्यासत्त्या लाभेन भ्यामादावेकशेषो नो
जसादावि... तिवार्त्तिकं व्यर्थमिति तदाशय इत्यपास्तम् ... वार्त्तिकमते भ्यामादावपि तदभावस्य प्राप्तत्वाच्चेति
दिक् एतच्चेति एकशेषविधायकं चेत्यर्थः ध्वनितं चेदं पक्षे सर्वेषां विभक्तिपराणामेकशेष इति पक्षे विभक्त्यन्ता
नामेकशेष इति पक्षे च द्वन्द्वप्रतिषेधो वक्तव्य इत्याशङ्क्यानवकाश एकशेषो द्वन्द्वं बाधत इति ग्रन्थेन भाष्ये इतरेति
एकत्वाद्यस्यान्यतरस्यामित्यनेनैकशेषविषयपदानां समाहारेऽप्रवृत्तिबोधनादिति भावः इतरान्वय इति एकरूपेणै
करूपावच्छिन्नेनेतरत्रान्वय इत्यर्थः इहेति इति अत्र सभेदेन परस्परान्वयाद् घटितसाहित्यनिमित्तैकशेषाप्रव
त्तिरिति भावः एकरूप्येणैवेति पुष्पवन्तपदरवेति भावः द्वन्द्वप्रसक्ते इति विभक्त्युपस्थितौ सत्यां न त्वात्र सक्तिर्बोध्या एक
वद्भावापत्तेरिति एवं चेतरेतरयोगविषयाभावेनैकशेषानापत्तिरिति भावः इत्यनयोरिति जसः शीत्यत्रैवेति वक्तव्ये
विभाषा जसीति तु उद्भूतावयवभेदविवक्षया बहुवचने एकशेषद्वन्द्वयोरभावात्तत्र विकल्पवारणायोक्तता चेतिभावः

प्राप्तस्य स निषेधो नाप्राप्त
स्येत्यत्र प्रयोगसामानाधिक
रण्येनैकार्थ्यमत्र काप्रयुक्ते प्र
योग इति

नन्वत्र द्वन्द्वस्यैवकारापक
र्षप्रमाणं किमित्यत आह एतेनेति

तेन प्राप्त इङ्गल्वादेकश
... स्तीतरेतरयोगापवादः
एकवद्भावस्य समाहारविष
यत्वात् इत्याश... माह एवमिति

सं०श्रा०१०

३६

सजातीयेति स्वातन्त्र्येण प्रयोगार्हत्वेन साजात्यमिति न दोषः एतत्सर्वं भागस्य विभक्त्युत्पत्तिमनपेक्ष्य स्वातन्त्र्येण प्रयोगा
नर्हत्वात् अनुग्रहसम्भवादिति अत एव न प्रत्येकं तदुत्पत्तिः बाधादिति अन्यथा द्वन्द्वोच्छेदो नलोपाद्यसिद्धिश्चेति
भावः यानि सरूपाण्येवेति तेषामेक विभक्तौ परत एकशेष इति शेषः मानाभावादिति भाष्ये ऽनुक्तत्वादिति भावः
किञ्चावृत्तौ प्रत्यासत्तिन्यायेन यस्यां विभक्तावेकशेषस्तस्यां विभक्तौ सरूपाण्येव यानि तेषामित्यर्थो यस्यां यस्यामा
दावेकशेषापत्तिः प्रातिपदिकैकशेषे मातृमात्रोः प्रतिषेधो वक्तव्य इति वार्त्तिकमते भ्रामादावपि तदभावस्यैवेष्टत्वा
नुमानात् फलमिति समुदायादेकविभक्तेरभावाद्विभक्तेर्लुकालुग्रन्थेति भावः सहविवक्षायामिति तस्याश्च समुदा
यस्यैकार्थे निरूपितैककारकावेश एव भवतीति भावः गोलक्षुत्यकर्म्मत्वेनेति उभयोरपि कर्म्मत्वेन तत्र समुदाया
देकविभक्तेः कर्तुं शक्यत्वेन विभक्तिपदे न व्यावर्त्त्यो सम्भवेन सहविवक्षायामित्यावश्यकमिति भावः नन्वत्रापि लु
कि विभक्तिपरत्वाभाव इत्यस्वरसेनाह देवदेव इति असहविवक्षायामप्येकशेषे तत्पुरुषादिविषयेऽपि तदापत्तिरिति भा
वः तत्रापि समुदायादेकविभक्तेस्सत्त्वात् नन्वनेकबोधकैकभिक्षाशब्दादपि भैक्षसिद्धिरस्तीत्यत आह तथाहीत्या
दि एकशेषारम्भे एकशेषस्थिमातादृशस्य ज्ञानासम्भव इति भावः विभक्तिपरत्वाभावादिति नित्यत्वाददिवद्धीसारू
प्याभावाच्चेत्यपि बोध्यम् अविरविकन्यायेन समाधानन्तु लक्षणैकचक्षुष्कैर्दुर्ज्ञेयम् न च समर्थग्रहणेन परिनिष्ठित
प्रातिपदिकात्तद्धितोत्पत्तेः पूर्वमेकशेषः पश्चात्तद्धित इति वाच्यम् प्रातिपदिकाधिकारात् किन्तु समर्थं कृतवर्णा २६
नुपूर्वीकमिति भाष्याच्च प्रातिपदिकसम्बन्धिवर्णमात्राश्रयतत्सम्बन्धिवर्णनिमित्तकार्यैतापरिनिष्ठितत्वस्यैवाश्रयणा
त

अत एवाक्षिमामतिति सेऽः इष्यते अन्यथा अहत्वं शेषेदीर्घस्वरां स्यात् उभयत इति विभक्तौ परतो यतो प्रत्ययविधि
स्तस्यैकशेष इत्यर्थः तदाश्रयणमितिभावः अचः परस्मिन्निति स्थानिवत्त्वं तु न लोकप्रसिद्धतन्त्रानुवादकत्वादस्य
शास्त्रानुवादसामर्थ्यादेव द्वन्द्वनिवर्त्तकस्य शास्त्रीयविधित्वाभावात् अनया परीत्यानावत्त्वाप्राप्तिरित्यन्यत् यदि तु
एकदेशविकृतन्यायेन प्राग्दीव्यतोऽणितिसूत्रस्य भाष्यप्रामाण्यात् स्थानषष्ठ्या बोधितविकारस्यापि ग्रहणमशास्त्री
यस्य च तेनातिदेशस्तदा मान्तस्य तेन न्यायेन तत्प्रकृतितया ओ इत्यस्य च प्रत्ययत्वेनादोषः अत एव तस्य पदत्वसि
द्धिः अत एवम्प्रायसावित्यत्रैकदेशे कृते नुममाशङ्क्याचः परस्मिन्निति स्थानिवत्त्वेन परिहृतम्भाष्ये इत्युच्यते त
र्हि वैरूप्यादेकशेषो न स्यात् विरूपाणामित्यनेन न तत्साधने तु न दोष इत्यलम् युगपदधिकरणतेति युगपदधिक
रणानाम्व्याणाम्वचनं यैः पदैस्तद्भावे इत्यर्थस्तदाह एकैकमित्यादि अलौकिके इति तत्रैव द्वन्द्वादिवृत्तिसत्त्वात्
तत्रापि तत्कल्पनादिति भावः रामकृष्णावित्यादौ विरूपाणामपीत्येकशेषस्तु न द्वन्द्वविधानसामर्थ्येन तत्राकार
लिकस्यैव समानार्थत्वस्य तत्र निमित्तत्वात् एवं चैकस्य विभक्त्यन्तस्य निवृत्ताव परस्य तद्विशिष्टस्यश्रवणमिति भावः
पक्षान्तरेपीति अयम्भावः अलौकिके तत्कल्पनेपि प्रत्येकं स्वुत्पत्त्यनन्तरमेव तत्कल्पनात् तदनन्तरमेव तत्
कल्पक द्वन्द्वे कशेषयोः प्रवृत्तेः एवं च्यान्तरङ्गत्वाद् उत्पन्नस्यैव चानन्तरं णेन द्विवचनाद्युत्पत्तौ मानाभाव इति उत्त
रपदार्थे उपसंक्रमेणेति उपसङ्क्रमश्च तत्तल्लिङ्गतत्संख्यावत्त्वाद्यर्थस्योपस्थितिः सा च विभक्त्यर्थसम्बन्धाद्यन्तर्भाविरो
वेति तस्योक्तत्वात्तदनापत्तौ तदुच्छेद इति भावः दुःखा चेति दद्रुव्यवहारस्य शाब्दार्थनिश्चयहेतुत्वं न च ज्ञक्षस्य

ल० प्रा० १० न्यग्रोधाभिधायित्वं वटद्रव्यव्यवहारे दृश्यते न्यग्रोधशब्देनं तत्रत्राभावाच्च नलक्षणयापि लाक्षन्यग्रोधाभिधायित्वाद्देवोधावृत्त्यनु
भावाच्च दुरुपपादाश्चेति नच द्विवचनाद्यनुपपत्त्युपपादिका समासस्याङ्गीकृतावयवभेदसमुदायाभिधानशक्तिमत्त्वा
३० त् द्विवचनादिसिद्ध्यात तदनुपपत्तेस्तदुपपादकत्वाभावात् समुच्चायान्वाचययोः समासस्यैवासामर्थ्येनैववाराविष्य
माणतयानतदापत्तिरेतदुपपादिका नचान्यत्रोपवादपितुमशक्यत्वेपि एकशेषकल्पना इत्यत्र विनिगमकाभावात्
सर्वेषांसर्वार्थत्वमावश्यकम् तथासत्येकशेषस्यवैयर्थ्यापत्तेः तस्मादेकशेषस्ताना चारंभशास्त्रवासनावतां तच्छ
क्तित्वानं नतुततः प्रागपीतिनदोषः आहृत्यविनाभूतेति नियमेनाकृतिसम्बन्धेत्यर्थः ब्राह्मणशब्देनैवेतिपाठः
नहि तत्रैकशेषः तावद्ब्राह्मणशब्दस्तानासम्भवात् तस्मात्तत्र तच्चैतत्तैव जातिपक्षे लवायप्यानिर्बोहस्त्तयान्यत्रापीतिभा
वः नब्राह्मणानामित्येकवचनन्त्वार्षम् तस्त्रेणैकवचनत्वादिति अयम्भावः भाष्येऽर्थावयवैर्थपदार्थान् पदार्थान्प्रतिचय
त्नपित्रत्यर्थमेवेत्युक्तम् एवञ्चैकेनानेकार्थबोधनमपिप्रत्यर्थमेवेति एकेनैवब्राह्मणपदेनानेकार्थबोधनन्तत्र अ
न्यायाविद्यमानायाः शक्तेरेकशेषशास्त्रसहस्त्रेणाप्युपपादयितुमशक्यतया बोधानुपपत्तिरेवस्यात् तत्रत्र्यार्थतन्त्र
म् एकत्रैवशब्देऽनेकार्थानांसत्त्वात् शब्दस्यपर्यायपरिवृत्तिसहत्वपार्थतन्त्रमेवैतत् अक्षाइत्यादौत्तुतदसहत्वपाप्र
वृत्तन्त्रमेव अन्यथा तत्रानङ्गीकारेऽक्षमाशब्दः क्षान्तिभूम्योर्वाचकः नानार्थानुरोधेनेति सूत्रमावश्यकन्तत्रेतिशेषः
न्यापश्राप्तत्वादिति अनभिधानमाश्रित्यत्तुभाष्यपक्षद्वयेपिसूत्रमप्रत्याख्यातमित्यन्यत् अनेकघटादिपदादिसाहित्ये ३०
वृत्तिरेवमानभिधानादिति द्वन्द्वाप्राप्तिरेवेतितदाशयः आवश्यकमिति अनभिधानात्तानेऽइतिशेषः मानेनैकशेषो
विधीयतेऽइति किन्तुन्यायसिद्धएवानूद्यतेइतिएतच्छेषस्यद्वन्द्व प्रयुक्तानामिति अयम्भावः वृक्षादिवत्त्तावेकशेष

तत्र हि गामित्यत्र तिनाद्यती सत्र प्रत्ययलक्षले ओतोम्शसोरित्यात्वमाशङ्क्य तत्र न तत्रैवे धाविति बच नात्मभवतीत्युक्तम् ओतोम्शसोरित्यत्रानग्रहणानुव
त्यभावेतद ... तिः स्पष्टैव ८

॥३८॥ रगात्त्रा प्रवत्त्यानित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वेन तावदेव परिनिष्ठितं स्यात्तच्च नलोके प्रयुज्यते प्रयुक्तानाञ्चेदमन्वाख्यान
मितिनतत्रक्रियावाक्येव द्व्यादिप्राप्तिरिति सन्दर्भविरुद्धमिति एकस्यैव प्रयोगो यथा स्यादिति तत्रमिति समुदायादेकविभक्ता८
विति पक्षः प्रत्याख्यात इति च सन्दर्भे त्यर्थः न्यायविरोधमाह प्रयुक्तानेवेति नचायतत्वाद्धशास्त्रीयकार्य्यप्रवृत्त्यापरिनि८
ष्ठितं सल्लोकप्रयोगार्हं कल्पितेतदीयालौकिके तच्छास्त्रप्रवृत्तावपि अत्र द्व्यादिप्रवृत्तिर्नोचिता वेबम्यादिति वाच्यम्
कृतद्वन्द्वानामेकशेष इति पक्षे नावावनङ्गाह्वावित्यादौ परत्वादिना आवादौ कृते एकशेषानापत्तेरिति दूषणसानपरभो
व्यासङ्गत्यापत्तेरित्यलम् अमियोजिति अवयविनञ्चाधारत्वविवक्षायां वक्षेशावेतिवत्सप्तमीत्याह अमोऽवयवे ऽची
ति पूर्वपरयोरित्यधिकृतपरशब्देन विशेष्यत्वादजेवगृह्यत इति बोध्यम् निर्द्दिश्यादत्वादिति उत्तरत्रानुवृत्तेस्सत्वादिति भावः
लिङ्ग मिति अनुवृत्तावनुवृत्तस्य विशेष्यत्वे चेत्यर्थः स्पष्टञ्चेदमोतोम्शसोरित्युपक्रम्य प्रत्ययलक्षणतसूत्रे भाष्ये अ
वयवषष्ठीति अवयवावयविभावसम्बन्धबोधिका षष्ठीत्यर्थः निर्द्देशाच्चेति तुमग्रहणाञ्चेत्यपि बोध्यम् नियमार्थ इति
सचसाजात्या दक्षरसमाम्नायिकविषयको तोनणामित्युत्तराज्भागेन व्यवधाने विलत्वसिध्यास्त्वर्लान्तस्येति वचनं न
कार्य्यमितिभावः इदं प्रत्याहाराह्निके प्रकृतसूत्रे च भाष्ये स्पष्टम् यद्यपि रवाभ्यामिति पञ्चम्योपस्थित निर्द्दिष्टपदस्य व्य
वायेइत्यनेनाविरोधाय उद्यतिरिक्ताव्यवहितपरत्वादर्शनात्तीत्या ऐलत्वेस्कृशाक वाररां ध्वनितञ्चेदमग्रहसूत्रे वार्त्तिक
कृता तथापि तत्र नणामित्यर्थे वचनारम्भेगौरवमितीदमेवादृतं मूलकृता स्वाभाविकस्येति तद्भिन्नस्यानिकस्यपातिन्दुस्था
रीतस्येत्यर्थः तं हृदित्यादेरपि नकाराजावनुस्वारेति बहोले न्यस्यानिकेत्वात् अतएवतं हृदित्यस्यनलोपेन त्वट इत्यस्य सिद्धिः।

लं० श०१० इविश्रीलने हि विविदिवीतिदण्डकपठितस्येदं निष्ठाग्रहणम् प्रेन्वनमित्यादौ तु मोनस्य क्सुम्भादित्वाभावात्पत्वाभावः इतिदि
३८ गिति तद्धस्त्रनवक्तुं शक्यम् तं हृ इत्यस्य तं हरणमित्यसिद्धेः स्यादेतन्न्वेदमाद्ये अन्नन्त्वादिति तदनङ्गीकारे हि अपाचितरामि
त्यादौ चिणो लुगपादानादिपरभाष्यविरोधः चिणः परस्याऽसञ्ज्ञानिमित्तस्य प्रत्ययस्य लुगित्यर्थात् दिगिति दिगर्थेत्क पाचा
कपाचमित्यादौ यथा कपाच हस्ताभ्यां लपताविव्यनेन वचनसामर्थ्येन निपातसमुदायात्प्रत्यये ऽङ्क्त्वानापत्तौ वद्धना
पत्तेरित्यलम् ऐरुहतइति नद्येरित्यादिसिद्धये उत्तरार्धमित्त्वादित्यन्ये विषयभेदादिति तत्रेणषष्ठीद्वयोच्चारणात् आदेश
रूपसस्य स्थाने प्रत्ययावयवसस्य स्थाने च षो भवतीत्येवं रूपः षष्ठीभेद इत्यर्थः ओस सम्बन्धद्वयार्थक इत्यभिमानः
तिसृणामिति तिस्रादेशे सकारोच्चारणं तु तिसृ इत्यत्र न र परे इति षत्वनिषेधेन चरितार्थमिति भावः उकारेतिप्रसज्जेदिति
सोष्मणस्योच्चारणं इति द्वितीया इतिस्थाने न्तरतमस्त्रस्य भाष्येरगतस्याविसोष्मत्ववोधनात् सोष्मण इत्यस्योष्मत्वस
हितस्येत्यर्थः अत्रार्थे अभ्यन्तरसम्वादमप्याह तथाचेति प्राक्स्क्रबुत्पत्तेरिति सोपपदात्सिचेर्क्विचीतिभावः के
वलात्सिचेर्क्विच्चि दध्नः सेचौविति समासे तु उत्तरपदत्वेवेत्यस्यापदादि विधाविति निषेधेन प्रत्ययलक्षणेन पदत्वस
त्वात्पदस्यादिरित्यर्थे विसिद्धिर्भोरितिभावः यद्यपि कैपटेन सोपपदात्सिचेर्क्विजेव नानभिधानादित्युक्तम् तथापिप
चिभमित्यत्र स्क्रिङन्तमित्यतः स्कविप्यनुवर्त्यपजादावसर्वनामस्थाने तत्कृतिकभसञ्ज्ञा भवति यजाद्यसर्वनामस्था
नपरं स्कवन्तंयद्यस्ति तदपि भसञ्ज्ञं तेन स्कवाचेत्यादौ नकुत्वम् अत्रतत्प्रकृतेः सञ्ज्ञा प्रधानशिष्टावयवस्कवन्तास्यत्व
ञ्चाच्चयशिरा एवंत्यादिष्विति योगविभज्यस्वादिषुपर्वस्य पदत्वं विधायासर्वनामस्थान इत्यत्र स्कवन्तमित्यनुवर्त्य। ३८
यचीत्यपहृष्य प्रसज्यप्रतिषेधमाश्रित्य यजादौ सर्वनामस्थाने परतः पूर्वं पदं न तत्परं यदिस्कवन्तम् सिदं दपिपदं नेत्यर्थः त

क्त्वन्तस्य यजादिप्रत्ययान्तत्वविहितमेवातो राजपुरुषादौ ऽपूर्वपदेन लोपादिसिद्धिः अत्र समुदायस्य स्वादिष्विति प्राप्ताऽवय
वस्य क्त्वन्तमिति प्राप्ताऽप्ययमालोपो ऽपूर्वपदस्य संज्ञेष्टेव तेन क्त्वा चाविस्यादिसिद्धिरित्येवमुत्तरपदत्वे चेत्यस्य प्रत्याख्याने
दृष्टः से चाविति षष्ठीतत्पुरुषे पिषत्वनिषेधाय पञ्चमीसमासश्चावश्यक इत्यनभिधानेन मानमिति तात्पर्य्यम्।
प्रत्याख्याने पञ्चमीसमासे बहुले चाविस्याद्यर्थं मन्बहुच्पूर्वस्य षत्वं नेति वचनं कार्य्यम् वार्त्तिकारस्तु तत्रैव कृत्वा वारणाय ब
हुच्पूर्वस्य [illegible] चापदादिविधौ नेतिवत् इदमपि योगविभागस्येष्टसिद्ध्यर्थतया यत्रोत्तरपदस्य कार्यि
त्वं तद्विषय एव पदान्तत्वप्रयुक्तं कार्य्यमेवं च बोध्यमित्यन्यत्र विस्तरः यापदसंज्ञेति न च राजपुरुषाद्वित्यत्र दोषः। ग५
अन्तर्वर्त्तिविभक्त्या क्त्वन्तमिति पदत्वमाश्रित्य निषेधापत्तेरिति वाच्यम् सातिग्रहणेन स्वादिष्विति यस्य पदसंज्ञा त
दुत्तरस्य षत्वनिषेधो नेति ज्ञाप्यत इति तात्पर्य्यात् प्रत्याख्यानरीत्या तस्यापि स्वादिष्विति पदत्वाच्च सर्वं चेदं न लुमते
ति सूत्रे भाष्ये स्पष्टम् व्यतिसे इति यद्यपि व्यतीहारस्यानेककर्तृकक्रियाविषयत्वादेकवचनस्य तत्रासम्भवस्तथा
पि विश्वामित्राश्रमे मारीचं प्रति किमर्थं मन्त्र्यवधं करोषीति पृष्टे ममायं धर्म इति तेनोत्तरिते धर्मोऽस्ति सत्यं तव राक्षसा
पमन्यो व्यतिस्ते तु ममापि धर्मः ब्रह्मद्विषस्ते प्रतिहन्मि येनेति भट्टिकाव्यस्य रामवाक्ये तव धर्मो राम मान्यो धर्मस्तथा
रूपो व्यत्यासेन भवति येन धर्मेण त्वत्सम्बन्धिनो निहन्मीत्यर्थके एकवचनदर्शनान्न दोषः अथारम्भत्वकर्म्मः
कौर्य्यं मम पि भवति मद्धर्म्मोऽस्कौर्य्यं त्वपि वर्त्तमानसामीप्ये लट् रामबाणपातेन समुद्रसमीपे पतितो मारी
चस्तपश्चचारेति रामायणे प्रसिद्धम् अन्यसम्बन्धिक्रियामितरः करोति इतरसम्बन्धिनीमन्य इति कर्म्मव्यतिहा
रसम्भवादिति जयमङ्गला व्यतिसे इत्यस्य हे चैत्र मैत्रेण सह व्यस्तो भवसीत्यर्थः यद्देशे मैत्रः सत्तातद्देशे चैत्रस्य
त्व

सायदेशे चैत्रसत्ता तद्देशे च मैत्रस्य सेति फलतीति यद्यपि व्यपदेशिवद्भावेनैकाच्त्वादेरिवास्याप्यशास्त्रीयस्याप्यतिदेशो वक्तुं
शक्यः रामेष्वित्यादौ तु असहायत्वाभावान्न तत्प्रवृत्तिस्तथापि पूर्वपक्ष्युक्तम् अस्तु पेत्यादि समाधातुमुपक्रमते नवयमित्यादि
नामसिद्धान्तादिति स्त्रिङन्तमित्यत्र यस्मात्प्रत्ययविधिरित्यनुवर्त्तेरिति भावः अत्र हृतेप्येकादेशे एकदेशविकृतन्याये
नोक्तरीत्या मान्तस्य प्रकृतित्वात् ओःत्वस्य परादिवद्भावेन स्त्वान्तदन्तत्वेन पदत्वसिद्धिरिति सिद्धान्तारमविस्तरचितम्
इदन्त्वानतादिवत्स्त्रे भाष्ये स्पष्टम् तत्र हि वक्षे इत्यादौ परादिवत्त्वेनैकारस्य स्त्वमाश्रित्य पदत्वं साधितम् अनुपयोगा
देति चेन्न सहायव्यपदेशिवद्भावाप्रवृत्त्या तत्सन्निधाने तेषां पदत्वं नास्तीति सूचितम् आयन्तावत्स्त्रस्य भाष्ये तैकपुत्रा
दिदृष्टान्तबलेन तथैवाभावादिति दिक् तद्गुणसंविज्ञान इति तस्यान्यपदार्थस्य गुणा विशेषणानि संविज्ञायन्ते कार
र्यित्वादिना यत्रेत्यर्थः प्रायः संयोगसमवायान्यतरसम्बन्धेन सम्बन्धी यत्रान्यपदार्थस्तत्र तद्गुणत्वम् तदतिरिक्तस्व
स्वामिभावादिसम्बन्धेन सम्बन्धिनस्त्वतद्गुणत्वम् नागयज्ञोपवीती भोज्यतामित्यादौ यज्ञोपवीतस्य कार्यित्वाभावेपि
तत्सन्निहितत्वमस्त्येवेति तद्गुणत्वमेवेति हरिग्रन्थे स्पष्टम् नैतानीत्रेति न च सर्वनाम्नो विहितत्वाभावः तदन्तसञ्ज्ञाभा
वे द्वन्द्वे चेत्यादीनामवयवसञ्ज्ञानिषेधकत्वेन विहितविशेषणे फलाभावादिति भावः तथिलेति अवयवसर्वनाम
त्वेन तु न निर्वाहः सर्वनामप्रकृतिकसप्तम्याद्यन्तत्वाभावादिति भावः भाष्यप्रयोग इति दिङ्नामान्यन्तराले दक्षिणो
त्तराभ्यामिति सूत्रस्य शेषः एवम् नित्यद्विवचनान्तत्वे स्वाङ्गशिटामित्याद्युदात्तत्वन्तु न फलम् उभे मध्ये इत्यादावन्तो
दात्तपाठेन गणेऽन्तोदात्तनिपातनात् बह्वादित्वेन तत्सिद्धेश्चेति भावः प्रायदर्शनमिति प्रायग्रहणादसर्वनाम्न इदंशभा ३९
तिरिक्तसर्वनाम्नः प्रथमाद्वितीये न स्तः इत्यर्थकल्पनसम्भवात् सर्वनामत्वे सदोषः अपचस्यादिति अत्रापि स्यादिति

वत्सत्रस्यभाष्यरीत्याप्रत्ययान्तरत्वमितिभावः निर्देशेनचेति वृत्तिविषयेइत्यनुक्त्वेदमेववक्तव्यमितिभावः अन्याभाव
इति अन्येषांसर्वनामकार्याणामभावइत्यर्थः पूर्वपक्षिणोऽन्तवद्भावविरहादितिवदतैकदेशविकृतन्यायोऽशास्त्रीयविका
रविषयोपीतितेनाभ्युपेतमितितदनुसारेणैवसमाधिमवक्तुमुपक्रमते तथापीत्यादि उभयशब्दादिति अत्यन्तस्वार्थिकानां
सवुत्पत्तेः पूर्वमेवान्तरङ्गत्वादुत्पत्तेरुभयघटितउभयशब्दादितिबोध्यम् यत्रलुकापहृतंतत्रापजितितिनुनोक्तं प्राति तिपदि
कप्रकृतिकाचारक्विबन्तेपञ्चजिष्यते तदातस्यानापत्तेः तत्रोत्पत्तेरभावेनविशिष्टाभावतः लुकानापहृतमिति लुकहृताप
हारसम्भावनाभावविदित्यर्थः एतेनोभशब्दस्यपाठाभावेऽसर्वनामत्वेनतदन्तत्वादिविवक्षायाःकर्त्तुमशक्यत्वेनद्विवच
नस्यैवलुकानपहारस्यैवसत्त्वेनततोयजनापत्तावुभयत्रेत्यसिद्धिरित्यपास्तम् यद्यपच्चूस्यात्तदात्वत्वादिस्यात्तस्मिंश्चलुग
पिस्यादितिलुकापहारसम्भावनासत्त्वेनलुकहृतापहारसम्भावनाभावतोऽन्यत्वात् एवंचिभाष्यइति स्वार्थिकत्वेनोभ
शब्दात्परस्यकप्रत्ययस्यापिद्विवचनत्वमस्तीत्यन्वयः अधिकेति सङ्ख्येयापाधिकलिङ्गकारकेत्यर्थः कैयटेनावतारित व्या
मिति उभयोऽन्यत्रेतिवार्त्तिकेउभयोमणिरुभयेदेवमनुष्याइतिभाष्यकृतोदाहरणात् स्वार्थिकोपक्रमेणतत्त्वत्वत्वे
स्त्वोभयोरपिग्रहणमितितस्यद्विवचनाभावोऽनभिधानादावश्यकमितितद्भावः इतिभावइति इत्यभिमानइत्यर्थः
तद्बीजन्तूक्तम् अनन्वयापत्तेरिति तेनहिवाक्यशेषेणकृष्णस्यसम्बोध्यत्वावगत्यासम्बोध्यस्यचयुष्मदर्थत्वेनान
न्वयइतिभावः विवक्तामवक्तमितिचानन्वितमितिबोध्यम् अनपसत्वइत्येकश्रुत्योदात्तानुदात्तयोर्निर्देशइतिबोध्य
म् आमन्त्रणादिति पुंशब्देनस्त्रीत्वविशिष्टस्यैवबोधनेनतादृशार्थस्यविशेष्यत्वेएवतत्प्रवृत्तेः अतएवभाष्ये

ल० शा० र० न्तरायामितित्रियांसत्रम्यामेवोदाहृतमितिभावः केवलेइति असहायेइत्यर्थः स्वाभिधेयापेक्षावधीतिसमस्तया
ऽभ्याचष्टे स्वस्येत्यादि अपेक्षेतिकर्म्मणिघञ् व्यवस्थायामेवेति पूर्व्वादिशब्दैरेकस्यामेवदिशिउपाधिकृतभेदस्यप्रति
५० पादनम् उपाधिश्चपृथ्वीमध्यं तत्प्रान्तवर्त्तिनश्चत्वारःपर्व्वताश्चरामायणलोकिकिष्किन्धापांप्रकग्रीवेणमध्यदेशाव
धिकस्यैवदिग्विभागस्योक्तेः पृथ्वीमध्यञ्चमध्याह्नसूर्य्यसंयोगिदेशः एवञ्चतन्मध्यभागावधिकोदयाचलादिप
र्य्यन्तदेशरूपोपाधिविशिष्टदिशिपूर्व्वादिशब्दानांतत्तच्छब्दप्रवृत्तिनिमित्तीकृत्यप्रवृत्तिरित्युपाध्यन्तर्गततया व्यवस्था
स्यैव उदयाचलपर्य्यन्तरूपोपाधेस्तदभिधेयस्यतदाकाङ्क्षत्वञ्चास्त्येव मध्याह्नसूर्य्यसंयोगिदेशात्तत्संमुखदेशउ
दक् तस्यदेशस्यदक्षिणा मध्याह्नेसूर्य्यस्योदयाचलसन्निहितत्वादिप्रवृत्तिनिमित्तमित्यादिबोध्यम् आधुनिक
संकेताहीति असम्भ्रापदसामर्थ्यात् अन्यथासर्व्वादीनांकेवलरूढत्वेनाऽऽदिपदानामिवरूढत्वरूपसम्भावत्वस्य
सर्व्वत्रसत्वात्तदसङ्गतिःस्फुटैवेतिभावः व्यत्याविति कैयटादीत्यर्थः आधुनिकसंकेताभावादिति किन्नैवस्वाएवेति
भावः यदितत्रोत्कर्षस्यावधिसापेक्षत्वाद्व्यवस्थास्तीत्याग्रहस्तदाप्रत्युदाहरणान्तरमाह अधरेइत्यादि अत्रापिसम्भा
त्वंमत्वाह उत्तरेचेत्यादि उपचारादिति तत्त्वारोपादितिभावः अर्थान्तरसंक्रमइति स्वार्थविशिष्टार्थान्तरबोधकत्वमि
त्यर्थः इदञ्चभिंतस्यचतत्प्रत्ययादितिसूत्रेभाष्येध्वनितम् मेवार्थइति देशवदयमपितच्छब्दकइत्यर्थः तुल्यन्यायादेतच
च्छब्दस्यापिकैयटोक्तार्थः शक्यइतिध्वनितम् सुमेरुमिति हिमवानवधिरितियेकेचनहिमवन्तम्परेणजनपदाउत्तरकु
रवउत्तरमद्राइतिऐतरेयब्राह्मणेलोप्यपते उत्तराइत्यस्यतन्नामानाइत्यर्थस्तदाह आधुनिकेति उत्तराःकुरवोदक्षिणान् । ५०
कुरून्नपेक्ष्योत्तराइत्युच्यन्तेइतिकपिञ्जलाधिकरणेशाबरभाष्येउक्तम् हेमचन्द्रइति कोशयोरविरोधेसम्भवतिविरो

धीनत्वाप्त्य इति भावः यदि तु एवमन्वये स्वो ज्ञातावात्मनि धने त्वस्त्री आत्मीयके त्रिष्विति पाठे नैव सिद्धेस्त्रिः स्वयहतावेव
प्र्यापत्तेः वन्धुकवन्धुर्भवदेतदस्यामुखेन्दुनानेन सहोज्झिहाना रागाश्रिया शैशवयौवनीयां स्वमाह सन्ध्यामधरोष्ठ
लेवेति श्रीहर्षश्लोके आत्मानमित्यर्थे कस्त्वमित्यस्य वन्धुर्भवदिति विशेषणे न च नपुंसकत्वमस्तीत्युच्यते तदर्थस्कमे
दिन्याः प्रामाण्यात्सुस्तिङ्गोप्यस्य वेति स्वस्वाद् तु दाहरणं न सम्भवतीति प्राचीनोक्तिरसङ्गः तैवेति धनपर्याह विवर
णं सम्यगेवेति एतदर्थमेवेति एतदर्थमपीत्यर्थः धनत्वेनात्मीयस्य बोधे माभूदित्यर्थः अत्रेत्यपि बोध्यम् आत्मीयाख्याया
मिति तु नोक्तं लाघवाभावात् वाच्यश्चेति उक्तवहिर्देशस्यामित्यर्थः उपसंख्यानशब्दोपीति एवञ्चतद्गृहणं बहिर्भ्यो
गस्य गृहे ष्वेव प्रसिद्धमाश्रित्य कृतमिति भावः महत्त्वाघवमिति त्रिस्त्रभ्याधनसाधारण्येभीभाव एव विकल्पविधानात्
व्यवस्थायामित्यादिगणेष्वेव विशेषणमिति भावः वक्ष्यमाणत्वादिति एकदाइतिवहुव्रीहेरभिधानेपि तत्रैकद्यन्य
तरादित्यर्थाद् उपसर्जनत्वमेव समासान्ते कृते विशिष्टस्य सर्वनामत्वाभावाच्च समासान्तानामुत्तरपदावयवत्वं न तु ने
त्युक्तम् चिकीर्षित इति अध्याहारलभ्यमेतत् एतदर्थमेव न वहुव्रीहाविति वक्तव्ये वहुव्रीहावितिगुरुनिर्देश इति भावः
बिनाभोत्सुवत्वादिति यद्यप्यलौकिके एकार्थीभावस्यारोपोस्ति तथापि तत्र स्वार्थविशिष्टार्थान्तरबोधकत्वरूपोप
सर्जनत्वाभावादेवमुक्तम् अनित्यत्वादिति अतएवातिभवकानित्यादिसिद्धिः वस्तुतः सोभाष्यानुक्तत्वान्नास्त्येवेति बो
ध्यम् सतु कयहतामिति घ्योः प्रत्ययइति सूत्रेऽप्रेष्टत्वाद्यावन्तरङ्गत्वाज्जातस्य तु को निवर्त्तयेत तल्लिप्यते सतु कानिर्देशा सा
मर्थ्याच्च नान्यस्य प्रशः वाक्यादि प्रकृतिकक्विवन्तादेस्तु अप्रयुक्तेन लक्षणाविषयतयैव नेत्यादि भाष्ये स्पष्टम् तत्त्वाभि

लै०श्री०र०

५१

षास त्वेहि श्रादेशो निमित्तविनाशेन ह्र्स्वन्तदवत्तिरेवेति सव्यर्थ एव स्यादिति भावः प्रकृतिप्रत्ययापत्तीति कं संघात
पतीत्यादौ हृल्लुकि तन्निमित्तकार्यानिवृत्तये क्रियमाणमाख्यानाकृतं तत्तदा च षे रुल्लुक् प्रकृतिप्रत्ययापत्तिश्चेति।
प३ वचनमिर्थः अत्रेदश्चिन्त्यम् लुकमपि प्रत्ययलक्षणसत्त्वात् एणारेनेपरत्यादाविवाकृतव्यूहपरिभाषया अत्राप्रा
प्तिः नलुमतेति निषेधस्य प्रत्ययेपरतोजायमानह्र्स्वकार्य्य एवेति स्पष्टमेव तस्मात्पुष्यपोगं जानाति पुष्येणयोजयती
त्येतत्साधके पुष्ययोगेत्यीतिवचने भाष्यकृत् कृतप्रत्यापत्त्यनुवृत्तिर्ज्ञापिका तत्र हि च मे गरिति घिति परतः कुत्वमिति।
भाष्यकारोत्यैवेति अकचत्वरे तु कर्त्तव्ये प्रत्यङ्ङ्‌ मुक्तसंप्रायाविति च तदुक्तिः एतदेवाभिप्रेत्याधिन्विकृण्वोरितिसूत्रेकि
मर्थमत्वविधीयते बलोप एवास्तु इत्याशङ्क्याह उपस्य स्थानिवत्त्वेन गुणाभावापत्तेः नवस्तोपेपिनधात्विति
गुणनिषेधः सिद्ध इति वाच्यम् तत्र त्याख्याने गुणप्राप्तेरित्युक्तम् अत एव सूत्रमतात्पत्याख्यानवादिमतं प्रबलमिति प्रत्या
ख्यानवादिसंमतलक्ष्यमेव कथञ्चित्सूत्रमते साध्यम् न तु विपरीतं सति संभवे ऽन्यथा सूत्रमत प्रमाणमेवेति च प्रत्या(
ननु सूत्रकारवचसोऽप्रामा ख्यानं सूत्रसंमतमिति ध्वनितम् सूत्रकृत्वग्रिति प्राचीनरूपिवाख्यानामप्रामाण्यवत्सूत्रकारवचः खलु न प्रवृत्त
ण्यकल्पनाकथमिति चेत् भाष्यवार्त्तिकवचनैस्त्वदं प्रोत्सूत्रकारवचसोप्यप्रामाण्यकल्पनैवोचितेदिक् किमिति बहुव्रीहौनेत्यस्य द्वेधा व्याख्या प्राचीनमतेऽप्राचीनं प्र
तत्राह सूत्रकृदिति ०६ नसंभवादिति भावः उक्तरायन्येति न्यासकारस्यापि सूत्रलभ्यार्थप्रतिपादनएवतात्पर्यादिति भावः प्राप्तेरिति प्रा कारायति बहुव्रीहाविति०
प्तेरभावो निषेधो व्यर्थ एवेति भावः अतएवेति अवयवानामुपसर्जनत्वेन सर्वादिवत्तिर्भावादेवेत्यर्थः अन्वर्थेति
सर्वेषां नामेत्येवं रूपेत्यर्थः तत्वार्थ इति सोनुचितोऽन्यथ्यैस अपागोरणमात्रे तदप्रवृत्तेस्तत्सम्मतत्वादिति शेषः सूत्रे ५१
त्यादि तन्मतेत्वनर्थत्वेन वार्त्तिकमते तु वचनेनेतार्थः स्वोक्तार्थे न्यासकृ ज्जन्यसम्मतमाह न्यासकृतापीति अनपेत

मेवेति समुदाये एकार्थीभावाङ्गीकारेण समुदायस्यान्यपदार्थोपसर्जनत्वे विग्रहवाक्यस्य तत्त्वमानाभाव इत्यभिमानः व्या
हत इति अजहत्स्वार्थायामप्यवयवार्थस्यान्यपदार्थविशेषणतयैवोपस्थित्योपसर्जनत्वात् तेनेतरार्थविशेषणत्वेनो
पस्थितविषयत्वस्यैवोपसर्जनपदार्थत्वादिति भावः सर्वशब्दस्येति उत्तरपदभूतस्यापीत्यर्थः युक्तिमदिति नचोत्तर
पदे लक्षणा पूर्वपदन्तात्पर्यग्राहकमिति वाच्यम् तन्मते पूर्वपदं निरर्थकं स्वार्थप्रतिपादकम्वा नाद्यः नैरर्थक्येन
सर्वार्थकत्वाभावादेवाप्राप्तेः नान्त्यः पूर्वपदार्थे विशेषणान्वयापत्तेः विनिगमनाविरहेणापदद्वयेपि लक्षणौ
चित्याच्च एकार्थीभाववादिमित्तयावत्कुमशक्यत्वाच्च एवन्तद्घटकावयवानां सर्वनामत्वाभाव एवोचित इति दि
क् स्वोक्तेति एतत्प्रकरणस्थ इत्यर्थः त्वयकेति तेरप्यलौकिक एव निषेधस्योक्तेरिति भावः अर्थान्तरोपसङ्क्रमे सति
गतेति तेनातिसर्वायेत्यादौ न दोषः पुनस्सञ्ज्ञा तु दुर्लभा सञ्ज्ञोपसर्जनानां निषेधात् पाठात्पर्युदासेन तदन्तग्रह
णेनाविनसञ्ज्ञा अर्थान्तरसंक्रमात्पूर्वन्तु स्थैभावस्य न प्रवृत्तिः अकच्प्रवृत्तिस्तु ततः प्रागस्त्येवेति तन्निवृत्त्यर्थ इदं स
त्रमित्यभिमानः गच्छत्विति निमित्तापायपरिभाषयेति भावः दुर्लभेति उपसर्जननिषेधादिति भावः इत्यर्थ इति।
अनङ्कार्यत्वेनेत्यस्यार्थ इति भावः क्लिष्टमिति तत्पनुस्वपदमेव न्यासग्रन्थासङ्गतिमुपपादयन् अनङ्कार्य
त्वेनेत्यस्यैवैपर्य्यमुपपादयति तस्मादिति विशेषविषयत्वादिति अन्यपदार्थविशेषणत्वादित्यर्थः समुदायोहीति।
तस्यैव तद्विशेषणत्वमित्यभिमानः अनन्तरयोरिति त्वत्कपितृकमत्कपितृकयोरित्यर्थः अङ्गसञ्ज्ञानपेक्षत्वमेवा
र्थ इति एवञ्चानुपदोक्तेपदपीतिपक्षे कप्रत्ययापवाद त्वस्याकच्चिप्रसिद्धत्वादेवं वक्तरीत्यानुक्तिर्व्यर्थेति बोध्यम्॰
इत्यादिवदतेति वृत्तिग्रन्थव्याख्यावसर इति शेषः प्रतिपदोक्तत्वादिति यदन्ततमादापसर्वनामत्वप्राप्तिस्तमुच्चार्य्यविहि

ल०प्रा०द० तत्वात् वाक्यमपि तत्सम्बन्धेव प्रत्यासत्तेरिति भावः तेनेकरोतिद्वारा सामर्थ्यं मासेन कृताय पूर्वस्मै मासपूर्वस्मै इति समा
५२ सेतत्सम्बन्धिनि वाक्ये च न तत्र वाक्यस्य प्रतिपादोक्तः समाससम्बन्धिन एव यथहलोपफलान्तरमप्याह त्वयकेति ततीयास
मासमात्रस्य यत्तेहि तद्दर्शं हि वाक्ये पत्रकाविस्थितस्य सर्वादेः सञ्ज्ञानेत्यर्थः आपिस्यादिति भावः न्यायत्वाद्वेति किं
च्चावयवमात्रनिषेधे प्रयोजनं सर्वनामाव्ययसञ्ज्ञावामिति येन विधिरिति सूत्रस्य भाष्यप्रामाण्येन तदन्तस्य सञ्ज्ञाया
म्बलीयस्त्वमेतरागामिति भाष्यप्रयोगानुपपत्तिः नमत्र सर्वार्थवाचकत्वं नास्तीति वक्तुं शक्यम् नानाभावात् लोकव्यु
त्पत्तिसिद्धस्य तस्यानेन निषेद्धुमशक्यत्वात् नापितस्य सर्वादिपाठे निषिध्यते इति युक्तम् तस्या विधेयत्वात् तदेव ध्वनय
न्नाह फलं सत्वचामिति द्वन्द्वावयवमात्रे स्कन्दरादिविशेषणान्वयाभाववत्कुत्सादिविवक्षा वा अभावः समुदाये तु तद्वि
वक्षायां समुदायोत्तर प्रत्ययेन तदुक्तेर्नावयवात्तदुत्पत्तिरिति चिन्त्यमेतत् समुदायनिषेधे तु द्वन्द्वस्य सञ्ज्ञेत्योधिकरणा
त्वविवक्षायां सप्तमीबोध्या यथा इयं सप्तमी प्रथमार्थे अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्मुक्तसंशयाविति भाष्योक्ते तत्प्रकर
णाविषयस्य त्वन्तरेणात द्विषयन बहुव्रीहावित्येतत्साहचर्येण वा एतत्प्रकरणस्थ सप्तमीनिर्देशानां तदर्थकत्वौचित्यात्०
किञ्च विभाषा जसीत्यनेन फलाभावादनेन निषेधाभावे तत्साहचर्यत्वाधिकारानुरोधेन च द्वन्द्वे चेत्यस्याप्यवयव
निषेधकत्वाभावः एतेन सप्तमीनिर्देशसामर्थ्याद्बहुलस्य संस्कारानुरोधात् विद्यमानानीत्यध्याहारेण समुदायस्या
वयवानां चायं निषेधः तत्र समुदायस्य व्यपदेशिवद्भावेन निषेधः आधाराधेयभावे पि व्यपदेशिवद्भावस्यानुमत
त्वात् तुल्यास्यप्रत्ययस्यादित्यादिसूत्रस्य भाष्याद्दोस्पष्टत्वात् तत्फलञ्च बलीयस्त्वमेतरागामित्यादाव वयसर्वेना
मत्वप्रयुक्तोपि नाकजित्यपास्तम् इताक शब्देन समासेति भवकामित्यादावित तच्च वरणस्य दुर्वारत्वेन तन्निषेधे फला ५२
भावाच्चेतिदिक् व्याचष्टेति समुदायात्यान्नस्येति शेषः यद्यपीति जसीत्याधार सप्तमीति भावः जसश्रीति इकारेणाई

कारग्रहणम्बोध्यम् प्रत्याख्यायेति प्रत्याख्यानेन चेदं ध्वन्यते वक्ष्यमाणक्लेशपरिहारार्थ एवेकारो न तु फलानादेशि
निवेष्टव्यमिति आद्यादेशोत्वदितिच्छेद एव सूत्रतात्पर्य्यमिति तेचेति येन निमित्तेनोपात्तास्ते शास्त्रभक्ता इत्यर्थः अ
नुरूपानिति स्वार्थबोधनसमर्थान् स्वसदृशावर्णान्वेतश्चेत्यर्थः अनुवर्त्तत इति अस्येति प्रागुक्तइति शेषः ज्ञापका
दिति तन्निवृत्तेरिति भावः अत एव भाष्ये तदनुवृत्तिर्नोक्ता तथा सतीति प्राचीनसम्मतव्याख्यादरे इत्यर्थः भस्येत्यने
नेति अङ्गस्येत्यनेन सहितेनेत्यर्थः एतेन भत्वस्य वृद्धलोपप्रत्ययवत्त्वस्वरशब्दयोर विधानात्तेन नप्रत्ययाक्षेप इत्यपास्तम्
अङ्गाच्चेति अधिकारलब्धमिति भावः ननु भत्वस्य तत्र सूत्रे यस्मात्प्रत्ययविधिरित्यनुवृत्त्याङ्गनिष्ठत्वेन तेनाङ्गनिष्ठप
जादिपरत्वाक्षेपेण तदव्यवस्थितत्वाल्लाभः किञ्चानो विशेषणे विधिपरिभाषोपतिष्ठते नानुवाद इति निर्दिष्टपरि
भाषानुपस्थितेरनस्तल्लेत्यादौ दोषो दुर्वार इति चेत्तत्राह एतच्चेति तथा च भाष्यम् एवन्तर्हि कार्य्यकाले सञ्ज्ञापरि
भाषं यत्र कार्य्यन्तत्रोपस्थितमिदं द्रष्टव्यम् भस्येति उपस्थितमिदं भवति यचि भमिति तत्र यजादिपरतयानकारं
विशेषयिष्यामः अनामकारं यजादिस्वादिपरस्यानो नकारस्येति तस्यायम्भावः कार्य्यकालपक्षे भस्येति श्रुते भ
पदार्थजिज्ञासायां यचि भमित्युपस्थितेन प्राक्क्रियहेवृत्ते एतद्वाक्यार्थबोधकाले लक्ष्यानुरोधेन तत्र आदिन्यायाश्रय
णादगृहीतस्यान्विशेषणतापि विधौ परिभाषेति न्यायपक्ष इको गुणवृद्धी अचश्चेति व्यतिरिक्तेनास्त्येव उदात्तस्वरि
तयोर्यणहस्त्वादावुदात्तस्वरितस्थानिकयणः इत्यर्थस्येष्टत्वादिति एतच्च स्त्रीप्रत्यये इत्वप्रकरणे निरूपयिष्यामः
सामर्थ्यादिति निमित्तनिमित्तयोरपदस्ययोरसम्भवादिति भावः अखण्डमिति तच्च निमित्तानधिकरणानि
मित्तिमत्पदाघटितत्वम् तेन मातृभोगीणइत्यत्र णत्वसिद्धिः केवलभोगीनेत्यस्य प्रत्ययमात्रस्य वालोके अर्थबोधक
त्वाभावात्।

ल० श० र० अत एवात्मन् विश्वजनेति सूत्रस्थमाचार्य्यादणत्वञ्चेति चरितार्थम् रूपर्वणेत्यादिसिद्धये निमित्तानधिकरणेति पद
४३ स्यात्र लोके विभक्तीतराणपेक्षतयार्थबोधकत्वेन इष्टम् तेन गन्धर्वगानमित्यादौ स्फुटत्वत्तेः प्राक् समासेपि णत्वं न
षड्भ्यादिषु ननमनशब्दस्य संज्ञाभूतोऽरवलड् इति तस्य ऋवर्णात्परस्य णत्वेत्रापतोक्ता भाष्योक्तानासङ्गेत्याहुः म
लड् इति तद्विशेष इत्यर्थः वेभिदितेति वेभिद्यतेर्यङन्तात्तृचि अल्लोपयलोपयोरेकाच उपदेश इति निषेधादिट् न स्यात्
पञ्चमीसमासे त्वल्लोपस्य स्थानिवत्त्वान्निषेधाप्रवृत्तिरिति भावः एवमितरयोः कादेशानुसारभावो बोध्यः विहित
विशेषणेनेति एवञ्चास्य स्थानिवत्त्वं विनापि तदप्रवृत्तिः सिद्धेति भावः विहितविशेषणत्वञ्चास्यैकाचोद्वे इत्यत्र भाष्यध्व
नितम् तत्र हि यङ्लोपे वेभिदितेत्यत्र यङन्तात्तृचि इट्प्रतिषेधमाशङ्क्यैकाचोऽग्रहणादिति व्याख्यानेन परिहृतम् तदा
ख्यस्य यथाश्रुतत्वे विभित्सतीत्यादौ दोषवारणायोपदेशग्रहणस्यैकाजंशेपि सम्बन्धे वेभिदितेत्यादावपि परिहारासम्भ
वेन तस्य विहितविशेषणत्वे तात्पर्य्यमावश्यकम् प्रत्ययविधानावधेरेव प्रापणाङ्कृत्वादङ्गादित्यनेनेदं सूचितम् वि
हितविशेषणेनैव विभित्सतीत्यादावदोषेणैकाजंशे उपदेशग्रहणासम्बन्ध इति तदाशयः न भविष्यतीति स्थानि
वत्त्वम्विनापीति शेषः अ ल्विधित्वादिति ठस्येक इत्यत्र स्थानिनि प्रत्ययेषु चर्वर्णे त्राकारो न विवक्षित आदेश एव
विवक्षितः अन्यथानिषादकर्ष्वशब्दादेर्देश इति ठञि व्यञ्जनमात्रस्य व्यञ्जनात्मकादेशे कशब्दस्य लाक्षणिकत्वा
केण इति कृत्वानापत्तिरिति भावः स्थान्यादेशयोरिति इकारादेशस्थानिभूतप्रत्यये आदेशं विधाय केसत्वे ठस्येक इत्य
त्र चेत्यर्थः स्पष्टञ्चेदं ठस्येक इत्यत्र भाष्यकैयटयोः इदमुपलक्षणं सन्निपातपरिभाषयापि कादेशवारणं बोध्यम् ४३
स्पष्टञ्चेदं ठकपसोश्चेति वार्त्तिकभाष्ये वलीपस्थादिति एतच्च यस्य विभाषा वित्तो भोगेति सूत्रस्य कैयटे स्पष्टम्॰

एतत्सर्वमपरविधाविति तु वक्तव्यमिति वार्त्तिकस्य कैयटानुरोधेन दिगिति दिगर्थस्तु एतदर्थं पञ्चमीसमासस्या
वश्यकत्वमिति तथाहि परसाहचर्य्यस्य बलवत्त्वे मानाभावः विप्रतिषेधसूत्रे कार्य्यशब्देन शास्त्रीयस्यैव ग्रहीतु
मौचित्येनात्र तदप्रवृत्तेः नित्यः परयणादेशः परश्चासौ व्यवस्थया युगपत्सम्भवो नास्ति बहिरङ्गे णत्वं सिध्यतीत्यन्तः
परस्मिन्निति सूत्रभाष्योक्तरीत्या पूर्वसाहचर्यस्यान्तरङ्गत्वेन तस्यैव ग्रहीतुमौचित्याच्च विभाषा ग्रामहनविदविशामित्यत्र लु
ग्विकरणपरिभाषानुग्रहाय परसाहचर्य्याश्रयणं तु दविदोतन्द्रेत्याद्यप्यन्तरङ्गपरिभाषानित्यत्वाख्याख्यानेन परसाहच
र्य्याश्रयणमिति बोध्यम् प्रत्यैविषन्नित्यादौ लङि उभे अभ्यस्तमिति सूत्रस्थभाष्यसम्मते एवमपि दोषाच्च पूर्वोत्तरसाह
चर्य्येणाभावदेशानपहृतविकरणाभ्यस्तस्यैव ग्रहणमित्यात श्लिष्टन्ततो वरम्पञ्चमीसमास एव अपरविधाविति
तु वक्तव्यमिति न्यासान्तरेऽपि पञ्चमीसमासो वक्तुं प्राप्तः न्यासान्तरन्तु घविधेरविसङ्गतायेति स्पष्टमेव अतिप्रसङ्ग
स्त्वनित्यत्वेन परिहरणीय इति दिक् चक्षत्रेति तस्मिस्मिन्यांत्यन्ताभ्यां क्विपि लोपाभावोऽपि फलम् निगाल्यते इति नात्र
णिलोपात्पूर्वं लत्वम् सपादसप्ताध्यायीस्थकार्य्यस्य प्रवृत्तियोग्यतया तदप्रवृत्तेः नचस्थानिवत्त्वेनाल्विधित्वात् प्रत्यय
लक्षणान्नुनियमार्थमिति भावः अत्र बहिरङ्गासिद्धत्व... माजानन्तर्य्ये तन्नि... त्रिपाद्यां तदप्रवृत्तिरेव विसर्जनी धा
परत्रस्य भाष्यसम्मतत्वाच्चेत्यन्यत्र प्रपञ्चितम् एवं ज्ञायते इत्यपायताविस्योपसर्गविशेषणत्वे फलम् माषवपनी
ति इह ङीवृत्पत्तेः प्राक् समासे ङीविधेः सोपेक्षसमासरूपप्रातिपदिकान्तस्य तेन णत्वविधानात्तस्यापि पूर्वं परोभयसा
पेक्षत्वेन समासत्वज्ञानसापेक्षत्वेन च समत्वात्त्रिपादीस्थत्वाच्च न बहिरङ्गत्वं प्राप्नोत्रेति बोध्यम् अप्रवृत्तिरिति अ

मिप्रतिशेषः सापेक्षत्वेनेति नलोपइत्येतद्विषयमिदम् अन्त्येत्याह पदविशेषणत्वाच्चेति व्यधिकरणषष्ठीति
आदि पदिकस्यपदस्येत्यनयोः परस्परानन्वितयोरन्तेनान्वयादितिभावः अभेदेनैवेति सम्बन्धान्तरासत्त्वेपिविशे
ष्यविशेषणभावसम्बन्धेत्यर्थः शक्यमकर्त्तुमिति पदस्येत्यस्यक्वचिद्वैयधिकरण्येनान्वयेऽस्यतात्पर्य्यग्राहकत्वम्
भाष्येउक्तं तत्तुलक्ष्यानुसारिव्याख्यानादेवज्ञापकं विनापिसिद्धमित्यभिमानः भत्वासम्भवादिति सर्वनामस्थानत्वेने
तिभावः समाहारद्वन्द्वस्येति प्राणपञ्चत्वात्कृतसमासान्तद्वन्द्वस्यककुद्दोः शब्दस्येत्यर्थः स्रुपोजम् दोः शब्दस्यपुंस्त्वेपि
स्कनिर्द्देहम् न्याय्यमिति अल्पाच्तरत्वेनदोःशब्दस्यद्वन्द्वे पूर्वनिपातापत्तेः किञ्च तदन्तेऽऽदेशोउदन्तेभः विशे
ष्यासन्निधानादितिभावः ककुदएकत्वमिति प्रकरणाच्छ्रुतौ तत्प्राथम्यमेवेदमितिभावः दक्षिणान्तमुद्यम्यदोर्भ्याम्
मानिशाचरइत्यन्वयमत्रमवारणायाह तत्रेति एकदेशिसमासइति तस्य त्याख्यानेतुकर्मधारयइतिबोध्यम् नहा
तीति हाइति शोकव्यञ्जकंशब्दमित्यादि नुमप्याप्त्विति अयम्भावः तत्रेणनाभावेनकारेचकार्य्येतस्प्रतिस्त्रन्यस्प्रति
चकृतेचकार्य्यान्तरम्प्रतिमुभावोनासिद्धइतितदर्थः एतेनमुत्वस्यासिद्धत्वेनोनादेशोगुणेनुमादेरप्राप्तिरिति परास्तं
म् नुमप्येवाप्त्विति पाठेएवकारोऽप्यर्थः उच्चारणार्थत्वादिति तत्रेणोच्चारितेद्वितीयेनेशब्दे [illegible]
[illegible] इत्यर्थः अमुष्मैइति नमुनइतिसूत्रविषयेपूर्वस्मिविभक्तिनिमित्तकार्य्योपप्रवृत्तोमुत्वेतस्यनकारविषयेक
मपिप्रत्यसिद्धत्वाभावेनविभक्त्यादेशाम्प्रत्यसिद्धत्वेपिवास्मैभावात्परत्वेननुमापत्तेः आदिनामकुलेऽमुयोरिति
तयोरेत्वस्याप्रवृत्तेमुत्वेनुमिचानिष्टंस्पष्टमेव नमुटादेशाइतिवार्त्तिकस्यारस्येननारे शाइत्येवतदर्थउचितरत्यपि
बोध्यम् नेत्तन्त्रकइति इयमपितदुक्तिश्चिन्त्या तस्यलोपइतिसूत्रभाष्येउच्चारणार्थानामपीतसंज्ञकत्वस्यस्पष्टमुक्त

मुक्तत्वात् स्वरितत्वादर्शनादिति नन्वोतः स्वरितत्वेपि नाश्राविव्यत्रस्वरितश्रवणमश्रिशब्दस्यान्तोदात्तत्वे नैकादेशउदा
त्तेनेनोदात्तत्वादितिचेन्न वत्तावनुदात्तस्येत्यस्यतत्रानुवर्त्तितत्वात् शेषनिघातेनौकारस्वरितत्वमादायाश्रिशब्दस्यसर्वा
नुदात्तत्वाच्च स्वरितस्यतुनोदात्तपदेनग्रहणमुदात्तस्वरितयोरित्यादौस्वरितग्रहणात् उच्चारणार्थानामित्सञ्ज्ञकत्वेपि
देशेषु इकारस्यानिकचत्त्वेनिष्पन्नतकारस्यसत्त्वेनदित्वात्तदप्राप्तिः उच्चारणार्थइत्यस्यचवर्णेनारोच्चारणेमुखस्यत्वे
प्रावारणार्थेनतन्वपत्वार्थः अतएवभाष्येओकारंडितमाश्रित्यादितिप्रत्याख्यातं नहितदातित्वमत्ति नचडित्त्वविंशतो
त्तिलोपापत्तिः भाष्यप्रामाण्येनतस्यसम्यगनभिधानादितिदिक् अदिति अस्ययदपीत्यादिः दीर्घोमाभूदिति।
भिन्नकालव्यावर्त्तत्वार्थत्वात्तपरत्वस्येतिभावः नचतोविदर्थस्येतिप्रकरणेनसमासवोधइवानेनदापोविवाधइतिवा
च्यम् प्रतिपदविधानाषष्ठीनसमस्यतइतिवार्त्तिकानुरोधेनतत्रतथाकल्पनेपीहतथाकल्पनेमानाभावात् अनङ्
सिध्यतीति वैकल्पिकत्वमात्रन्तुवाचनिकमितितद्भावः सञ्ज्ञापूर्वकइत्यस्यभाष्यास्पष्टत्वादाह अङ्‌ वत्तेति इयमग
तिकगतिः सोर्डितिन्यासेलाघवाभावश्च डित्त्वसामर्थ्याट्टिलोपकल्पनेगौरवञ्चतस्माडुशनसोऽनङ् तद्वैकल्पि
कत्वंचचिन्त्यमेवभाष्यानुक्तत्वादितिप्रामाणिकाः चेतीति तस्मादित्युत्तरस्येतिजायतिविहितविशेषणासम्भवरू
पप्रापकार्थः एकदेशविकृतिन्यायेनेति स्थानिवत्त्वस्योपलक्षणमिदम् अर्द्धाधिकविकारेणप्रत्यभिज्ञाभावा
च्छिन्नपुच्छश्वदृष्टान्तमूलकन्यायस्यात्राप्राप्तेरितिवोध्यम् अप्यमानोनेतियद्यपितस्मादित्युत्तरस्येत्युक्तेः षष्ठ्य
न्ततापिसम्भवतितथापिवरुणुपदेषुविभक्तिविपरिणामकल्पनापेक्षयागन्तुकलोपप्रावेदएवार्थान्तरकल्पन

शब्देन्दुशेखर

तत्र हि तोर्लिङ्ग्युपसङ्ख्यानमिति वार्त्तिके ऽग्लोपित्वान्निषेधे प्राप्ते आरभ्यमाणे परत्वाद्ढ्लोपस्त्वं नेहाग्लोपित्वमिति पूर्व्वपक्षिणा प्राप्तिं तेऽपपदित्युतत्क
लकवद्देऽत्रौ पोवल्लीयानित्यं शेनाग्लोपीतिसूत्रस्याग्लाविषयं ज्ञापकमित्युक्ते अत्यर राजनदित्यत्र चारितार्थमाशङ्क्य एवमपि प्रत्याहारग्रहणं ज्ञापकमेवेति
सिद्धान्तितम् जातिपरनिर्द्देशेनैतन्नवैः साधितमित्यन्यत् अत्र स्वामिनमाख्यजो दुहमाख्यदित्यत्र तिङ्विचङि प्रत्याहारस्य चरितार्थं इत्याशङ्क्य व्याख्यानमिधान
माश्रित्य समाहितं कैयटेनेति स्पष्टं तत्रैव ९

ल० शा० २०

४४ ननु क्तिसीति प्रत्यये यस्मात्स विहितस्तदादेरित्युपस्थितत्वात्तस्य हलन्ताव्यय इति विशेषणमिति हलन्ताव्ययन्तात्तदादेः परस्येत्यर्थे गोपसर्जने स्त्रीप्रत्यये तदादिनियमसत्त्वात्प्रकृते ऽव्ययन्तत्वाभावेनानात्र दोष इत्यत आह अत एवेति। एतत्सिद्ध्यर्थं येन विधिरिति परिभाषया शब्दरूपविशेषणमादाय तदन्तविधौ तत्तं प्रत्ययग्रहणपरिभाषयोक्तं विशेष्यमादाय पुनस्तदन्तविधौ टिड्ढाणञिति सूत्रे ऽणन्ताणन्तादिति वदव्ययन्तान्तादित्यर्थस्यावश्यकत्वेनात्र दोषः मालेत्यादौ व्यपदेशिवद्भावेन सिद्धिरिति भावः अविद्यास्क जातः अविष्ट इत्यादौ तद्धितलुकि स्त्रीप्रत्ययलुकि प्रत्ययलक्षणेनाव्ययान्तत्वादतिव्याप्तिवारणार्थं दीर्घग्रहणमित्यपि बोध्यम् अतिव्याप्तिरिति अस्य स्त्री ईई वदस्या ईई वदत्त इत्यादावपि सेति बोध्यम् प्रत्याख्यानादिति दीर्घग्रहणेनोपस्थितत्वादीकाराकाररूपस्यैव दीर्घस्य ग्रहणाच्चेत्यपि बोध्यम् स्फुरासपतीति नचलोचङ्गीति सूत्रस्य भाष्यप्रामाण्येन रदुडुपधेभ्यो लिङ्गनास्तीति सिद्धान्तात्कथमत्र लिङिति वाच्यम् तत्रोऽप्यसत्तेषां लुङिः प्रयोगाभावकल्पनेनोपपत्तेः सर्वथा तदभावकल्पनमप्रमाणिकमित्यभिमानात् ग्रहणाच्चेति लावनुनासिकोंकारपाठाच्चेत्यपि बोध्यम् एवञ्चाप्रत्ययग्रहणं चिन्त्यप्रयोजनम् वक्तुतोगङ्गीस्कराद्
२ त्यादेरभिधाने हंमानश्चिन्त्यम् विभक्त्योरानन्तर्य्यमिति एवञ्च विभक्तिसंयोगान्तलोपस्यासिद्धत्वमाप्यत इति
तात्पर्य्यम् गोमानित्यादौ लक्ष्यभेदाद्वारम्वारं संयोगान्तलोपः नपुंसकार्थत्वादिति स्वमोरिति हि तत्र लुगिति त ४४
त्र नलोपनिषेधापावश्यकत्वादिति भावः लुकाल्लुप्त इति ङिसम्बुद्ध्योरिति सप्तमीति भावः व्यावश्यकतयाचेति।

ङोर्भसंज्ञासत्त्वादेव न नलोपः अहश्शोः प्रसक्तः न उभयसंज्ञाऽन्यत्रेति वचनात् हे राजन् हे कन्द रोसी त्यादौ तु गमकत्वाभावात्समास एव नेति डाबुत्त
पदे प्रतिषेध इत्येव वाच्यमिति स्पष्टं भाष्ये ३

ङि सम्बुद्ध्योरित्यस्य षष्ठ्यन्तत्वपक्षे विकल्पार्थमावश्यकतया चेत्यर्थः यद्यपि वा नपुंसकानामित्येव भाष्ये पठितं
सम्बुद्धिग्रहणं चासत्त्वादेव सम्बध्यत इति तदर्थं च न च चरितार्थमत एवात्र पाठे नोक्तार्थज्ञापकताऽपि सम्बुद्धिग्रहणं
भाष्ये प्रत्याख्यातमिति तु न भ्रमितव्यम् सूत्रस्य ङि ग्रहणस्य ङि सम्बुद्ध्योरनुत्तर इति वार्त्तिकस्य सम्बुद्धिग्रहणस्य
प्रत्याख्यानेऽपि सूत्रस्थस्याप्रत्याख्यानादिति भावः भाष्यमिति यदि पुनरयमेकस्य लोपः संयोगान्तलोपो विज्ञा
यते तेसुपक्रम्य तद्भाष्यं प्रवृत्तम् पूर्वान्तत्वेनेति न चैवं मुद्रावित्यादौ सन्निपातपरिभाषया ऽनाप्तेति भाष्यविरोध इ
ति वाच्यम् दीर्घप्रवृत्त्युत्तरमन्तादिवद्भावप्रवृत्तावपि टावुत्पत्तिकालिकानन्तर्यविघातस्य तेन वारयितुमशक्यत्वात् नः
अशास्त्रीयत्वात्सन्निपातस्यान्तवद्भावे नातिदेष्टुमशक्यत्वाच्च अत्रावन्तानुदिति तु नाद्य चिबोधिता पञ्चमीसमा
साश्रयेण स्यान्निबद्भावोऽस्ति अस्याभिधाने च न हि टंमानं आवन्तेभ्य आचारक्विबेव नास्ति आतो धातोरिति सूत्रस्य
भाष्यप्रामाण्यात् तत्र वार्त्तिककृता आतो नाश इत्युक्तमिति तद्बीजम् आचारक्विबन्ताद्यङ्लुक् तु नास्त्येव तेन
कस्य स्त्रीकीशब्दादिभ्य आचारक्विबन्तेभ्यो यङ्लुकि लङि अचेकेदित्यादौ ग्रन्ताद्विसंभव इत्यपास्तम् ईका
रस्य पत्वाभावाच्च उत्वमपीति अपिना पूर्वरूपम् रोरुत्व इति कर्त्तव्ये कृते चेति शेषः न मुने इतिवत् हरिव
इति हरिशब्दान्तात्क्विप् छन्दसीर इति वत्वे तु मिसंयोगान्तलोपे मतुवसोरिति रुत्वे उत्वे गुणः छेदादिति कीर्त्यते
क्विबन्तावेव नस्तो यन्तेऽर्थ्यङ्लुकि लङि ईउभावेतिश्विपोः प्रयोग एव नास्ति यथा लक्षणमप्रयुक्ते इत्यत्रैव भा
ष्योक्तेः अप्रयुक्ते लक्षणप्रवृत्त्यभावस्यैव योग्यतेति तदर्थः अनुक्तानामिदमन्वाख्यानमिति सिद्धान्तात् ०

ल०श०१० नेतिव्याख्यानमिति उपपादितंचेदं राजशब्दान्ते नलोपे कृते इति संयोगान्तलोपस्यासिद्धत्वादिति भावः नलो
पात्प्रागिति विभक्तिसंयोगान्तलोपस्य नलोपविषये सिद्धत्वाभावस्यापनद्वारे इति शेषः एतेन राजेधते चक्र
५५ त्रराजाच्छत्रमित्यादौ वृद्धियणतुगादिकं न स्यात् संयोगान्तलोपस्यासिद्धत्वात् किञ्च कर्त्रैत्यादावेकमेव पगर
शास्त्रं पूर्वापरविषयभेदाद्भिन्नमिति शब्दपरविप्रतिषेधात्परवर्णादेशाइत्यत्र च परस्मिन्नित्यत्र भाष्यकैयटयोः स्प
ष्टम् विषयगतपौर्वापर्य्यस्य लक्ष्ये आरोप इति तदाशयः तेन न्यायेन धीमानित्यादौ स्वविषयसंयोगान्तलो
पशास्त्रस्य तल्लोपविषये तत्र पूर्वत्वमिन्नासिद्धत्वेन तल्लोपो न स्यादित्यपास्तम् सावयवपदमिति पक्षे न्ते दोषाच्च
आरोपे मानाभावाच्च वक्ष्यतीति अत एव ङौ न लोपनिषेधः सार्थकस्तदाह ङाविति नच नलुमतेति निषेधान्नित्य
त्वान्न दोषः तदपेक्षतया बहिरन्ततया व्याख्यानस्यैव लघुत्वात् सम्बुद्ध्यन्तेति सम्बुद्ध्यन्तप्रातिपदिकान्तस्य न
लोपो नेत्यर्थः इति सूत्रमस्त्विति अत एव सकपीरित्यादिसिद्धिः अन्यथा पदान्तसंयोगादिलोपस्य संयोगान्तलो
पापवादत्वात्तत्र वृत्तौ र्वोरितिदीर्घो न स्यात् तिप्यनस्तेः सिपि धातो रिति सूत्राभ्यां धातुसम्बन्धिपदान्तसस्य रुत्व
दत्वविधायकाभ्यां कसाहचर्य्येण प्रकृतिप्रत्ययसम्बन्धिवर्णसंयोगमाश्रित्य सस्य पदान्ते संयोगादिलोपाप्रवृत्ति
कल्पने तु न किञ्चिद्बाधकम् किञ्च नङिसम्बुद्ध्योरिति सप्तम्येव युक्ता ङिग्रहणाच्च ननु मते त्वस्यैतद्विषये
नित्यत्वमेतादनित्यत्वमूलकमेव वा नपुंसकानामिति वार्त्तिकम् एवञ्च ब्रह्मन्नादयर्थं सम्बुद्धिग्रहणस्यावश्य ४५
कत्वेन ज्ञापकासम्भवः अपूर्ववचनकरणेन सिद्धप्रत्याख्यानेन युक्तमिदमेवाभिप्रेत्य सूत्रशेषे भाष्ये ॥६॥

तस्मादशक्यो हल्ङ्यादिरूपलोपः संयोगान्तलोपो विज्ञातुं न चेद्द्विज्ञायते द्विहल इत्यस्य ग्रहणं तिस्योश्च ग्रहणं कर्त्तव्यमित्युक्त
म् इति सूत्रमित्युपलक्षणम् हल्ङ्याप इति सिद्धे हलिति सूत्रमस्त्वित्याशयः अत एवात्विभात्यमित्यादौ हुलोपः
इति दीर्घसिद्धिरिति दिक् दीर्घाच्चेति हलन्तादित्येतदपेक्षश्चकार इति तद्व्याख्यातारः ननु तदन्तमपीति तस्याऽन्त्य
ल्समुदायरूपत्वादिति भावः अत उक्तेरिति इङ्वर्णान्तस्य ह्रस्वत्वासम्भवादिउवर्णयोरेकदेशत्वेन तद्विशेषणासम्भ
वाच्चेति भावः युक्तमिति अनङ् सावित्यत्र विभक्तिविपरिणामः कार्यः सर्वनामस्थाने इत्यस्य गोतोणिदित्यत्र प्रथ
मान्ततायाः त्वं रूपत्वान्न तन्निवृत्तिरित्यभिमानः विशेष्यासन्निधानादिति शब्दरूपविशेष्यमन्यव्यावर्त्तकम्।
किञ्च सत्यपि विशेष्ये सति शब्दभिन्नान्तस्येत्येवस्यान्न तु सख्यन्ताभिन्नस्येति न नैकार्थीभावापन्नत्वान्यत्रान्वया
योगादिति भावः तस्य प्रत्ययविधौ इति एवञ्च हरदत्तानुरोधेनेदं सर्वमिति भावः तथा द्वितीयेति तत्पुरुषविषये
बहुव्रीहिर्नैत्युपक्रम्याभयं खल्वपीष्यते सोमसखा गवां सख इति भाष्यम् अन्ये त्वाश्चाक्रोशा इत्यलुक् सङ्ख्यावा
चके इति आदिसङ्ख्याव्यापकधर्मविशेषवाचके इत्यर्थः ननु बहुत्वसङ्ख्यानियतपरिच्छेदहेतुत्वरूपसङ्ख्या
त्वस्य तत्राभावात् अत एव भाष्ये यदयमसङ्ख्यां सङ्ख्येत्याहेत्युक्तम् सङ्ख्याय तेनयेति साक्षाद्वाप्यसङ्ख्याधा
रावेत्यर्थः अत एव बहुगणसाहचर्येण सङ्ख्यासम्बन्ध्यर्थप्रतिपादकस्य ग्रहणादेव बहुवचनेति अन्यथा बव
इत्येव वदेत् अर्थप्राधान्येति षट्संज्ञके शब्दे षट्संज्ञकः शब्दस्तदर्थसङ्ख्याश्रयश्चेत्युभयमपि विवक्षितम्
तेषाम्बहुत्वादिदम्बहुवचनं तत्रार्थात्परत्वं स्वगतसङ्ख्यानुवादकत्वरूपं गौणं तदाह षडर्थेति नेन गौणेन इद

ल०श०र०

४८

स्याचामनुरोधेन षड्भ्य इति बहुवचनं तिसृभ्य इतिवत् षट्संज्ञकानाम्बहुत्वाच्च नहि सर्वत्र जातिनिर्देश एवोचित
त्वाचार्य्यशैली वा षट्शब्दस्य बहुवचनान्तस्यैव संज्ञात्वाच्च तस्मादिदम्विहितविशेषणम् परमषड्णादीनामपि
सङ्ख्याप्रकारकसङ्ख्येयविशेष्यकबोधजनकत्वेन सङ्ख्यावाचितया षट्त्वमस्त्येव लोके गणनायां प्रतिष्ठानात्
मेवेय हणमित्यत्र न मानम् उपसर्जनेत्व अतिक्रान्ताषर्ष्यप्राधान्यं न तु सङ्ख्यावा इति न दोषः स्पष्टञ्चेति सर्व्वादी
नीति सूत्रे भाष्ये इति तत्त्वम् सिद्ध इति तरणह इति सूत्रे चिनेत्यनुवर्त्यात् तरणहानीत्यादि वृत्तौ हलीत्यननुवर्त्यात् तृणे
त्यस्य सिद्धिः शास इदङि अजादौ क्ङिति चेदङ्गे वेति नियमेनाजादिव्यावृत्तौ तत्र हल्ग्रहणाकरणेन मित्रशी
रित्यस्य सिद्धेरेवमन्यत्रापीति भावः प्रत्ययस्यास्याधारणमिति इदं द्वितीयप्रत्ययग्रहणाल्लभ्यते यत्र प्रत्ययस्य विशे
ष्यत्वं तत्रैवेति नियमस्तेन राजेत्यादौ पदत्वानापत्तेः दीर्घेणेति असोऽत्तुकः स्थानिवत्त्वेनासन्तत्वे पीतिशेषः नचा
तुसाहचर्य्यात्स्वरूपमाणासन्त एव दीर्घ इति वाच्यम् तदनित्यत्वस्याप्यनेन ज्ञापनात् प्राधान्येनेति तत्त्वञ्च वर्णविशे
षणत्वरूपम् एतच्च स्थानिवदित्यनुवर्त्त्यैव सिद्धे प्रत्ययलक्षणमित्येतत्सामर्थ्याल्लब्धम् इमिति मित्रशीरित्यादौ ह
लादौ क्ङिति विधीयमानमीत्वञ्च सिध्यतीत्यपि बोध्यम् वर्णे प्राधान्येति वर्णस्य तत्त्वञ्च प्रत्ययनिरूपितविशेष्य
त्वमितराविशेषणत्वञ्च अणयोऽकार इत्याघर्चके टिहाणमित्यादौ इकोयणचीत्यादौ च तत्रान्त्यमुदाहरति तेनेति आ
पोदाहरणं तु चित्रायां जाता चित्रेत्यादावणयोऽकारस्तदन्तादिति विहितोऽणीवेति बोध्यम् न चणोहितमित्यत्र न लुमतेति ४९
निषेधः लुप्तप्रत्ययनिमित्ताङ्गहृस्वपककार्य्ये एव तेन निषेधात् अतएवौतक्रामेत्यादौ क्रमः परस्मैपदेष्विति दीर्घ

सिद्धिः परस्मैपदपरनिरूपितषष्ठिनिरूपिताङ्गस्य तेन दीर्घविधानात् तस्मिन्निति न्यासेऽप्युपस्थितप्रत्ययासिद्धग्रह
णस्योद्देश्यककार्य्य एव तत्प्रवृत्तिरिति बोध्यम् पदेत्यादिनोक्तो वार्त्तिककृत्सम्मतः पक्षः तत्फलानामन्यथासिद्ध्याभा
ष्यकृता दूषयित्वा नियमार्थत्वपक्ष उक्त इति दिक् प्रायेणेति विभक्तिप्रतिरूपकाणां लिङ्गयोगे त्रिषु सारूप्याभा
वस्याप्राप्तेः अर्थप्राधान्यबोधकस्येति अर्थप्राधान्य एव प्रवृत्तिबोधकस्येत्यर्थः बहुवचनस्येत्युपलक्षणं त
द्बोधकाभावादित्यत्र तात्पर्य्यम् गौणमुख्यन्यायस्तु पदकार्य्य एव न प्रातिपदिककार्य्ये किञ्चाप्रसिद्धत्वरूपस्य गौण
त्वाक्षतिकत्वरूपस्य वा गौणत्वस्य तत्र ग्रहणं न चापत्त्यभावा अत एव त्रिपतिसेत्यादौ तित्वादयो भाष्यकृतोदाहृताः
गौणत्वेऽपीति उपसर्जनत्वेऽपीत्यर्थः नम्रमितव्यमिति एतद्भ्रमनिवृत्त्यर्थमेवात्रास्य बहुत्वादनमिति भावः कृत्व
विषयतयैवेति जयमङ्गलायामिति शेषः माङ्माने इति घुमास्थेति ईत्वविधायकसूत्रस्य मवकारादाविति वार्त्ति
कं भाष्ये प्रत्याख्यातमिति ईत्वं सफलम् प्रांस्याशब्दे तु भाष्यप्रयोगादेत्त्वाभावः ततो विजेवेत्यन्ये न च तेनेत्त्वपि
तस्यासिद्धत्वात् कथं यलिति वाच्यम् काबीत्वन्विभक्तौ यणादेशा इति व्याश्रयत्वादिति बोध्यम् नकविति समासान्तवि
धौ लिङ्गविशिष्टपरिभाषाभावस्य ङ्याप्प्रातिपदिकादिति सूत्रे भाष्ये उक्तत्वात् [illegible]स्य तन्निषेधत्वेनात्र प्रवृत्तिरस्त्येव गो
स्त्रियोरिति सूत्रे बहुश्रेयसीति भाष्योदाहरणादनन्तरस्येति न्यायमबाधित्वा न ध्वतश्चेत्यस्याप्ययं निषेध इति भावः ङ्यादि
ष्विति बहुवचनं प्रयोगभेदाभिप्रायेण शक्तीति स्त्रीत्वनिरूपितशक्तीत्यर्थः तेन लक्ष्म्यादिशब्दसङ्ग्रहः तदन्तसञ्ज्ञा
पक्षे तु ग्रीनघोरित्यादेन दीशब्दस्य तदवयवेऽलक्षणानघन्तादित्याद्यतिलक्ष्म्याद्यर्थमावश्यकम् लक्ष्मीशब्दे तु व्यप

ल० श० र० १ देशिवद्भावेनतत्त्वस्बोधयम् इउवर्णाविति अतएवघ्यन्ताद्याघन्तत्वनिषेधेनेतिसङ्गच्छते नत्वित्यादि इदंहरदत्तानु
रोधेनन्यायसिद्धमिति अन्तरङ्गत्वात्पूर्वप्रवृत्तनदीसञ्ज्ञयैवसञ्ज्ञापेनघन्त त्वात्कार्य्यसिद्धेरितिभावः वाचनिकमि
ति स्त्रीत्वविशिष्टार्थमात्रबोधकस्यैवसञ्ज्ञेत्यभिमानेनेदम् जहत्स्वार्थवृत्तित्वाभिमानेनवा भाष्यकृतात्वजहत्स्वार्था
यामवयवस्यनित्यस्त्रीत्वविशिष्टार्थबोधकत्वेनतस्यसञ्ज्ञायांकुमार्य्यैब्राह्मणायदत्वरकुद्ध्रेब्राह्मणायखिलुबिंबयेत्रा
उपूर्वैकयेनभेदाग्रहात्समासेनघन्तत्वात्कार्य्यसिद्धिमाश्रित्यप्रत्याख्यातमिदम् अवयवस्त्रीविषयत्वात्सिद्धमिति
तन्मात्रबोधकत्वनिवेशेनमानंयौगिकेषूत्तरपदेजहत्स्वार्थत्वाभावस्यैवेतितदाशयः अवयवशब्देनात्रवृत्तिप्रकृ
तिभूतशब्दग्रहणम् अतएवकुञ्जाघन्तेनदोषः तत्रापीच्छाविशेषणतयाकुमारीशब्दादेर्नित्यस्त्रीलिङ्गार्थबो
धकत्वात् शुभ्रभ्रतीनामिति तदङ्गानामित्यर्थः दोषइति सामानाधिकरण्येविशेषणविशेष्यभावमात्रंवैयधि
करण्येतुभेदसम्बन्धःसचेतिगौरवन्दोषइत्यर्थः दिदिवतुरिति अत्रयणापत्तिस्तत्रापितप्रीत्यावैयधिकरण्यात्
पदियत्विधौसामानाधिकरण्यमेवतदेयङ्एवापत्तिः नचैवलोपोव्योरितिलोपेननिर्वाहः प्रत्ययनिमित्तेयङादेर
सिद्धत्वात् अनित्यत्वात्तदभावेप्याह ऊयतुरिति क्लिष्टेतेति अमादिप्रत्ययस्याङ्गाशेउत्थिताकाङ्क्षत्वादितिभावः
उभयोर्विशेषणमिति व्याख्यानादत्रेक्ष्यानुसाराच्चैकदेशान्वयेपिसोत्रत्वाद्वृत्तिरितिभावः उन्याविति अतएवस्त्र ४७
रपूर्वोपदपूर्वोचोपधायस्यवर्णस्यतस्ययणितित्यर्थकंस्वरपदपूर्वोपधस्येतिवार्त्तिकंसङ्गच्छते उक्तोपायेनप्रत्याख्
व्यातमित्यन्यदेतत् तदन्तत्वादिति नचधातव व यवसंयोगपूर्वत्वस्यधात्ववयवेकारएवसम्भवेनतंयोगवद्धि

प्रयोगस्यापि विशेषावगतिहेतुत्वेन तद्भिन्नस्यापि धात्ववयवस्यैव ग्रहणान्न दोष इति वाच्यम् तन्त्रीरित्यादौ धात्ववयवसं
योगपूर्वस्याधात्ववयवस्यापि सम्भवात् परिमाणाख्यायामिति सूत्रे भाष्ये ऽजपावपि सञ्ज्ञायामेव यथाजातीयकउ
त्सर्गस्तथा जातीयके नापवादे नापि भवितव्यमित्युक्तत्वान्मूलकेन उत्सर्गसमानदेशा अपवादा इति न्यायेनतु न
निर्वाहः अङ्गांश्रोतदसम्बन्धेहरिमित्यादावपि तस्याप्यानेनयेननाप्राप्त्यभावेन तदपवादत्वस्यैवाभावात् यद्यपि
प्रत्यासत्त्या इकोगुणवृद्धी इति निर्देशो वस्तुतया धात्ववयवसंयोगपूर्वभिन्नस्य धात्ववयवस्यैव ग्रहणमिति हरिमि
ति त्यादौ न दोषस्तथापि स्पष्टप्रतिपत्तये आवृत्तिरेवाश्रितेत्यादिक् सूत्रमतेपीति येभीत्रेतिसूत्रं षष्ठीबाधनार्थमिति वेतत्सि
कतयावदन्ति तत्सिद्धसूत्रमतेपीत्यर्थः वस्तुतो भयहेतुरित्युक्तत्वास्य तृतीयाबाधकत्वमेवबोध्यम् नच परत्वादिति एवञ्च
यलोपो दुर्लभ इति भावः वार्त्तिककारोक्तेति लोपो व्योरिति सूत्रे क्वावुपसङ्ख्यानमिति वार्त्तिकेनतस्य पूर्वत्वापेक्षया क्वौ
यथा लोपसिद्धिर्भवति तथा वक्तव्यमित्यर्थः साच पूर्वविप्रतिषेधस्याश्रयेनैवमुक्तमिति बोध्यम् गौणत्वेपीति इच्छाक
र्तृरूपार्थस्यानुपसर्जनत्वेपीत्यर्थः कृतयलोपेति अन्यथावितः यास्यति वदेतिदिति भावः गुणविषय इति प्रकृति
प्रत्ययापेक्षगुणापेक्षया तदवयवमात्रापेक्षस्यान्तरङ्गत्वेन ततः पूर्वमप्रवृत्तिः स्यादिति भावः दुर्वारत्वादिति तदर्थं
कृतस्यान्यसन्नहत्वेपि बाधकाभावादिति भावः विकृतनिर्देशस्येति यकारान्तानुकरणनिर्देशस्येत्यर्थः अकार
स्य उच्चारणार्थ इति भावः साधारणमिति ह्रस्वदीर्घसाधारणमित्यर्थः विदांकुर्वन्त्विति भाष्ये ऽस्यार्थस्यास्पष्टत्वा हि
दिति भावः अतिरभसादिति संयोगपूर्वकत्वेन यणो दुर्लभत्वादिति भावः इयङ्गतो लोपस्याभीयासिद्धत्वन्तु न व्याप्त ९

ल०श०ए० नियमार्थमिति फलतः प्रयोगनियमार्थमित्यर्थः तृतीयान्तादिति तज्जन्तेन तुल्यं लभत इत्यर्थः निमित्तेत्यादि पू
र्ववत्सन आद्यन्तवत्स्वामन्त्रितेपराङ्गवदित्याद्यत्र यस्योदाहरणम् तत्र तज्जन्तत्वनिमित्तस्यतद्व्यवहारस्य वातिदेशेना
हत्यतश्च शब्दमुच्चार्य्यविहितकार्य्यस्यैवापत्तौ जस्त्रिगुणादेशयोस्तृजन्तोद्देश्यकोऽप्तृन्निति दीर्घ एव स्यात् सौ औजसा
दिषु चानङ्गुणौ न स्याताम् न चोत्तरसूत्रद्वयसामर्थ्यादप्तृन्नित्यत्र क्रोष्टुग्रहणेनैव सिद्धावावश्यकत्यापि सामर्थ्यात्का
र्य्यमात्रप्रवृत्तिरिति वाच्यम् तत्सामर्थ्येन रूपातिदेशस्यैव ज्ञापयितुं युक्तत्वात् तादात्म्यातिदेशस्त्वसम्भवी सहप्र
योगाभावात् शास्त्रकार्य्यातिदेशावपि न तु अन्तस्याद्युदात्ततयात्ज्वद्भावेनोकारस्य रेफरूपयणादेशे पितस्योदा
त्तस्यानिकयणोऽभावेनोदात्तयणो हल्पूर्वादिति स्वरानापत्तेः अर्थातिदेशस्त्वसम्भवी तयोरर्थैक्यस्य स्वत एव सत्त्वा
च्च ष ड्विधत्वेपीति अर्थातिदेशासम्भवं मत्वेदम् युक्त्यन्तरमप्याह प्राधान्यादिति रूपमिति तच्च तज्वदित्यत्र अः
कारस्योपस्थित्या तद्विशिष्टं क्रोष्टृ इति तच्च तज्वदिति च कारोच्चारणसामर्थ्यादन्तोदात्तस्वरविशिष्टमिति ऋकारस्योदात्त
त्वाद्युदात्तयण् इत्यादि स्वरसिद्धिरिति बोध्यम् सञ्ज्ञाशब्दानामिति उणादिव्युत्पन्नानामिति शेषः अतो धातुशब्दस्य दी
र्घोभवत्येव परत्वादिति इदमग्रिमंच कार्य्यैक्येऽसम्भवाभावे च विप्रतिषेध इत्यभिमानेन यद्वा परत्वादुत्कृष्टत्वात्
विशेषविहितत्वेन शीघ्रोपस्थितिकत्वादित्यर्थः निष्कर्षे इति भाष्यस्य पूर्वपक्षिण इति शेषः यत्नाद्यालक्षणमि
ति अप्रयुक्ते लक्षणाभावस्ययोगपतेत्यर्थः बाध्यसामान्यचिन्तेति साच तज्वत्सूत्रे भाष्ये स्पष्टा एकस्याचिर इतिसू ५८
त्रस्य भाष्ये चिरादेशे जस्युपसङ्ख्यानं गुणपरत्वादिति वार्त्तिकं बाध्यविशेषचिन्ताभिमानेन प्रवृत्तमिति भावः एतेनैतद्वा

र्त्तिकवलाज्ञसोऽन्यत्र त्रियतिसरमित्यादौ गुणं कल्पयन्तः परास्तास्तज्वतत्त्वत्रस्य भाष्यविरोधात् मपर्य्यन्तस्येति तत्त्वत्रस्य त्रि
यतिस्त्रावित्यादिभाष्यविरोधाच्च अनेन रेण कथञ्चिद्विप्रतिषेध इति अविरोधतात्पर्य्यः दूषयित्वेति यद्यपि नतिस्त्रितिज्ञापके
नतदपवादत्वाभावकल्पनयाविप्रतिषेध उपपद्यते तथापि ज्ञापकानुसरणस्यावश्यकत्वेतेनैव तत्संसाऽध्यतन्दूषयि
त्वेत्यर्थः इदन्त्वत्र ज्वतत्त्वत्रे भाष्ये सन्तोष्टव्यमिति अतिक्षोदस्तदंशे वार्त्तिकेन कार्य्य इति भावः दशपादीति अत्रात्त्विवी
जन्तुनुम्निपातनमव्यर्थेम् नचपरसवर्ण्णाभावार्थमुभयनिपातनम् नुम्येव निपात्यतेऽनुस्वारनिपातनसामर्थ्यनिव
तदभावसिद्धेरिति एवञ्चायमकारो न धातोरित्युवङोऽप्रसङ्ग यणाभावमिति हन्पूर्वकमप्रकृतिक दगमधादेन
सहनरूपेविशेषइतिमाधवश्चिन्त्य इति भावः निपात्यत इति एकादेशस्य पूर्वान्तत्वेनेमत्वमिति भावः वार्त्तिकमि व
ति एतेन भाष्ये पूर्वग्रहणं व्यवहितेपिप्रवृत्त्यर्थमिति वर्द्धिर्द्धित्यादावपि यत्तीतिपरास्तम् वार्त्तिकानुरोधात्पूर्वग्रहणा
स्य परिभाषाप्राप्त्यर्थानुवादकत्वौचित्यात् उपेत्यमिति काराम्भेरित्यत्र काराश्राब्दः करोतेर्ण्यन्ताद्दिरायडि निष्पन्नोव
न्ध नग्रह वाचकस्तस्य पासहै कादेशस्य पूर्वान्तवत्त्वेपि वार्त्तिके ग्रहणं न प्रसिद्धत्वेन ह्रस्वपाठे कवाक्यत्तथा चहस्त्वा
चकस्यैव ग्रहणादिति भावः इत्यपहायेति एतदवपवर्गकारमपहायेत्यर्थः इत्योकारस्य उपलक्षणं तपरेति तपरक
रणेनगस्याविवक्षितत्वलाभादिति भावः निरवकाश[illegible]त्वं चेति चोहेतौ यतो निरवकाशत्वमतो बाधकत्वमित्युक्तं न
सङ्गच्छते त्यर्थः अमरात्पुंस्त्वमिति भिन्नलिङ्गानां न द्वन्द्व इति तेन परिभाषणादिति भावः भाष्यमिति स्थानेन्तरतमस
त्रे इति भावः क्वजन्तस्येति एः रैशब्देपि यकारादिप्रत्ययान्तस्यान्दस इति भाष्यात्क्षरार्थः यकारेणयकारादिः प्रत्य

ल०श०र० योऽलक्ष्यते इकार उच्चारणार्थः प्रायेणाविसर्गरहितएवपाठस्तदा यादोऽत्ययेरित्यर्थ इतिभावः नत्विति अतएवतायमिच्छ
तीतिविग्रहप्रदर्शनपरभाष्यसङ्गच्छते नहिविग्रहम्ब्रूवः अतएवतावित्राशांराध्याप्रमाणित्यचः परस्मितिन्निति त्रिभा
ष्येप्रयुक्तमितिभावः पक्षान्तरमिति अत्राहत्विबीजंस्पष्टमेव ॥ ॥ इति श्रीदीक्षितहरिविरचिते मनोरमाव्या
ख्याने लघुशब्दरत्ने हलन्तपुंलिङ्गाः ॥ लिङ्गविशिष्टेति तयापरिभाषया प्रातिपदिकत्वतद
व्याप्यधर्म्माणाम्विशिष्टेबोधने नतया प्रातिपदिकत्वादित्यर्थः ध्वनितञ्चेदम्बहुव्रीहौ इत्यत्र भाष्ये परत्वादि
ति असम्बुद्धौहल्ङ्यादिलोपश्चरितार्थः कृते लोपे णत्वं सावकाशमित्यभिमानः ननु सत्यपि सम्भवे बाधनम्भव
तीतिन्यायविरोधोऽत आह प्रतिपदोक्तत्वाच्चेति अपवादत्वाच्चेत्यर्थः यथाकृतेपीति आकारप्रश्लेषाभावेपीत्य
र्थः परत्वेनेति यौगपद्यसम्भवेपि विप्रतिषेधइत्यभिमानेनेदम् आटश्चेत्युदाहृतमिति समुदायावयवयोः सन्निधा
नेनुबन्धउपकारकः नचायमनर्थकः आटोऽर्थवतः क्वाप्यभावादितितद्भावः इहाटोभावादिति अयम्भावः निर्देशेषु
प्रायोगिकरूपासम्भवादौपदेशिकरूपग्रहणमितिघसञ्ज्ञासूत्रेभाष्येस्पष्टम् उपदेशेचतेषामित्सञ्ज्ञकत्वादुपस्थिततद
नुबन्धतामेवप्रदेशेषुभानमितिटकारेतश्च काकारस्येत्यादिक्रमेणार्थः कृत्ववत् निष्ठेतिसूत्रेभाष्येस्फुटमेतत् पालि
नेश्च तत्रतत्रविशिष्टोपदेशेतात्पर्य्येणानतत्प्रयुक्तेत्सञ्ज्ञकेन तस्यैवटित्वादिव्यवहारो नवयवस्यतदुपदेशेतात्पर्य्याभावात्। ४९
एतेनौपदेशिकस्याट्परत्वाभावेननवृद्धिप्राप्तिः नेष्यतेतत्रवृद्धिः प्रयोगेतुनाउ इति आटश्चेत्यसङ्गतमित्यपास्तमिति
प्रादिपरेइति अन्तरङ्गत्वात्सवर्णदीर्घादितिभावः नसिध्येदिति इत्याद्येवनसिध्येदित्यर्थः प्रत्येमस्फाङि असान्तत्वाभावेनमु

त्वानापत्तिः पूर्वं गुणत्वेत्वसिद्धिः स्पष्टैव एवञ्चामुमुयङि-त्यादिव्याख्याने देशनरूपह्यमिहापि स्यात् गुणपक्षेऽशास्त्रानिक
त्वेनाकुङः प्रत्ययतयातद्व्यवत्वेनषत्वासिद्धिः एवञ्च तत्रासान्तास्येत्यस्यार्थ इत्यत्रस्याद्ग्रहणमपि तत्तापकमितिभावः प
ठुसञ्ज्ञाहतवतिरन्त्वस्यानाश्रयेणनित्यत्वादकुङि-रूपासिद्धिः नचचेनयाडविविधेयोऽकुङ्-तिन्यासे इति व्याख्यम्
विभाषाद्वितीयेतिसूत्रेणविनिगमनाभावादुभयोरपि विकल्प्ये द्वितीयापि इत्याद्यसिद्ध्यापत्तेः किञ्चाकुङ्ङोयाडपवादत्वेनतद्वि
षयेयाडूडुःस्तभः अचिरादेशाप्नुइट्पूर्वविप्रतिषेधेनेत्यसङ्गतम् एदेशस्यबाध्यसामान्यचिन्तयासर्वापवादत्वेनगुडः
पवादत्वादित्याशङ्क्यनतिस्रचतस्रितिनिषेधाद्यादेशेनुटंनबाधतेइतिभाष्येउक्तन्त्वत्सूत्रे तस्माद्द्विवचनेदेपिपननना
ङ्गिन्यायेनवाधकत्वमिष्टमतएव यद्यप्यस्याङ्गादेशोनसिध्यति तथाप्यवङ्-सूत्रस्यभाष्यरीत्यान्तरतम्येनकदाचिदुदात्तस्यो
दात्तत्वे एकादेशउदात्तेनेत्यनेनविभक्तेरुदात्तत्वापत्तिरित्याहुः सामर्थ्यादेवेति उच्चारणार्थत्वन्तुनव्याख्यानादितिभावः
त्रेत्वयइत्यत्रामीत्यस्यमण्डूकानुवृत्तिरितिबोध्यम् वैपरीत्यापत्तेरिति अयम्भावः वाक्यपत्तत्वद्वाभ्यामुद्देश्यविधेयत्वस्य
तीयतेयत्तत्त्वप्रकारकज्ञानविशेष्यासाप्रसिद्धपूर्वापस्यारत्यर्थात् तत्रोत्तरपदस्यज्ञानविशेष्यपर्य्यन्तलक्षकतया
गुणवाचकत्वेनपूर्वनिपातः उत्तरस्यापूर्वात्वप्रकारज्ञानविशेष्यत्वन्तुनविधेयम् पूर्वापदस्यैपूर्वनिपातापत्तेः नविधे
परःप्रावार्थे इतिविधेयबोधकेलक्षणानौचित्याच्च त्वडुक्तविग्रहेतपूर्वापदस्यपश्चाच्चद समभिव्याहारेणोद्देश्यसमर्प्प
कतयातस्यैवलाक्षणिकत्वेनगुणवचनतयापूर्वनिपातापत्तिरिति नकर्त्तव्यमिति स्पष्टञ्चेदम्भाष्ये तृतीयाशब्दलाह
चर्य्यणासहायवाचिद्वितीयाशब्दस्यनग्रहणम् भागार्थेविधीयमानस्यानोभक्तेर्विशेष्यत्वेननस्त्रीत्वमनभिधानात्
एतेनतत्रलाक्षणिकत्वाद्वार्त्तिकाप्रवृत्तावि दमावश्यकमत्रसूत्रेनसापरिभाषाप्रवर्त्तते प्रतिपदोक्तस्याभावात् १९६ ॥

ल० प्रा० र०

५०

नच महाविभाषयाऽनभावे वार्त्तिकप्रवृत्त्या रूपद्वयं सिद्धम् अमो नित्यत्वाङ्गीकारात् आद्युदात्तस्य तथापि रूपद्वयापत्ति
ङुस्येति परत्वात्त्वमिति भावः अत्रोपसङ्ख्यानादाह सखुशाविति अर्हन्तस्सूत्रमभिधातुं योमातश्शावः प्रवर्त्तते तेस्वित्यर्थः
सापेक्षत्वेप्यत एव निपातनात्समासः अर्हत्वेऽप्युत्रस्यमात् द्वारकमेव तदाह मात्रापुत्रस्येति अपवाद इति यदीदं न
स्यात्तदा कप्राप्नोतीति भावः वैयर्थ्यापत्तेरिति नच्चाकारोपं लाक्षणिक इति तदाशयः नचावद्रूपे इत्यत्रापि याडनापत्तिः
तत्रन्तु निशायै इत्यादौ चरितार्थमिति वाच्यम् यस्य रूपस्य लक्षणाप्रवृत्तिम्विना न सम्भवस्तस्यैव लाक्षणिकपरिभाषावि
षयत्वान्नचेह तथा एकादेशात् प्रागपि तद्रूपसत्त्वादिति चेन्न वर्णग्रहणे तदवृत्तेस्तेरप्युक्तत्वेन तद्विरोधादित्यभिमान
इत्यन्यत्र विस्तरः ह्रस्वयोरप्राप्ताविति अत एव पूर्वमाख्याविति सूत्रे ह्रस्वघटितवाक्येनेति निवर्त्तमित्युक्तम्भाष्ये निषेधे प्राप्त
इति भावः तात्पर्य्यकता लाघवानुरोधेनाप्राप्तविभाषात्वमेवोचितमिति भावः ह्रस्वयोस्तु स्त्रियामित्येवेति इयादिषु प्राप्ति
माशङ्क्य ङिति ह्रस्वश्चेत्यत्र नित्यस्त्रीलिङ्गाविति एवं विधो नियमो नाश्रीयत इति कैयटोक्तिस्स्वपक्षमानुरोधात् क्ल्वांश मात्र
विषयौ यूस्त्र्याख्याविति सूत्रे अत्र त्वे पुं वङ्स्थानावित्यंशस्य निषेधपरतया भाष्यव्याख्यानेन निषेधस्य प्राप्तिपूर्वकतया
तत्र नित्यस्त्रीलिङ्गावित्यस्यावश्यकत्वाच्चेति भावः तदाह अन्यथेति कैयटरीत्येति स्त्रीविषयावेवं नित्यमिति भाष्यस्वारस्ये यो
न लिङ्गान्तरविशिष्टार्थानभिधायकत्वरूपस्य नित्यस्त्रीत्वस्य तेनोक्तेरिति भावः हरदत्तमतेपीति पूर्वभाष्ये एवोभिन्न
क्रमः नित्यमेव यौ स्त्रीविषयावित्यन्वयः नित्यमेवेत्यस्य पदान्तराम्बिनापीत्यर्थ इति वृत्त्याशयं सव्याचष्टे इत्यादीनां
चशब्दार्थ एव स्त्रीत्वमिति तेषाम्पदान्तराम्बिनापीति स्त्रियां वर्त्तमानत्वेन व्याव्यत्यो भाव इति भावः आख्याग्रहणम ५०
पहायेति नित्यत्वार्थकमपहायेत्यर्थः स्त्रीशब्दमात्रमिति स्त्र्याख्यपदं स्त्रीबोधकावित्येतन्मात्रार्थकं निष्कृष्य पूर्वो

कार्य्यमपहायसम्बध्यतेइत्यर्थः परत्वादिति ङे.रामपेक्षयेत्यादि तिसृत्तिष्ठन्तीति इदन्त्रिचतिसृावित्यादेश्चपर्य्यन्तस्येति
भाष्योदाहृतस्योपलक्षणम् बाधसामान्येति इदञ्चतज्वतक्रोष्टुरित्यत्रभाष्यस्पष्टम् वाधइति अनन्तरस्येतिन्यायाप्र
योगउत्वस्यैववाधःस्यादितिबोध्यम् ननुयत्रानेकविधम्प्रतियेननाप्राप्त्यापवादत्वम्प्राप्तन्तत्रव्यवस्थापकाभावेयवा
दाइत्यादिन्याया: प्रकृतेचरभावस्यनकेनापियेननाप्राप्तिरिति चेन्न किमिदंयेननाप्राप्तिन्यायेनपूर्वसवर्णदीर्घापवा
दत्वयाप्रथमाद्वितीयामात्रविषयमुतकृतउदित्यपवादतयापञ्चमीषष्ठीमात्रविषयमुतकृतोङीतिगुणापवादतयासर्वेना
मस्यानङि-मात्रविषयमिति संशयेव्यवस्थाकाङ्क्षयातन्यायप्रवृत्तेःस्वरूपपादत्वात् । तन्निर्मूलमिति जसिएदेशो
वक्तव्योगुणापवादत्वात् इत्येतत्सूत्रस्यवार्त्तिकभाष्यमूलमितिनवाच्यम् बाधसामान्यचिन्तामाश्रित्यतत्प्रत्याख्यानस्यत
ज्येतत्सूत्रेभाष्येध्वनितत्वेनतस्यदृढमूलत्वाभावात् बाधसामान्यचिन्तावलम्बएवतस्यमूलत्वौचित्याच्च तदाह त्रिःष्ट्ये
ति नाङ्स्येति तस्याकृतत्वात् स्त्रियाम्वर्त्ततएवेति अजहत्स्वार्थायामन्यपदार्थस्यत्रिशब्देनाप्युक्ततयातस्यस्त्रियामप्र
वृत्तिः नचेदंस्त्रीत्वमपदान्तरस्यसापेक्षतयावहिरङ्गमितिवाच्यम् त्रिशब्देनसर्वत्रस्त्रीरूपार्थप्रतिपादनेतात्पर्य्यग्राहक
स्यापेक्षिततयान्तरङ्गत्वादितिभावः तत्कथन्नामिति स्त्रियांतत्रचवृत्तिरितिपुन्नपुंसकयोरेवेतित्वदुक्तम्विरुद्धमितिभावः
अजहत्स्वार्थापक्षेत्विति तुनोक्तार्थेऽरुचिर्ध्वनिता तद्बीजन्तुरूटेरविरोधित्वेजहत्स्वार्थावृत्तेरभावः किञ्च जहत्स्वार्था
जहत्स्वार्थशब्दयोरवयवार्थानामवाक्यदृष्टस्वार्थत्यागतदभावावित्येवार्थः तत्रान्यस्वार्थप्रुमादिवृत्तेः कथमन्यपदार्थ
स्त्रियाम्वृत्तिः नचान्यपदार्थसमुदायशक्यत्वेपिसमुदायघटकत्वेनावयवस्यापिसशक्यत्वाशयः तर्हिजहत्स्वार्थ
त्वेपितुल्यं तत्रापिपक्षेऽन्यपदार्थस्यसमुदायशक्यत्वात् यदिस्त्रीवाचकतापर्य्याप्त्यधिकरणत्वविवक्षेत्युच्यते तदाज

ल० श० र०
५१

ह्रस्वार्थत्वेपितुल्यमिति तद्दोषसम्भवादिति पञ्चत्रपुष्यइत्यादौसमुदायभक्तोनुम् नावयवस्येगन्तात्वविघातक इति।
इगन्तोत्तरपदद्विगुत्वस्वरत्वप्रयुक्तः पूर्वपदप्रकृतिस्वरः सिद्धः अन्तरङ्गत्वात्पूर्वमेवस्वरप्रवृत्तेश्चाकृतव्यूह परिभाषात्व
नित्या अतिराभ्यामित्यत्रापिनुमस्वाधित्वापात्वादात्वम् वच्चोत्वेत्यत्रवृद्धिशब्दविहितवृद्धेरेवग्रहणान्नपूर्वविप्रतिषेधेन
नुमितिशङ्क्यम् प्रियतिसृभ्यामित्यादावपिनुमः परत्वान्नित्यादेशएव एतेननिर्दिश्यमानस्यत्रिशब्दस्यव्यवहितत्वादा
देशोनस्यादित्यपास्तम् अचीनामित्यादौनुमचिरेतिपूर्वविप्रतिषेधेनसकृद्गतिन्यायेननुमोऽप्राप्त्या तदभावेऽपिवहुश
ब्दस्यान्तोदात्ततयानस्वरेविशेषः नचोत्तरार्थन्तत्रैवकर्त्तुमुक्तत्वादित्यन्यत्रविस्तरः प्रियतिसृइतिचभाष्योदाहरणप्रामा
ण्येनानङिनलुमतेतिनिषेधएवेतिबोध्यम् अनित्यत्वेप्रमाणमाह नपासयोरिति चोहेतौ षष्ठीसमासइति इयङाद्यधि
कारणत्वेनक्वचिद्दृष्टा वित्यर्थस्तेनहेश्रीरित्यादौनिषेधसिद्धिः ह्रस्वोऽनुपपन्नइति नेयङित्यत्रेयङादिनाक्षेपात्
यत्रनदीकार्य्यप्रयोगे ऽङ्ङेवाधकावाधितेयङादिसत्ताक्वचित्प्रयोगेदृष्टा तस्यतदवयवस्यचनिषेधइतिभावः कथञ्चिदि
ति अनेनसीताविरहितोरामस्यवाक्येसीतायाएवविवक्षितत्वेनेदमप्यप्रयोजकमितिसूचितम् नञ्घटितमनित्यमि
तिभाष्यानुक्तत्वान्नलोपस्यसंस्कारोपयोगि ◌ ॥इतिश्रीदीक्षितहरिविरचितेमनोरमाव्याख्यानेलघुशब्दरत्नेइ
त्तिमद्युरजन्ताः स्त्रीलिङ्गाः २ हलइत्यभिप्रायेणेति एकवाक्यतयाहलएवलोपइत्यभिप्रायेणेत्यर्थः संयोगान्त
लोपइति हल्ङ्याबित्यस्यतत्रापकर्षेपिवाक्यभेदेनसम्बन्धः तेनचपूर्ववाक्यस्यपरव्यतिरिक्तेऽहल्यपिक्वचित्प्रवृत्तिरिति
भावः सन्निपातेति ह्रस्वाकारसन्निपातेनजातस्यतद्विघातकत्वायोगादितिभावः परत्वाज्जरसीति परेतुजरायाइतिसू ५१
त्रोक्तेनाजरांसीत्यत्रनुम्जरसोःप्राप्त्योर्विप्रतिषेधेनजरसितिभाष्यप्रामाण्येनपूर्वविभक्त्यादेशप्रवृत्तिराधिकविभ

क्तित्वज्ञानसापेक्षतया जरसादेशापेक्षया विभक्त्यादेशानामन्तरङ्गत्वमवश्यम्वाच्यम् अन्यथा परिभाषाबाधात् पूर्वमेव जरसः
प्रवृत्तौ नुमा तस्य विप्रतिषेधविचारासंगतिः स्पष्टैवेत्युच्यते तदात्रापि पूर्वविप्रतिषेधेनातो मितया परिभाषया जरस एवो
चित इति वदन्ति अत इत्येतीति न तु तपरस्तत्र प्रवृत्त्यर्थमित्यर्थः नपुंसके ह्रस्वावश्यंभावाद्व्यावर्त्याप्रसिद्धेरिति भावः।
विभक्तित्वापेक्षयेति तदन्तविभक्तित्वाश्रयणेन विभक्ताविति विषयत्वापेक्षयेत्यर्थः स्ववेवेति निरनुबन्धकपरिभाषया
या तद्धितशसोपि ग्रहणमिति न वाच्यम् येनानुबन्धेन सानुबन्धकत्वं तदनुच्चारण एव तत्प्रवृत्तेः अनुरोधादिति तेन
स्वशास्त्रस्य प्रामाण्यमापन्नमिति भावः तदाभ्येति सन्निपातपरिभाषया विभक्त्यादेशो जरसे भावस्य जरया इति सूत्रे भाष्ये
स्पष्टमुक्तेरिति भावः अवर्णमिति ह्रस्वत्वविशिष्टमवर्णमित्यर्थः याऽदेशोऽत इत्यनुवृत्तेस्तत्र पञ्चविकल्पापेति निर्देशात्प्रा
पितदीर्घस्य ह्रस्वत्वांशे निवर्तितत्वात्याप्यवर्णत्वमादेशोऽनुवर्त्तते तदपि चेल्लोपेन निवर्त्तेत तर्हि परिभाषाविरोधः स्पष्ट
एवेति भावः भाष्य इति गाधातोष्टे गुणेनाकारे आर्द्धधातुकोपदेशे ह्यन्तत्वाभावादतो लोपाभावेपि पररूपेण सामगस्य सि
द्धो गापोष्टकः किं करणाच्चिनुङादाकार[illegible]स्य गुणो नेत्यर्थम् तत्र ग्रहणमिति भा[illegible]ष्य उक्तम् केपरे नेति सामगाये
त्यत्रासति टकः किंत्वेकादेशस्य पूर्वान्तत्वेन ग्रहणादाकारस्य धात्ववयवत्वेनातो लोपः स्यात् किंत्वे त्वातो लोप इत्या
व लोपे धात्वनवयवत्वादप्रवृत्तिरित्याशङ्क्य सन्निपातपरिभाषयाऽकित्त्वेपि नातो लोप इति तेन प्रतिपादितम् शावकोत्कमे
इति हर्षोक्तिभावस्तत्रोक्तः परेतु जातिप व्याप्यत्वजातिपञ्चादिसन्निपातनिमित्तो दीर्घो न स्वसन्निपातविघातकलो
पनिमित्तं सन्निपातपरिभाषाया प्रत्यासन्निपातलक्षणाविधिप्रवृत्तेः प्राकृत्वनिमित्तोपः सन्निपातस्तद्विघातकस्य

ल० शे० र०
५२

त्वातिरिक्तस्य स्वयमनिमित्तइमित्यर्थ इत्याहुः पूर्वविप्रतिषेधेनेति अन्तरङ्गानपीत्यस्योपलक्षणमिदम् अत्रत्यवार्त्ति(
कानुरोधेन त्वेतदुक्तम् त्यदादिष्वपश्चेति वक्तव्यमिति हि तत्र वार्त्तिकम् तं कुलमिति स्यादिति द्वितीयैकवचन इति शे
षः प्रथमैकवचने तु संकुलमिति बोध्यम् नुम्ह्रस्वयोरिति नुंविविहितस्य भावस्यातिदेशस्याभावात् ह्रस्वनुमो
र्निषेधोतिदेशसामर्थ्याद्व्याप्तिन्यायाप्रवृत्तेश्चेति भावः नद्विषयस्येति स्वरस्य तु नातिदेशो भिन्नकर्तृकत्वात् विषयभे
देन नपुंसकत्वाभावेपि तत्र वस्य ङीकारान्नुमोऽभावादिति ह्रस्वाभावेन नाभावाभावाच्चेयङिति भावः उपसर्जन
ह्रस्वएवेति ईयसो बहुव्रीहौ पुम्वदिति हि भाष्ये पठितम् ईयसः परस्य स्त्रीप्रत्ययस्य बहुव्रीहौ विद्यमानस्य पुम्वत् पुल्लि
ङ्गस्य ईकारस्य यथा न ह्रस्वस्तथास्यापीति भावः ईयसन्ताद्विहितो यः स्त्रीप्रत्ययस्तदन्तान्ते बहुव्रीहौऽम्वदितु नार्थः ति
बहुव्रीहेः पुम्वत्वेपि उपसर्जनस्य श्रेयसीशब्दस्य स्त्रीप्रत्ययान्तत्वानपायेन उपसर्जनस्त्रीप्रत्ययस्य दुर्वारतापत्तेः।
एवञ्च प्रत्यासत्त्या स्त्रीप्रत्ययत्वनिमित्तकगोस्त्रियोरित्यस्यैव तेनाभावातिदेश इति भावः तदेवार्थतोत्र पठितम् न
चनेत्येव सिद्धे पुम्वद्वचनमव्यर्थम् वार्त्तिके पुलाघवगौरवविचाराभावस्य तत्र तत्र भाष्ये ध्वनितत्वादिति बोध्यम् इत्या
द्याहुरिति अत्रारुचिबीजन्तु ईयसश्चेति सूत्रे भाष्ये ईयस उपसर्जनस्त्रीप्रत्ययस्य दीर्घत्वमुक्तम् यवम्वहु श्रेयसी पुम्वद्व
चनात्सिद्धमित्युक्तम् तेनास्य नपुंसकह्रस्वनिवृत्त्यर्थत्वं लभ्यते अन्यथावचनेन वचनप्रत्याख्यानासङ्गतिः मन्मतु म
तेन पुंसकह्रस्वनिवृत्त्यर्थमावश्यकत्वादिति युज्यत एव तेनोत्त्याख्यानं दीर्घत्वं हि प्रत्यासत्त्योपसर्जनह्रस्वत्वापवादः सामा ५२
न्यतो ह्रस्वमात्रापवादत्वे हि प्रत्याख्यानासङ्गतिरिति दिक् पूर्वविप्रतिषेधपरभाष्येति अङ्गाधिकारे तदन्तविधेः सत्त्वे

नतदन्तग्रहणेन पदाङ्गमा इति न्यायेन तुम्विधिविधानस्य ग्रहणे ऽपि सूत्रे षष्ठीनिर्देशाभावान्निर्दिश्यमानस्य तुमाद्यवधान
मित्यस्याभावेऽपि पूर्वविप्रतिषेधसामर्थ्यात्सकृद्गतिन्यायेन पुनस्तज्वत्वाभावः अत्रानयोर्योगपद्यासम्भवेनाविरो
धइति भावः इत्यस्यैवेति अन्यथा प्रथमोपस्थितसर्वनामस्थानोदाहरणत्यागो निर्बीजस्स्यादिति भावः पक्षे तृज्व
त्वाभावपक्षे उदाहृतत्वाच्चेति नच त्रिपक्रोष्टृणेरित्यादिव्यावृत्त्या चारितार्थ्यम् त्रिपक्रोष्टुरित्यस्यामवस्थायां तु
म् तज्वत्वयोः प्राप्तयोः परत्वात्तज्वत्वे सकृद्गतिन्यायेन नुमभावसिद्धेः पुनः प्रसङ्गविज्ञानाश्रयेण तद्वचनारम्भापेक्ष
यास कृद्गतीत्याश्रित्य वचनानारम्भस्यैव लघुत्वादिति भावः समाहारद्विगाविति समाहारद्वन्द्वस्याप्युपलक्षणम् पु
म्वद्भावाभावादिति भाषितपुंस्कत्वाभावादिति भावः इत्येवेति इत्यपीत्यर्थः प्रातिपदिकांशेति प्रातिपदिकांशस्याप्य
नुग्रहायेत्यर्थः इतिदिगिति दिग(?)र्थस्तु चतुर्थ्यन्तोदाहरणपरभाष्यप्रामाण्यात्तुम्वत्त्वपक्षेऽनभिधानेन तज्वत्वाभा
वकल्पनान्याय्या भाष्यकृता हि सूत्रत्रयस्य वार्तिकस्य च प्रत्याख्यानायाश्रितस्य शब्दानां नियतविषयकत्वस्य सूत्रारम्भे
प्यावश्यकत्वद्योतनाय पूर्वविप्रतिषेधवार्त्तिके तदुदाहृतनाद्यापि न चोदाहरणमादर्शनीयमिति न्यायेन सर्वनामस्था
नविषयकताप्यस्य न्याय्या उदाहृतातिरिक्तोदाहरणाभाव इत्येवं परतयानादर्शनीयमिति तदर्थ इति बोध्यम् एकदेश
विकृतस्येति सच न्यायोऽशास्त्रीयस्याप्यतिदेशकोऽशास्त्रीयविकारे चेति प्राग्दीव्यत इति सूत्रस्थभाष्यसम्मतत्वादिति
भावः पुम्वद्भाव इति तेन स्कन्दरभार्य्य इत्यादौ जातनिवृत्तेरपि दृष्टत्वेनात्रापि तेन जातङ्गत्वनिवृत्तिः ननूपजीव्यवि
रोधेन ह्रस्वानिवृत्तिः अत एव समासस्येति सूत्रभाष्ये पतोऽनावरत्यनाव इति प्रतिषेधो हल्स्वरप्राप्तौ व्यञ्जनमविद्य
मानवदित्यस्य ज्ञापक उक्तः नाव्यमित्यादौ आदिर्नकारो न स्वरयोगयोग्यश्चाकारस्तद्योग्यो नासावादिरित्यनावरतिनिषेधो

ला०श०र० नर्थकः नचादिरेवनकार उदात्तगुणविशिष्टोस्तु तमाच्छ्रूयोस्ति यदन्तस्यघ्वच्चकस्यादिरुदात्तगुणकरूपोभवती
तिचयतोनावइत्यस्यार्थइतिवाच्यम् एवंहिनिमित्तभूतघ्वचकत्वविनाशादुपजीव्यविरोधेनाद्युदात्ताप्राप्तिरितितदाशयु
५३ इतिचेन्न माधवानुरोधेनास्ययत्नस्यसत्त्वात् ॐ ॥इतिश्रीदीक्षितहरिविरचितेमनोरमाव्याख्यानेलघुशब्दरत्ने
हलन्तेष्वजन्तनपुंसकलिङ्गाः॥ ॐ ॥३॥ ॥धुडिति ३ः सीतिसूत्रेऽनुवर्त्तमपदस्येतिमधिकरणमपदावयवस्य
स्येत्यर्थइतिभावः एकद्वितीयमिति अत्रत्यवार्त्तिककारइत्यर्थः अपदान्तभाजमिति इदमचर्त्त्वभाजमित्यर्थोपलक्ष
कम् पदान्तोप्राप्योजश्त्वप्राप्याचर्त्त्वविनाचयोलाभात् तथाचेतिवदतामूलकृताऽस्यार्थस्यसूचनात् अतएवककुगात्
दृषष्ठइत्यादौभवत्येव दुगादीनांजश्त्वमप्यसिद्धत्वेनतदप्राप्त्याचर्त्त्वस्याप्यभावात् इतिदिक् धातोरित्यावर्त्तेत इति इ इतिभावः ॥
दम्प्राचामनुरोधेन दादेरित्यावर्त्ततइतितुयुक्तम् धातोर्धातोरित्यनेनहिऔपदेशिकस्यधातोरित्यर्थेनदामलिहोमा
वत्तावपिअधोगितिनसंगच्छेत दादेर्दादेरित्यनेनोपदेशकालिकदादेरित्यर्थकेनोभयंसिध्यति उपदेशकालमित्य
स्यतात्कालिकंलक्षयतीत्यर्थः उपदेशेदादेरितितुकलितोर्थः वाच्यार्थत्वेषष्ठ्यन्तस्यसप्तम्याविपरिणामोविकर्त्तव्यः
स्यादितिगौरवम् धातोरित्यस्यैवलक्षणयातथार्थकस्यदादेरित्यनेनान्वयेपिनक्षतिरित्याशयेनतुमूलेधातोरित्युक्त
म् अतएवभाष्येघत्वस्यासिद्धत्वाद्गुगित्यत्रढत्वमाप्नोतीत्याशङ्क्यापवादत्वेनसमाधायापवाएवमवक्ष्यामिहोढः अ
दादेरिति ततोधातोरिति दादेरितिवर्त्ततेनेतिनिवृत्तमित्युक्तम् द्रुहेत्यावाद्रुहेत्यनेनढत्वस्यापिविधानाद्दधुडित्यादौनहो
धइतितदाशयः तत्रधातोरितिसूत्रेभाष्यकृत्कृतदादेरित्यनुवृत्तेः फलान्तराभावेनतदुपदेशावदादिलक्षकंसामर्थ्या ५३
दर्थाधिकारानुरोधाच्च पूर्वत्रनिषेधसमर्थकेप्येवम् अतएवनामधातुविषयेदामलिडित्यादौढत्वघत्वाभावौसिद्धौ ।

द्वौ एवञ्चैतदेकवाक्यतयाऽपवादत्वपक्षेपिदादिपदस्योपदेशकालिकदादिलक्षकतोचिता आवन्त्याद्यपतान्तु बालानां
स्फुटं तत्प्रतिपत्तये इति बोध्यम् नचोपदेश इत्येव कुतो नोक्तं गौरवापत्तेः धातोरिति तु तद्धाडित्यादिव्यावृत्तये उत्तरत्राव
श्यकम् अव्याप्तीति अधोगित्यादौ सा ननु धातोरवयवो यो दादिरित्यर्थे इदं सिद्धं वैयधिकरण्यञ्च गर्दभपतेरप्रत्ययेग
ईवित्यादौ मध्भावयोत्तरसूत्रे आवश्यकम् दोग्धेति व्यपदेशिवद्भावात्सिद्धम् स्पष्टञ्चेदम्भाष्ये तत्राह अव्याप्तीति दा
मलिडित्यादौ सा नच प्रागुक्तभाष्योत्तरमधोक् सिद्धुपे वैयधिकरण्यान्वयपर्य्यन्तं भाष्यकृतो धावनमव्यर्थम् दादेरिति वर्त्त
तद्रूपस्योक्तमाशयमज्ञानत एवमपि घोषादेरित्युच्यते तत्राधोक् न सिध्यतीति शङ्कापामुत्तरसूत्रार्थमपि प्रसङ्गान्नि
र्णीतुन्दादिपदलक्षणायामधोगित्यस्यासाधारणफलत्वाभावन्दर्शयितुमतयोक्तेः अत एवाग्रे वैयधिकरण्यत्वोत्त
रार्थमावश्यकत्वोक्त्येहार्थमनावश्यकत्वम्भाष्ये ध्वनितं सङ्गच्छ तद्रूपलम् तस्मामादिकमिति धुग्भ्यामित्यादेः प
दान्तत्वादेव सिद्धेरिति भावः उपेक्ष्यमिति एतेनैकाचो बश इति सूत्रे ह्रस्वादङ्गादित्यतोऽङ्गादित्यनुवर्त्तते अङ्गञ्च द्विविध ग
म् धातुरूपं प्रातिपदिकरूपञ्च तत्र धातोः पदान्त एव प्रातिपदिकस्य झलि पदान्ते चेति प्राचामाशय इत्यपास्तम् त्वी
तत्वकल्पनविभक्तिविपरिणामादीनां निर्म्मूलत्वान्निष्फलत्वाच्च तद्धाट् तद्धाड्भ्यामित्यादावतिव्याप्तेश्चेति दिक् निबेधा
दिति मध्भाववत्त्व एकाजग्रहलोपि अजर्घा इति भाष्योदाहरणेन निबेधानित्यत्वाद्भवतीति भावः शितपाशपेति भाष्या
नुक्तत्वादप्रमाणमेवेति च्चित्र्यापत्तु तथा नोक्तमित्यन्ये छत्रशाटकवदिति अस्य सूत्रस्य शाटकमव्ययेत्यादौ यदि वा तव्यो नशा
टकोऽप्यशाटको न वा तव्य इति विरोधमाशङ्क्य समन्वेष वातव्योऽपत्यो तस्य शाटकमित्येवास्त्राभवतीति भाष्ये उक्तन्त

ला० श०२०
५४

याप्रकृतेविपराः स्थानेसम्भवतियस्यसम्प्रसारणशब्देनजातस्यसम्प्रसारणसञ्ज्ञाभवतीत्यर्थइतिभावः तेनदिवउतोन
सम्प्रसारणत्वम् फलितार्थेति सम्प्रसारणपूर्वत्वाभ्यामफलितेत्यर्थः ऊदितिकृतेइति भूवादृशब्देइतिशेषः क्विपमा
णमिति ऊड्ग्रहणमित्यर्थः तादृशस्यलेइति मत्वबिषयेइत्यर्थः भूवादित्यादितुभवत्येव ऊहतेरिति एतद्वार्यूहइत्ये
तद्विषयम् अव्यभिचारादिति संस्कध्वंस्त्वोर्द्विर्वचतुनास्त्यनभिधानादतस्संयोगान्तलोपेतत्रव्यभिचारइत्य पात्तम्
अतएवभाष्यकृतासस्येत्यनुवृत्तावनुवृत्तौपपिवानित्यत्रैवदत्वप्राप्त्याकृतानडुभ्यामित्यत्रै वदत्वाभावप्राङ्काकृतेतिदिक् द
न्यासोहितेति न्यासकृद्धितेत्यर्थः निरनुबन्धकेति डिवेः प्रत्ययस्यसानुबन्धत्वेपितदन्तत्यातथा त्वादितिभावः।
इदञ्चात्रसूत्रेभूवादिसूत्रेचभाष्येस्पष्टम् उच्चारणार्थेइति ननुस्वरितार्थइति उच्चारणार्थोनामित्सञ्ज्ञायामपिति
तिप्रत्ययग्रहणमितिवार्त्तिकेनतदप्रवृत्तिरितिभावः सम्प्रसारणत्वादिति अतङ्गावितस्यापिसञ्ज्ञेतिपक्षेइदम् शब्दशा
रकमिति नचतद्वाचकशब्दात्परत्वमेवार्थात्परत्वमित्यापातम् ततश्चप्रियपञ्चन्आमित्यत्रापितद्वाचकपञ्चन्शब्दा
त्परत्वमस्त्येवतिदोषस्तदवस्थइतिवाच्यम् एतत्सामर्थ्येनप्रधानीभूतषडर्थवाचकशब्दात्परत्वम्विवक्षितमित्यभिमाना
त् इदम्प्राचामनुरोधेन द्विवचननिर्देशगौरवात् समाहारेणसर्वत्रसूत्रेषुनिर्देशादर्शनाच्च षट्सञ्ज्ञकानामबहुत्वा
च्चबहुबचनोपपत्तिः किञ्च नमद्गुत्वस्यादिभ्यइत्यादौशब्दवाहुल्याभिप्रायेणबहुबचनवत्तिसभ्योजसइत्यादौप्रयो
गबाहुल्याभिप्रायेणतद्वत्त्वेहापिबहुबचनंवक्तुंयुक्तम् अत्रत्यदादीनामइत्यनुवर्त्ततेतदाह त्यदादीनामिति अतए
वसिद्धान्तेउपसर्जनेमेतिभावः ट्टः शगिति तेनद्विपर्यन्तानामन्यदादित्वेपिनदोषः किंसर्वनामवहुभ्यइत्यत्रकिंग्रहणं
नकार्य्यमितिभावः

नच्चेमोऽइत्यत्रोव्यापत्तिः अङः कार्य्ये कृते इति निषेधात् आरम्भसामर्थ्याच्चेति त्यदादीनामः इत्यनेनैवान्त्यादेशेसिद्धे इमं इत्या
रम्भसामर्थ्यादित्यर्थः ककः इतिस्यादिति ममतुतन्मध्यपतितन्यायेन साकच्चकस्य किमः शब्दत्वात्सिद्धम् निर्द्दिश्यमानस्ये
तिपरिभाषात्वत्र न प्रवर्त्तते कादेशविधान सामर्थ्यात् नचस्कव न्तान्तद्धितोत्पत्त्या विभक्त्युत्पत्त्यनन्तरं परत्वात्कादेशोऽकचिकंकः
वाकचोन्तरङ्गत्वादिति भावः किमः इत्यवश्यमिति कुतिहोः क्वातीत्यादेशे कह्यश्रवणापत्तिः उतिहोरतीतिन्यासे उकार
स्यान्त्यादेशत्वापत्तिरेतदर्थं नानार्थक इत्यारम्भे गौरवम् अङःवत्तपरिभाषयाक्वेत्यत्र गुणस्य बाल्लोच त्क्वेपा इतिभावः कि
मोहरनन्तरस्पाठेपि दोषाभावमाह अनुवर्त्तीति इतिचनविरुध्यत इतिने यद्यप्ययमप्रयोगो निपातनमादायसिध्यति
तथापि विभाषाभवदिति वार्त्तिकं नविरुध्यत इति तात्पर्य्यम् विप्रकृष्टस्यापीति परोक्षस्यचेत्यपि बोध्यम् विपर्य्यौरिति।
अपंनिर्द्देश एवास्यांशस्य ज्ञापक इत्याहुः अनादेशः स्यादिति तत्रकृते सङ्कृतिन्यायेन पुनः स्मेनस्यादिति भावः नित्यः
त्वादिति लक्ष्यानुरोधेन बाधकाबाधित प्रसङ्गस्यैवात्र ग्रहणान्नानादेशो नित्य इति भावः अपूर्वमन्बोधयितुमिति अज्ञा
तज्ञापनमेवोभयत्रापि विधानं नतु प्रवर्त्तनाविषयत्वमित्यर्थः नविधीयन्ते नाज्ञाताबोध्यन्ते अनुवाद्यत्वेनेति सर्वाबा
क्यमिदम् तत्रकृप्ते आरोपितं भीरुत्वं भाविकामिव्यवहारसंगोपनायाऽनुवाद्यत्वेनैवविवक्षितमितिभावः नन्दनिर्देशातइ
तिनन्दनीयनिर्देशादित्यर्थकम्बोध्यम् दीर्घविधाविति नपदान्तसूत्रे सपादसप्ताध्यायीस्थदीर्घस्यापि ग्रहणमित्यर्थस्यंचि
त्यमुत्वोरिति सूत्रे भाष्ये ध्वनितत्वादितिभावः उपेक्ष्याइति दीर्घप्रासेरितिभावः औचित्यमेव दर्शयति एवंहीति व्याख्यानन्वि
ति [illegible]

न०श्री०८०
५५

ति तुनाऽस्त्विर्बोधिता सप्तम्यन्तपाठेपिनलुमताति निषेधानित्यत्वेनवानपुंसकानामित्यस्यसिद्धिरिति लाघवमस्तीति।
सामान्यशास्त्रेति प्राप्तस्यपुनर्विधानसामर्थ्येनसामान्यशास्त्रस्यसंकोचस्तदितरपरत्वात्मकइत्यर्थः संकोचश्चनलो
पविधौपूर्वत्रासिद्धमित्यस्यानुपस्थितिरूपः अर्थवत्सूत्रेचार्थवत्पदेनार्थवत्समुदायायहल्रूपः एवञ्चास्यविधित्वं
स्पष्टम् इदमेवचनियमस्यविध्यपेक्षयागुरुत्वम् निषेधवादिनोप्यस्यावश्यकत्वम् अन्यथाविकल्पापत्तेः सामान्यशा
स्त्रसंकोचेचान्यत्रतदभावस्याप्यर्थतःसिद्धेरर्थसिद्धत्वमादायनियमशास्त्रेषुप्रतिषेधत्वव्यवहारोपिकृतइतितिसूत्रस्यस
पासयहणकृतनियमेनवाध्यसामान्यचिन्तयाहृदंशस्याविसंकोचइतिमूलकेनोपदंशामित्यादौनकृदन्तत्वमयुक्तं प्राति
पदिकत्वम् पञ्चपञ्चनखाभक्ष्याइतिशास्त्रेणापिप्रापकप्रमाणान्तरप्राप्तभक्षणस्यतदितरविषयत्वरूपसंकोचकल्पनंतेन
नान्येषांभक्षणाभावोगम्यते तद्भक्षणेप्रायश्चित्तञ्चगम्यते पतिस्समासएवेत्यादौएवकारोघिसञ्ज्ञाशास्त्रस्यसमासघ
टकपतिशब्दाविषयत्वरूपसंकोचस्यस्फुटंद्योतनायपतिघटितसमासान्यसमासाविषयकत्वरूपसङ्कोचोलुङीतिसूत्र
क मुपक्रम्यानुपराभ्यामितिसूत्रेइत्यर्थः पञ्चपञ्चनखाभक्ष्याइत्यत्रभक्ष्यनियमेऽभक्ष्यप्रतिषेधगम्यतइतियन्येनपस्य
शापाञ्चभाष्येस्पष्टमेतत् भक्ष्यनियमेप्राप्तभक्ष्यस्यपुनर्विधानेइत्यर्थः निषेधरूपेणेति स्ववादिपदेनस्वव्यतिरिक्त
विधेरुपलक्षणरूपाभवतीत्यनेनभवतीत्यर्थस्योपलक्षणपेतिभावः निषेधश्चनलोपविधावनुवर्त्तमानपूर्वत्रासिद्धत्वस्य
श्रुतस्यवात्रस्वार्थहानिप्राप्तबाधपरार्थकल्पनारूपदोषत्रयंमीमांसकैरुच्यते परिसङ्ख्यापदेनचापभ्यवह्रियतइतिबोध्यम् ५५
इतिपक्षेत्वित्यनेनास्त्विर्बोधिता तद्वीजन्तुलक्षणायांगौरवमफलाभावश्चतदभावेलक्षणायाअनौचित्यञ्चेति इतिसमा
सेइति इत्यनुवर्तमानेतद्धितार्थेतिसमासइत्यर्थः स्वरविधौव्यञ्जनमविद्यमानवदितितुनात्रतस्यस्वरोद्देश्यकविधावेवप्र

नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिष्विति सूत्रे देवताद्वन्द्वे उत्तरपदप्रकृतिस्वरनिषेधके पृथिव्यादिपर्युदासरूपधर्म्मि
ग्राहकस्य तथैव सत्त्वात् अत एव वाचः कर्त्तृपकिशातुरनुमोनयमातीत्यादौ अचइति अजादीत्यादिविवरितार्थम् अत एव
राजवतीत्यादौ नलोपस्यासिद्धत्वाद्दन्वतीशब्दाद्दन्तोवलादिति स्वरेण उदश्वित्वानित्यत्र ह्रस्वनुड्भ्यामिति मतुबुदात्तत्वञ्च न
त्याकरः इदं समासस्येति सूत्रे भाष्ये स्पष्टम् इदमेवाभिसन्धाय पतो नाव इत्येतत्प्रतिषेधमूलकं हल्स्वरप्राप्तौ व्यञ्जनमवि
द्यमानवदिति परिभाषान्तरम्भाष्ये तत्रैव स्पष्टमुक्तम् अनुपधत्वादिति धातोरुपधाभूतरेफवकारयोर्हल्परयोरिति तदर्था
दिति भावः प्रतिदिवन्शब्दादाचारक्विप्यपि अनुनासिकस्येति दीर्घ इदं रूपन्दुर्लभम् वक्ष्यतो हलन्तेभ्यो आचारक्वि
पोनभिधानमन्यत्रोक्तम् तथेति यथोपधाग्रहणाद्रूदिति दीर्घव्यावृत्तिस्तथा सर्वनामस्थानग्रहणात्सम्बुद्धावुपधा
पदानुवृत्तेरस्य व्यावृत्तिरित्यर्थः पञ्चमीसमासो मास्त्विति सार्वत्रिको मास्तु अनित्यत्वादित्यर्थः तदनित्यत्वेन स्यानि
यत्त्वाभावे एकाच्त्वाभावादेव एकाजुत्तरेति णत्वव्यावृत्तिसिद्धेरिति भावः णत्वग्रहणमिति माषवपनीत्येतद्धितत्वप्रयोज
नम् तच्च बहिरङ्गतया पस्येति चेत्य इत्योपासिद्धत्वेनापि सिद्धमिति तन्मास्त्विति भावः इदन्त्रिपाद्यान्तःपरिभाषाप्रवृत्त्यभि
मानेन भाष्ये ध्वनितमिति अन्यथाहि रूमाषवपनीत्येतस्य तदुदाहरणत्वोक्तेय त्वभिमानः न्याय्यमिति तस्य प्रातिपदिकान्ते
त्यपवादत्वादिति भावः नच सन्निपातपरिभाषया तदप्राप्तिः सर्वत्र णत्वे कुकवर्ग्ग व्यवाय पक्षेन तद्विषयेतस्या अनित्यत्वाद्व्य
कत्वात् हादेशेष्विति हादेशाकवर्गव्यवायेऽइत्यर्थः आर्षत्वाद्वार्त्तिके समासः वार्त्तिके हादेशेत्युक्ते द्युहणइत्यादौ पूर्वप
दादिति णत्वं विध्यति तत्रहि हन्तेरप्प्रत्ययो घनादेशश्च अत एवागारैकदेशे इति सूत्रे प्रघणप्रघाणयोः कृतणत्वयोरुच्चार

ल० शा० र० त्र० ह०

५६ [illegible] २

णाम् तत्रापि हन्तेर्घनादेशविधानात् न्याय्यत्वादिति नचवार्त्तिकरीत्या बहुव्रत्रहाणीतिणत्वमापाति सत्रारम्भे [illegible]
[illegible] वार्त्तिकरे [illegible] न्मुस्यैव ज्यायस्त्वात्कथं न्याय्यत्वं वहिरङ्गत्वेन दीर्घस्यासिद्धत्वेतु आघ्नानी
त्यत्र दोषः तथा सत्रारम्भे प्रघनाघनइत्यत्र णत्वम्प्राप्नोति वार्त्तिकरीत्यानुनेतिवाच्यम् अत्सर्वस्येत्यनेन हस्यानिकुक
वर्गभाववक्तेरेवोपलक्षणेनादोषात् प्रघणप्रघाणयोः कृतणत्वयोरगारैकदेशसूत्रेउच्चारणमपि अत्रत्यात्पूर्वग्रह
णस्योक्तार्थोपलक्षणत्वेमानम् णत्वनिपातकल्पनापेक्षयोक्तार्थतात्पर्य्यग्राहकत्वौचित्यादितिभावस्तदेतद्ध्वनयतोक्तम्
वार्त्तिकार्थोपसङ्ग्र [illegible] हस्येति भूतएवेपर्य्यन्तमधातुपदस्यलक्षणायाम्बीजमाह अञ्चतिग्रहणंहीति अञ्चतिग्रहणंहीति
अञ्चतिरिति मलोपिनोञ्चतेरित्यर्थः नलोपेननिर्द्देशात् सामान्यापेक्षश्चनियमस्तेनपर्णध्वजोमत्यते: क्विपिणमानि
त्यादावुगितश्चेतिङीवपिनेतिदिक् स्पष्टञ्चेदमत्रभाष्येउगितश्चेतिसूत्रेच कैयटेनेति अयञ्चकैयटः केशाद्वइतिसूत्रस्थः
अर्द्धणास्तइत्यादि अर्घणोमघोनघ्चतनप्रोक्षयंयतस्तच्छान्दसंसामान्यतोवोधितानामपिकेषाञ्चित् घधात्वादिवन्निपत
विषयत्वादित्यर्थः एवञ्चछन्दसिदृष्टानुविधिरितिनतदर्थःशास्त्रारम्भइतितात्पर्य्यम् एवंहिछान्दसलक्ष्यसाधकसर्वसू
त्रप्रत्याख्यानंस्यादतः प्रकारान्तरेणापिसिद्धमाह मतुब्वन्यारिति अधातोर्द्विजन्तान्मघशब्दान्मतुब्वनिब्यांरूपद्वयसिद्धि
रितिभावः ननुसूत्रारम्भेनित्यस्तत्रादेशोर्वणः प्रत्याख्यानेतुपक्षेतदभावोपीत्यतआह छन्दस्युभयेति त्रादेशातदभावे
त्यर्थः तदुदाहरणमिमान्यर्वणः पदानीति एतत्प्रत्याख्यानेदीर्घोघकाराकारोदात्तत्वञ्चलभ्यते एतेनास्यछान्दसत्वाच्छ
न्दसित्रादेशापक्षेमघवन्निष्येवंतच्चमत्वन्तस्यछान्दसत्वाद्दीर्घाभावेनसाध्यमितिप्रत्याख्यानाशयः लोकेतुमत्वन्तेदीर्घोभ
[illegible]

[illegible]

वार्त्तिकाक्षरस्वारस्येन तथाऽप्रतीतेः मघवान् जीवीत्यादौ वेदे विदीर्घस्य पठ्यमानत्वाच्च तदेतत्कैयटेनोक्तं भाषायामसाधुतेति
केशवाद्व इति सूत्रस्य उक्तं कैयटस्त्वेतत्सूत्रस्य वार्त्तिकविरोधात्स्वग्रन्थविरोधाच्च हेय एवेति बोध्यम् यत्तु छान्दसत्वात्र विकृति
भाषायामित्याश्रित्य भाषायामप्रयोग इति तन्न तज्ज्ञापकस्य बबस्यास्य मूर्द्धौ मतुबिति सूत्रप्रयोगस्य छन्दोवत्सूत्राणीति भाष्य
कारेष्ट्यान्यथासिद्धत्वादिति तदाशयः तद्धनिवनोति इदञ्चित्यम् नप्रिष्वं छान्दसं हितादिति सामान्यप्रवृत्तवार्त्तिकस्य सं
कोचे मानाभावात् कविप्रयोगाणाम्बहुशः प्रामादिकानान्दर्शनेन तेषामार्षवचनसंकोचेन मानत्वमिति दिक् उचितइ
ति भाव इति तथा च बनो रचेति सूत्रे भाष्ये मघोनीत्यत्र प्राप्नोति मघवच्छब्दो व्युत्पन्नो प्रातिपदिकमिति प्राप्नुन्नेति अत्र य
द्वक्तव्यं तदुक्तम् इति पक्षे इति अस्यि दधीत्यत्रोदात्तपाठेन सिद्धे उदात्तग्रहणेन शास्त्रे विनायत्नं स्वरूपेणोच्चारितगु
णस्याविवक्षयाऽभेदकत्वज्ञापनादिति भावः उम ऊँ इत्यत्रानासिकाव्यापारेणाक्रुष्टाधिक्येनोच्चारणादादनुनासिकयम्बि
वक्षितमिति सर्वेषां समानम् भेदकत्वेपि तपरसूत्रस्यानाणिविधयर्थत्वाद्दोषस्तत्राप्रत्ययग्रहणानुवृत्तौ मानाभावादित्यपि
बोध्यम् अनुवर्त्तित्वाच्चेति एवञ्च तत्र सूत्रे तत्सम्बन्धे मानाभावः एवञ्च भेदकत्वेपि तपरसूत्रस्यानणिविधयर्थत्वा
दोष इति भावः नान्यथेति एवञ्च गुणानामभेदकत्वेपीत्युपक्रम्य तादृश्युक्तिरसङ्गतेति भावः मूलश्रेष्ठित्यादि
ति सवर्णग्रहणप्राप्तेरिति भावः तद्विशिष्टस्येति घ इति स्थानित्वलाभात्तदन्तविध्याद्यभावाच्चेति भावः अयम् इ
नः स्त्रियामित्येषः एवञ्च स्ककृपूरित्येषतेन निषेधेनापि बारयितुं शक्य इति भावः योन्यश्चेति योन्य इति सूत्रमि
त्यर्थः चादिलोपः प्राप्नमिति तदन्तग्रहणादिति भावः न भवतीति न चटिलोपो न विभक्तिनिमित्तकोऽन्यत्रापि तस्य

लघुशब्देन्दु०

५८

वृत्तेरितिवाच्यम् प्रकृतोदाहरणेविभक्तेर्निमित्तत्वमात्रेणातत्त्ववृत्तेः अतएवप्रुवोरनाकाविति सूत्रभाष्येश्वयुवेत्यादेः परिभाषाफलत्वेनोपन्यासस्सङ्गच्छते परत्वादित्यस्सुच्चयः नचाभिव्यक्तपदार्था इति न्यायेन कथमत्रात्वादीनामप्रवृत्तिः तस्यन्यायस्यपदकार्यविषयत्वेन तत्परकरणादनित्यत्वेन चेहाप्रवृत्तेः नचनकेवलः पथिशब्दः स्त्रियामस्तीति युवोरनाकाविति सूत्रस्थभाष्यप्रामाण्यादेभ्यः क्यजन्तेभ्यः क्विपोनभिधानमिति वाच्यम् स्त्रीप्रत्ययावस्थातदङ्गीकारेप्युक्ततेः विभक्तौलिङ्गविशिष्टाग्रहणमित्येतत्प्रयोजनकथनावसरेहि भाष्येतदुक्तम् नयतीति ननुतदभावेपीह यङ्लुङ्लोमः। स्फविधावन्तर्वर्त्तिविभक्त्याश्रयनलोपस्यासिद्धत्वेन रुत्वलोन्ताङ्गाभावादितिवाच्यम् स्फस्वतद्यापधर्म्मनिमित्तकस्फविधेरेवग्रहणात् अतएवदण्डिष्वित्यादौ षत्वेन लोपस्यासिद्धत्वन्न नचन्यादेशोऽङ्गवृत्तपरिभाषयानेयङ् तस्यानित्यस्यानित्यत्वात् नचेयङि कृतेऽत्वं दुर्वारं सन्निपातपरिभाषयाऽव्यातिरिक्ततद्विघातस्यबाधेनादोषादितिभावः नचप्रकृतिप्रत्ययविशेषापेक्षन्यापेक्षयान्तरङ्गत्वाद्घणेवस्यादितिवाच्यम् प्रातिपदिकस्याप्यत्रप्रकृतित्वेनहत्वादेरपिनिमित्तत्वेनयणप्रकृतितन्निमित्तव्याप्यत्वाभावात् तदोः सस्सावितिसूत्रेऽनन्त्ययोरित्युक्त्यातत्प्रत्याख्यानायभाष्यकृतादस्यतियोगविभागकरणेनचतादृशान्तरङ्गत्वस्यनसर्वत्राश्रयणमितिबोधनात् सावात्वस्येति न्यादेशस्याप्युपलक्षणं यदिवेजात्यामात्रातिदेशा इतिवदेत्तत्राप्याह पथ्याइतीति न्यादेशेति अत्वस्याप्युपलक्षणम् नत्वादीति नचपदान्तेतिनिषेधः अनान्ततयात्वं नः क्से इति नियमेनसञ्ज्ञाविधौनलोपासिद्धत्वेनचेकारान्तपदत्वाभावात् एतेनपदान्तत्वादिकोऽसवर्णे इतिह्रस्वेत्रअत्व ५८
दुर्वारमित्यपास्तमितिभावः आश्रितत्वादिति तत्प्रकृतिकसाव्युरितिरूपेङ्गनिमित्तोपपरक्यजकारनिमित्तकत्वेहि क्विनिमित्तकलोपापत्तिः

ङ्गस्यनिमित्तकस्यतुबहिरङ्गत्वेनासिद्धत्वान्नलोपः स्थानिवत्त्वेहिव्यवधानात्तन्निमित्तकोपिनस्यात् अनुकूलत्वाच्चेति अत्वा
दिप्रवृत्तिप्रतिबन्धकन्यायानामनित्यत्वेनैतद्विषये प्रवृत्तिबोधकतयेतिभावः विशेषयितुमिति विशेष्यसाकाङ्क्षत्वात्तस्येति
भावः तत्सामर्थ्याच्चेति षान्तेत्यनेनविशेषणसामर्थ्यादितीत्यर्थः सङ्ख्याशब्देतदन्तत्वासम्भवादितिभावः इहेति अनुवृत्त
मितिशेषः सन्निपरमिति यद्यपिसान्निध्यबहुगणवतुडतिष्वपि तदसम्भवस्तथापिलोकेसङ्ख्याप्रकारकबोधजनकाः पञ्च
चादयइहतत्त्वेनविवक्षिताइतिबोध्यम् किमसिद्धत्वेनेति नलोपेकृतेपीत्यादिग्रन्थप्रतिपादितेनेतिभावः बाधे दूषणे अव
यवेनेति षान्तपदावयवेनषकारणकारेणेत्यर्थः समुदायेन षान्तपदेन ससम्बन्धिकः नित्यंसम्बन्ध्यन्तरसापेक्षः प
यागुर्व्वादिः सापेक्षोपि सापेक्षस्यासमासेहिततोबोधाभावोबीजम् नचनित्यसापेक्षेतद्बीजमस्तीतिभावः तदेवाह वाक्य
वदिति व्यपेक्षा आकाङ्क्षा अवयवान् गुर्व्वादीन् संस्पृश्ययुज्यन्तइत्यस्यतद्वाचकसम्बन्धेनयुज्यन्तइत्यर्थः उपसर्जनम्
स्वपदम् नसम्बन्धिकम् नसम्बन्ध्यंशेनित्यसाकाङ्क्षम् साकाङ्क्षोनित्यसाकाङ्क्षः ईषितव्यम् प्रजाभूम्यादि स
मभ्रकृतेपीति अन्ताशब्दस्यउपदेशकालम्प्रतिनित्यसाकाङ्क्षतेतिभावः सन्निपरत्वेत्यादि सङ्ख्यापदस्येत्यादिः।
अन्तग्रहणस्समाससम्पादनद्वारान्यपदार्थबोधकत्वेनतत्सम्पादकमितिभावः किञ्चानन्तग्रहणस्यतदर्थत्वेतस्यविशेषणता
तयासमस्यन्तत्वेनचपूर्वनिपातापत्तिः उणादीनामव्युत्पत्तिपक्षेप्रत्ययानांसमुदायानाञ्चोपदेशाभावेनत्वदुक्तार्थास
ङ्गतेश्चेत्यपिबोध्यम् उपदेशग्रहणंकर्त्तव्यमितिवार्त्तिकस्यतुस्वप्रकृतिकप्रत्ययोपदेशकालेषान्तेत्यर्थः त्वयातुसम
स्तान्तपदार्थभूतस्यउपदेशकालस्यतथान्वयोवक्तुमशक्यइतिस्पष्टमेवेदिक् हलीत्यपकृष्यतइति हलीत्युभयोःशेष
इतिभाष्योक्तेरितिभावः सन्निपातेति नान्त[illegible]अकसन्निपातेनजातस्यनुटस्तद्विघातकत्वमितितस्याः प्राप्तिः

लघुशब्देन्दु० अनित्यत्वादिति नचानुदितोपधायाइति दीर्घनलोपे चाष्टानामित्यस्याप्रवृत्तेः किमनित्यत्वेन नचनलोपस्यासिद्धत्वसन्निपातपरिभा
५९ षयाऽप्राप्तिः नलोपस्यासिद्धत्वेन तद्विषये तदप्राप्तेरितिवाच्यम् कृत्स्नेजन्तसूत्रभाष्ये सन्निपातपरिभाषादोषनिरूपणावसरे
गौरीत्यादौ सवर्णदीर्घलोपेपितस्यस्थानिवत्त्वेन ह्रस्वनिमित्तसन्निपातविघाताभावोक्त्यातिव्याप्तिपरभाष्यासङ्गतेः सन्निपातस्या
प्राशास्त्रीयत्वादस्यस्थानिवत्त्वमितिचेत्तत्रासिद्धत्वमपि कल्प्यमितिविभावय किञ्च पूर्वत्रकर्त्तव्येतदसिद्धत्वेपितत्रकृते तस्यासिद्धत्वमा
नाभावः अन्यथा हलीत्यस्यात्रासम्बन्धे परत्वादित्यमुत्रयः नित्यत्वाच्चेति कार्यकालपक्षेसञ्ज्ञायात्तत्तद्विध्येकवाक्यत
यापहुत्वावयोर्बहिरङ्गत्वंसमानमितिभावः अल्विधाविति बहुसञ्ज्ञाया अल्विधित्वेन तन्मूलककार्याणामप्यल्विधि
त्वमित्यभिमानः यदितुनान्तसङ्ख्यावाचकत्वसमानाधिकरणधर्मविशेषरूपस्य बहुत्वस्यालधर्मत्वाभावेन तत्प्रयुक्त।
कार्यस्य त्र्यादेरपि नाल्विधित्वमितिस्थानिवत्त्वेनैकदेशविकृतन्यायेन च जुहुसत्कलमस्तु हि मुख्येकार्यकालपक्षे तत्ति द्विर्हलीत्य
नुवृत्तेः फलमितिबोध्यम् अतम् हलादौ अनुमितम् जश्शसोः ह्रस्वव्यावृत्त्यर्थमिति ह्रस्वान्तोदात्तव्यावृत्त्यर्थमित्यर्थः
व्यर्थस्यादिति ननु सापितेव्यर्थमेव तत् अष्टाभिरित्यत्र सावकाशस्याष्टनइतिसूत्रस्याष्टाभिरित्यत्र परत्वाज्झल्युपोत्तममित्यनेन न
बाधेसकृद्गतिन्यायेन पुनाप्रवृत्तेरितिचेन्न दीर्घग्रहणेनैव सकृद्गतिन्यायानित्यत्वस्याविज्ञापनात् यद्वा अत्रपयोदेशपक्षएव
बहुत्वा ज्ञाप्यते तत्रात्वस्यबहिरङ्गतयाप्राक्बहुत्वेजाते नान्तबाचकत्वसमानाधिकरणधर्मरूपस्यबहुत्वस्यालधर्मत्वाभावेन स्वरा
देराल्विधित्वाभावात् स्थानिवद्भावेन एकदेशविकृतन्यायेनवाकारान्तस्यापि बहुत्वेन तत्रापि झल्युपोत्तममित्यस्यप्राप्त्याषट् =
स्वरस्यतदपवादत्वात् तत्रपक्षे भविष्यतिकिञ्चिदनेनप्रयोजनमित्यभिसन्धिमात्रेणैवसञ्ज्ञाप्रवृत्तेः प्रगृह्यसञ्ज्ञाप्रकरणे कैयटे ५९
नोक्तत्वात् स्पष्टञ्चेदं बहुसञ्ज्ञासूत्रेऽष्टनोदीर्घादितिसूत्रेचभाष्यकैयटयोः आकारान्तस्य बहुत्वेप्यौपविधिसामर्थ्यादष्टावित

नन्वेवाष्टावित्यत्राष्टनस्स्वरस्य चारितार्थ्यम् हलादित्वाभावेन षट्स्वरस्य तत्राप्राप्तेः न चैकादेशे व्यपवर्गाभावः स्वरात्
वै सन्धिकार्य्योप्रवृत्तेः एहीत्यत्राङ्निमित्तनिघातसिद्धये पद्वितु परमिति सूत्रे भाष्ये ध्वनितत्वादिति चेन्न एतज्ज्ञाप्यप्रामाण्या
देवाष्टन्शब्दस्य घृतादिपाठादन्तोदात्तत्वेनैकादेशोऽपि उदात्तेनोदात्त इत्येव तत्रान्तोदात्तसिद्धेः ननु त्रियाष्टाभ्यामित्यादावष्ट
नस्स्वरस्यावकाशः षट्स्वरविधायके विहितविशेषणाश्रयणेन समासे मोऽतो न तद्प्राप्तेः अत एव चतुरः शसीति सूत्रे त्रि
याम्प्रतिषेधो वाच्यः चतस्रः पश्य चतसृणामाद्युदात्तनिपातनात्सिद्धम् तन्निपातनेऽपि चतसृणामिति विभक्तिस्वरः सिद्धः ष
ट्त्रीति सूत्रे हलादिग्रहणेन निपातनस्वरस्य विभक्तिस्वराबाधकत्वज्ञापनात् आद्युदात्तनिपातनेऽपि हलादिग्रहणानर्थक्यम्
म् न चान्यद्धलादिग्रहणं प्रयोजयति अन्यदत एव चतसृशब्दादिति भाष्योक्तेः सङ्गच्छते अन्यथा त्रियाष्टानामित्यादेः सम्भवे
न तदसङ्गतिः अष्टापरमाष्टा इत्यादेरेकादेशस्वरेणासिद्धेः न चैकदृष्टावित्यादिव्यावर्त्यम् सङ्ख्याप्रकारकसङ्ख्येय
विशेष्यकबोधजनकतयोत्तरपदार्थप्रधानसमाससमुदायस्यापि षट्त्वात् स्पष्टश्चेदं सर्वादीनीत्यत्र भाष्ये [illegible]
ततो विहितत्वाच्चेति वाच्यम् एतज्ज्ञाप्यप्रामाण्येन तदनभिधानादिति चेन्न एतज्ज्ञापकपरभाष्यप्रामाण्येन तदनभिधानादिति चे
न्न एतज्ज्ञापकपरभाष्यप्रामाण्यादष्टन इत्यस्यापि विहितविशेषणाश्रयणेन समासेऽप्रवृत्तेः त्रियाष्टादीनामनभिधानस्य
षट्सञ्ज्ञासूत्रे भाष्ये स्पष्टत्वाच्च तिसृभ्यो जस इति सूत्रस्यैनोपसमृत्तार्थमेक इति भाष्येण तुल्यन्यायात् षट्स्वरस्यापि तदन्ते
प्र वृत्तेरुक्तत्वाच्च चतुरः शसीति सूत्रस्थं तु वार्त्तिकं जस्ग्रहणानर्थक्यमन्यत्रापि भावादिति तिसृभ्य इति सूत्रस्य वार्त्तिकवद्दूष
णीयम् एके इति च मुख्यार्थमिति दिक् प्रतिपदोक्तमिति संयोगादिलोपस्साहचर्य्याल्लुक्त्वस्यैवेति भावः प्रत्याख्यातमिति तदेक
वाक्यतया ऽत्रानित्यत्वेन लाक्षणिकप्रतिपदोक्तपरिभाषासाहचर्य्यपरिभाषयोरप्रवृत्तिरिति भावः प्रत्याख्यानेन च स्पष्टार्थमे

ष्टोवतयोरूपादानं नतु फलान्तराभिनिवेशः कार्य्य इति लक्ष्यते प्रत्याख्यानसम्भवेनेति उक्तरीत्या भाष्य ध्वनिततात्त्वय हलो
त्यादिः णत्वग्रहणोतिवा पञ्चमीसमासेऽइति अपरविधाविति वक्तव्यमित्यर्थः परस्मिन्निति सूत्रस्य वार्त्तिकव्याख्यानावसरे कैयटे
न ध्वनितेत्यर्थः वस्तुतस्तदयुक्तमिति प्राङ् निरूपितम् तत्प्रत्याख्यानमभ्युपेत्यापि समाधत्ते फलेवक्ष्यायेति प्रत्याख्यानस्यापु
क्तत्वन्ध्वनयन् पञ्चमीसमासपक्षे लक्ष्यासिद्धिं प्राङ् कृते निष्ठायामिति सेड्ग्रहणादिति तत्र हि सेड्ग्रहणं नानिड्व्यावृत्त्य
र्थम् णिजन्तात्तदसम्भवात् न च क्तपः सनीवन्तेत्युद्विकल्पात्सम्भव इत्यादौ यस्य विभाषेतीति निषेधतः सम्भवतीति वा
च्यम् यस्य विभाषेत्यत्रैकाच इत्यनुवृत्तेः अन्यथा दरिद्रातेरपि सनि विकल्पिते इट्वेन दरिद्रित इतीण् न स्यात् वा दान्तसूत्रे ज्ञ
प्ता इति निपातनेनेड्भावस्य णिलोपस्यापि निपातनाच्च तस्मात्त्र्योगविभागेन कालावधारणार्थमिति कृते एव णिलो
पो न तु ततः प्रागिति अन्यथा कारितमित्यादौ परमपि टम्बाधित्वा नित्यत्वाण्णिलोपे एकाच इतीण्निषेधः स्यात् सर्वस्माद्धि धा
स्थानिवत्त्वस्य प्राप्त एव निषेधो णिचा व्यवधानादिति भावः ... एकाच उपदेश इत्यत्र विहितविशेषणपक्षे सेटीति चिन्त्यप्र
योजनमित्युच्यते तदा प्रविगणय्येति भाष्योदाहरणादेव तदनित्यत्वम् अन्यथा ल्लोपस्य स्थानिवत्त्वान्नापि लघुपूर्वादिति
णेरयादेशो न स्यात् ल्यपीति सूत्रं प्रशामय्येत्यादौ चरितार्थमिति दिक् स्पष्टमिति वस्तुतस्तु षड्भ्यो लुगित्यतः साहच
र्य्यादस्य गोणोर्न प्रवृत्तिः तस्य च विहितविशेषणाज्ञेणेऽप्रवृत्तिरिति सूत्रे भाष्ये स्पष्टम् गोणो श्रोणो प्रवृत्तौ तज्ज्ञाप्यत्वमपि
नेति बोध्यम् इत्येव स्यादिति यद्यपि हलीत्यपकर्षपक्षे श्विपाष्टाविति न सिध्यति श्विपाष्टान इति प्राप्नोतीति भाष्ये उक्तं तथापि श्र ५९
पकर्षभावेप्याश्वस्य वैकल्पिकत्वात् श्विपाष्टान इत्यस्य दुर्बारत्वेन यद्यास्कृत भाष्यासङ्गतेरेव गमितया तद्व्याख्यातम् श्विपाष्टा
तीति अचावादेशो वकारस्य लोपः शाकल्यस्येति लोपोऽत्र गोणत्वेप्यत्र प्रवृत्तौ हि भाष्यासङ्गतमेवेति भावः कैयट इति अत्रा

स्त्विवीजन्तु यथालक्षणमित्यस्य तत्कृतानेव वालक्षणम प्रयुक्तेवर्त्तेते अप्रयुक्तानामेवलक्षणेनान्वाख्यानादिति द्वितीय
व्याख्येवयुक्ता आद्यव्याख्यायामप्रयुक्ते इति वाक्यशेषासङ्गतिः अप्रयुक्तेपि लक्षणानतिक्रमसत्त्वात् अप्रयुक्तानामिद
मन्वाख्यानमि त्यभियुक्तोक्तिविरोधाच्च यथालक्षणमित्यस्याप्रयुक्ते लक्षणाभावस्यैवयोग्यता नतुलक्षणाप्रवर्त्ते
रित्यक्षरार्थः किञ्च भाष्यकारस्य लक्ष्यैकचक्षुष्कतयैवव्याख्योचिता एकस्यैवप्रयोगस्य भाष्यफक्किकाव्याख्यानभे
देनसाधुत्वासाधुत्वयोरनौचित्याच्च तस्मादत्रत्यंमूलंटीकाचैवंव्याख्यातंकैयटाद्यनुरोधेन वस्तुतः त्रिपाद्यादी
नामनभिधानमेवेतिदिक् आत्वस्याभावाद्दोषत्व ति अत्रवृत्तिकृताऔश्राभावादात्वन्नेति वक्तुंयुक्तम् अप्यमेक
वचनमिति हल्ङ्यादिलोपात्परत्वादात्वेसोर्लोपाप्राप्त्या रुत्वविसर्गौ नचलोपोन्तरङ्गः प्रकृतिप्रत्ययोभयसापेक्षत्वे
नसमत्वादित्यभिमानः नलोपाभावस्त्विति कुञ्च धातुर्नोपध इति सम्मताकारीयधातुवृत्त्यनुसारेणेदम् पाश्चेतिसू
त्रभाष्यात्तु अपञ्चोपध इतिलभ्यते तत्रहि कुञ्चेत्यत्र कुत्वमाशङ्क्य कुञ्चामिति अत्र क्विगादिसूत्रस्यनिपातनात्सिद्धमित्यु
क्तं तस्य नकारजत्वेनुपरसवर्णोसिद्धत्वात्कुत्वाप्राप्तौ भाष्यासङ्गतिः निर्द्देशेनचयोगेकुत्वाभावोनिपात्यते इति कु
ङित्यादौ कुत्वमभवत्येव तदानलोपस्यप्राप्तिरेवनेतितत्त्वम् उच्चारणार्थ इति ननु तदित्संज्ञाप्रयुक्तकार्यभावयम
तोविशिष्यतस्यनोक्तता उच्चारणसहायसम्पादनेनवर्णोच्चारणस्यचारितार्थ्यं विधेयेतदपगममात्रफलिकातुसा
स्त्येवेति नतस्यलोप इतिसूत्रस्यभाष्यविरोध इतिबोध्यम् कुत्वस्यासिद्धत्वादिति चोःकुरिति कुत्वस्येत्यर्थः इदंसर्वंन्या
यसिद्धार्थकथनमात्रम् परत्वादिति हल्ङ्यादिलोपादित्यादिः असन्निहितत्वादिति स्वौर्ग्रहणसामर्थ्येनेकाचोवप्रा

लघुशब्देन्दु० इत्यतस्तान्निवृत्तेर्न्निर्देशादेशप्रकरणे न विच्छेदाच्च एतेनात्रैव चोरिति वक्तव्यं तत्रैव वा किन्त्वत्यपस्येति वक्तव्यम् एवञ्चकु
ग्रहणमव्यर्थमित्यपास्तम् चोरित्यस्य तत्सम्बन्धादन्तदसम्बन्धाच्च निष्फलत्वाच्चेति सिद्धान्तिसम्मतफलाभावादित्यर्थस्तु
६० क्लृप्तत्वादाह अतिव्याप्तेरिति लुप्तषष्ठीकमिति एतेनोपसर्जनस्य सविशेषणत्वात्समासानुपपत्तिरित्यपास्तम् परान्तोऽह
लिचयोस्कोः संयोगादीतयोः श्रोपइति न सूत्रार्थः संयोगादित्वस्य पदान्तत्वस्य चैकस्मिन्नसम्भवात् तदपवादस्येति
सूत्रद्वयविहितत्विनपवादस्येत्यर्थः तत्र मन्त्रे इति सूत्रे उपपदानां धातुनाञ्च पृथक्पाठे कर्त्तव्ये समुदायोच्चारणमला
क्षिताकानां निपातनार्थं तत्र श्वेतवाहादेः कर्त्तृवाचिन्युपपदे वहेः कर्म्मणि प्रत्ययः उक्थे कर्म्मणि करणे चोपपदे शंसेः प्र
त्ययो नलोपश्च अस्य नलोपेपि न वृद्धिः उक्थशासशब्दस्य सामान्येन डः सिद्धो न तस्य निपातनं क्रियते इति भाष्येण
त तत्रैदंभावस्यापि निपातनात् दाशृ दाने इत्यस्मा[illegible]त्पुरः पूर्वकात्प्रत्ययः कर्म्मणि दाशृ आदेर्डेत्वञ्चेति वहियज्यो
रिति शंसेरप्युपलक्षणमिदम् किञ्चोक्तभाष्यादुक्थशासित्युच्चारणमपिशाचामसङ्गतम् न च डस्य न विधेयः
अवयाः श्वेतवाः पुरोडाश्चेति पदान्तविषये सुत्वेरूपसिद्धिरिति वाच्यम् वृद्धौ अतः परत्वाभावे नोत्वानापत्तौ श्वेतवो
भ्यामित्याद्यसिद्ध्यापत्तेः अप्रवृत्तेरिति ननु पदान्तविषये वा सरूपन्यायेन ण्विन प्राप्तिनिपातनञ्चेदमुभयोरत एव
तप्रकरणेऽवयाइतिसूत्रस्य पाठः अन्यथाऽवयनोससजुषोरुरिति रुत्वे सिद्धे दीर्घमात्रस्य निपातनात्तत्प्रकरण एव
कृतं स्यादिति चेन्न डस्य वक्तव्यः किम्प्रयोजनं वर्णार्थम् क्रियतेर्वर्णो निपातनम् अवयाः श्वेतवा इति तत्र वक्तव्यम्:
वर्ण्यं तद्वक्तव्यं डसार्थमेपि सम्बुद्धौ दीर्घार्थम् तर्हि डस्त्व वक्तव्यः ङि सम्बुद्धौ वक्तव्यः श्वेतवोभ्यामिति भाष्यविरोधात् अन्य ६०
थात्विन्यस्येरुत्वार्थमपि तस्यावश्यकत्वेन सम्बुद्धौ दीर्घार्थमिति भाष्यस्य निर्दूलत्वापत्तिः तस्मादत्र वार्त्तिकमनपेक्षाप

रूपाप्रवृत्तिः क्वादिष्विव व्यवस्थितविभाषयाऽङ्गीकार्य्या इग्वकारलोपस्त्वनुसूत्रकृताऽसोऽकरणात् कृतां त्विनन्तोऽर्हत्वमा
त्रस्यैव तदिष्टत्वात् श्वेतवाम्यामिति प्रयोगस्तु सूत्रकृन्न जानात्येवेति स्पष्टम्भाष्यविदाम् केचित्तु णिनि आदेशोऽसश्वेतवहा
दीनान्डस्पदस्येति वार्त्तिकात् एतत्सम्बन्धिनो णिनः प्रत्ययस्य डस्तदन्ते पदत्वस्य भावित्वे इति तदर्थः अतएव वृत्तिकृ
तात्विनन्त्यत्र कम्प श्वेतवा इत्युदाहृतमेव ञ्च वासरूपस्यात्र विषय एवनेत्याहुः परत्वादिति नित्यत्वन्तु नात्वस्य शब्दान्तरप्रा
प्तेः सत्वंस्यादिति उभयोरपीतिभावः असोलाक्षणिकत्वेनात्वसन्नास्येत्यस्य न प्रवृत्तिः नच प्रत्ययविशेषापेक्षसत्वापेक्षया
न्तरङ्गत्वात्स्त्वत्रूपसिद्धेरिदमुपर्यन्ता इहशास्यान्तरङ्गत्वस्यात्र शास्त्रेऽनाश्रयणज्ञापनार्थत्वादतएव भाष्ये इहशामन्तरङ्गत्वं नक्वा
प्याश्रितम् पुनः प्रसङ्गेति कृताकृतप्रसङ्गित्वमात्रेणानित्यता साचसुवचा शब्दान्तरप्राप्त्यानित्यत्वमभ्युपेत्य प्रवृत्तम्
भिधानात्तत्स्यादेवेत्युक्तानवक्तव्यमथ यद्यहृताम्भावे विधानादित्युक्तम् अनेन हि भाष्येणोभयत्र शक्तोऽन्य एव लभ्य
ते तत्र वचनारम्भे एषाम्प्रयोगाणामुपपत्त्यभावात् प्रत्याख्यानेपीदृहर्युक्तरीत्या सनादिसूत्रस्थभाष्यसम्मततया भाव
एवोचितः एवञ्च कैयटोक्तम् क्षुधस्त्वति हन्तुं शक्यमित्यप्यसाध्वेव वचनारम्भेऽसिद्धेः तुमुनाद्यन्वयिक्रियानिरूपितशक्ते
रयम्स्वभावो यत्स्वसमानाधिकरणगुणानुरूतनुमुनादिप्रकृत्यर्थनिरूपितशक्तेः स्ववदभिहितत्वेनानभिहितत्वेन वा प्रका
श इति सुधियो विभावयन्तु छिन्धि अन्यतरेणास्सहेति इदन्त्व प्रागुक्तवस्तुतस्त्वित्यादिरीत्योक्तम् तद्वदेवेति बोध्यम् मेवमि
ति ग्रामङ्गच्छतीत्यादौ ईप्सिततमत्वोपलक्षितमुद्देश्यत्वमस्त्येव एतत्सूत्रबोध्यकर्मत्वशक्तेरुद्देश्यता सामानाधिकर
णत्वात् अत एव कर्मणायमभिप्रैति इति सूत्रे कर्मणोत्स्याभावे गान्ददातीत्यत्र गोरप्युपदेश्यतया तत्रैव पर्यायेणास्य

सं०श०र० प्रदानसञ्ज्ञास्यादितिभाष्यकेयदोक्तम्सङ्गच्छते चतुर्थ्यानुद्देश्यत्वम्वाच्यम् तत्समानाधिकरणशक्त्यैवेतिसर्वसम्मतमि
तिभावः फलान्तरमप्याह अग्नेरिति ईप्सिततमपदाभावेवारणार्थानामित्यस्यैतदपवादत्वापत्तेः नचाग्नेरुत्तमत्वादिता
७७ र्थः तस्यापितदुपस्थाप्यसम्योगरूपफलाश्रयत्वा वारयतेश्चसम्योगाद्यनुकूलव्यापाराभावानुकूलव्यापारोऽर्थः
तत्रापीप्सितश्शब्दः क्रियाशब्दएव ईप्सिततममित्युक्तौईप्सितमात्रेसावकाशस्यपरत्वादीप्सिततमेनबाधः ईप्सिततम
त्वञ्चप्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वात् अतएवाग्नेर्नोद्देश्यत्वप्रतीति
स्तत्रेतिभावः नत्वावश्यकमिति दुष्यसङ्कल्पोपिव्याख्यानादेवभविष्यतीतिभावः तस्यापिईप्सिततमभिन्नत्वात् एक
रूपएवेति इच्छाविषयत्वानिच्छाविषयत्वभानकृतवैरूप्यरहितइत्यर्थः तदाह ईप्सानीप्सादेरिति इच्छाविषयत्वा
निच्छाविषयत्वयोः आदिनाईप्सागतप्रकर्षस्येत्यर्थः उपयोगेपीति स्वरूपतः सत्त्वयेतिभावः तदुपलक्षितमुद्देश्य
त्वादिकन्तुभासतएवतदाह अनन्यलभ्यस्यैवेति भासमानोद्देश्यत्वतदभावाभ्यांअर्थतइच्छाविषयत्वादिलाभादि
तिभावः आधारवाचिकेति इदमुपलक्षणम् दिवोयोगेकरणवाचकत्वात्कर्तुरीप्सिततममितिलक्षणेविशिष्टस्य
प्रवेशात् अप्राप्तिकर्तृर्बैवशकामत्विरूपतआह क्रियायाइति फलस्यव्यापारस्यचेत्यर्थः देवदत्तादिशब्देरिति आ
दिनातिङ् नन्वेवमाधारस्यधर्म्मिणोपिप्रकृतालाभः आधारत्वेनालाभइत्यस्याधारत्वललब्धमित्यत्रैवपर्य्यवसा
नात्तस्यैवशक्तिविशेषरूपस्यवाच्यत्वमुक्तम् तस्यधर्म्मिसाकाङ्क्षत्वाद्विशेषणत्वञ्चयुक्तमितिचिन्त्यम् अभेदइति ७७
विशेष्यविशेषणभावइत्यर्थः वाक्यार्थइति हरिम्भजतीत्यत्रेतिशेषः फलमिति कर्त्तुरीप्सादिविहितकर्म्मसञ्ज्ञकवि

षयेफलमित्यर्थः व्यापारइति कर्तृविषये स्वाश्रयेति स्थाल्यांपचतीति तण्डुलमित्यत्रकर्म्मद्वाराधिकरणम् भूतलेदेवदत्तः
पचतीत्यादौकर्तृद्वाराधिकरणम् फलीभूतेति पदजन्योपस्थितावविशेषितत्फलभूतेशाब्दबोधेइत्यर्थः इदमुपलक्षणम्
सञ्ज्ञापार्थस्यनिमित्तत्वेतत्तत्सञ्ज्ञाप्रकारिकैवोपस्थितिरितिकर्म्मत्वादिनैवोपस्थितेः तत्रापिवैलक्षण्यमस्तीत्यत्रविस्तरः
तन्निष्ठधर्म्मस्येति आधारेतरावृत्तित्वेसतिसकलाधारवृत्तित्वरूपस्येत्यर्थः आधारतातुशक्तिविशेषरूपाखण्डैवेत्याशयः न
त्वाधारतैवनिरूपकाश्रयसम्बन्धभेदेनभिन्नाश्रयतात्वमखण्डमितिनगौरवमतआह कर्म्मणीति लोकेकर्म्मादिपदाना
धर्म्मिपरतायादृष्टत्वेनसूत्रेपितत्परतैवोचितेतिभावः आधारस्यशक्तत्वेऽनन्ताधारतानामाधारतात्वेनानुगमनानन्तशक्त्या
नन्त्यमितिबोध्यम् कर्म्मादयोपीति अपिनासङ्ख्या स्वत्ववदेवात्रापिकर्म्मपदस्यधर्म्मिपरता शक्तिरप्येतैर्धर्म्मभेदमापन्नै
र्वाच्यतइतिबोध्यम् सङ्ख्याचेति चेनकर्तृकर्म्मणो वैरूप्यापत्तेरिति कृद्विषयेधर्म्मिपरता तिङ्विषयेधर्म्मपरतैवेतिवैरूप्या
पत्तेरित्यर्थः कृतान्धर्म्मिवाचकत्वेबीजमाह पाचकइत्यादि स्वीकारादिति कृतामितिशेषः प्रपञ्चितमिति ल्यादेशशास्त्रादेत्ति
ऽज्ञवैषम्यम् सर्वथानुपपादमित्यादीतिभावः तेननटस्येति अपादानादिविशेषैरविवक्षाच प्रशक्तस्यबुद्धिपूर्वमविवक्षा
सर्वथाप्रसक्त्याविवक्षाचेत्युभयविधापिगृह्यते प्रकृतेचान्त्या गीतइत्यारातस्याख्यातोपयोगइतिशास्त्रोपन्यस्तम् क्रियाजनकत्व
म् नचतस्यकर्म्मयुक्त्याभावः तदंशस्यापिपरिगणनलभ्यत्वात् नचनटान्निस्सरन्शब्दःकृत्लातीत्यर्थात् प्राप्तापादानत्वावि
वक्षैवात्रेतिवाच्यम् आख्यातोपयोगेइतिसूत्रेउपयोगग्रहणतोनानुपयोगेआख्यातुरीदृशलक्षणायापादानत्वस्याभिष्टत्वबो
धनादितिभावः गोसम्बन्धीति गोकर्म्मकम्पयःकर्म्मकञ्चेत्यर्थः तत्रपयसएवदुग्धिततमत्वे आह तथायुक्तमिति त्यजनोपदु

ल०श०र० र्जुनमिति गोपयस्त्यजति गवापयस्त्सर्जयतीतिप्रतीतेरितिभावः न्यायसिद्धतयेति व्यापारद्वयार्थत्वेनोक्तसूत्रद्वयसिद्धतयेत्यर्थः
प्राचाम् हेतुमतिसूत्रेभाष्यकृताम् परत्वादिति ग्रामादायातीत्यादौसञ्ज्ञान्तराप्राप्त्यावपादानत्वंसावकाशम् कर्म्मसञ्ज्ञातुया
७८ मङ्क्षुच्छतीत्यादौ भाष्यमिति एतच्चभाष्यन्नाकथितञ्चेतद्विषयम् अस्यापादानत्वाविवक्षायाम्प्राप्त्यापरत्वादित्युक्त्यसङ्गतेस्त
द्धूनयन्नाह पञ्चकमित्यादि अवधित्वेत्यादि कर्म्मत्वापादनत्वशक्त्योरित्यर्थः ईदृशेचविषयेआकडारसूत्रतद्भाष्यवलादुभ
योरविद्धितीयैववोधिकेतिभावः इतिस्थितमिति प्राचाङ्कृयेदृतिशेषः अत्रारुचिवीजन्तु यदापयोनिष्ठविभागानुकूलोव्यापार
एवधात्वर्थस्तदाअपादानत्वविवक्षायामन्येनासिद्धेः कर्म्मत्वार्थमिदमावश्यकम् एवमन्येष्वपि किञ्चकर्त्तुरित्यपिषष्ठ्यापवा
दएव तदभावेपितद्विषयेपिषष्ठ्याएवप्राप्तेः अतएवषष्ठ्यपवादत्वमात्रेणानसम्बन्धत्वेन वोधकतोचिता तस्मादत्रापिक्रिया
जनकतासमानाधिकरणकर्म्मत्वशक्तिमत्वेनैववोधइत्येवोचितम् व्यापारद्वयार्थत्वेकर्त्तुरीप्सिततममित्यनेनाप्यद्धिकर्म्मक
त्वमस्त्येव यथाप्रयोगम्बहूनान्धातूनाम्

इत्यपि बोध्यम् अतएवैकसंज्ञाधिकारे संज्ञयोर्बाध्यबाधकभावादेव अहङ्कारादीति आदिना शरीरम् विभक्त्युप
५२ स्थितानामिति विभक्त्यर्थसंसर्गत्वमते तदलोपस्थितानामित्यर्थः व्युत्पासइति तद्व्युत्पासेनैव धातुतस्तदुपस्थितिरित्यर्थः
तत्र व्यापारजन्यफलमेव धात्वर्थ इति भावः तद्दिष्टापत्तीति कृत्यकृत्यर्थक्रियायामपि कारकाणामन्वयादिति भावः तत्रै
वमानमाह कर्त्रित्यादि यत्तु भवतिक्रियायाम्प्राथमिकान्वयेन तत्तद्विभक्त्योक्तत्वेन पार्ष्ठिकान्वयात्तेषामनभिहितार्थमिति
तन्न भवतिक्रियायाङ्कर्तृत्वेनान्वये कर्त्तुरुक्तत्वात्तृतीयानापत्त्या हरिणा त्रात इत्यसिद्ध्यापत्तेः करणत्वेनान्वये पार्ष्ठिक
स्यापि हरिकर्त्तृकत्राणकर्म्मणो बोधनापत्तेः कर्त्तृतृतीयान्तेन समासविधायकासङ्गतेश्च यत्कर्त्तृककृतिकर्म्मवि
शिष्टमिति विग्रहवाक्यजबोधाद्भिन्नबोधस्वीकारे न मानमित्यत आह षष्ठ्यर्थेति आह्नुतीति इदञ्च यथायोगं सर्वविभक्त्यपवा
दः नाम्नेति नामसम्बन्धितीक्ष्णत्ववानित्यर्थः करणशब्दानुवृत्त्येति एकसंज्ञाधिकारेण चेति बोध्यम् ननु मनसा देव इत्यस
ङ्गतम् ५ कृद्योगलक्षणषष्ठीप्राप्तेः न च कर्त्तृसाहचर्यात्तत्र मुख्यव्यवहारेण धात्वर्थाश्रयस्यैव कर्म्मणो ग्रहणम् अतएव स्तोक
म्पाक इत्यादौ षष्ठी नेति वाच्यम् धात्वर्थभेदेनान्वयिकर्म्मग्रहणेनैव तदुपपत्तावत्राग्रहणे मानाभावात् ध्वनितञ्चेदमाकडारसू
त्रे कैयटे तादृशसंज्ञासत्वे दृढतरमानाभावश्चेत्यरुचेराह किञ्चेति कर्म्मत्वन्नेति न च वैकल्पिकत्वेप्युत्पन्नाविद्यमानकर्म
त्वाभावसिद्ध इति वाच्यम् तत्रोत्पन्नाविद्यमानकर्म्मकाणामेव ग्रहणे मानाभावस्यान्यत्र निरूपितत्वादिति भावः फलान्तर
माह अणाविति दीव्यन्त्यक्षैर्देवदत्तेनेति भावे लकाराभावः फलमित्यपि बोध्यम् कारणत्वाच्चेति तृतीयेति समावेशफलम्
द्वितीयेतीति अक्षान्दीव्यतीत्यत्र अक्षपदस्याजेयधने लक्षणा न च तत्र करणत्वम् अक्षैरित्यर्थे अक्षानिति न भवतीत्यस्ये

इत्यपि बोध्यम् अत एवैकसञ्ज्ञाधिकारे सञ्ज्ञयोर्बाध्यबाधकभावादेव अहङ्कारादीति आदिना शरीरम् विभक्त्युप
५२ स्थितानामिति विभक्त्यर्थसंसर्गत्वमतेतदलोपस्थितानामित्यर्थः प्रत्यासइति तद्घ्यासेनैव धातुतस्तदुपस्थितिरित्यर्थः
तत्रव्यापारजन्यफलमेव धात्वर्थ इति भावः तदिष्टापत्तीति कृत्यकृत्यर्थक्रियायामपिकारकाणामन्वयादिति भावः तत्रै
वमानमाह कर्त्रित्यादियत्तु भवतिक्रियायामप्राथमिकान्वयेन तत्तद्विभक्त्योक्तत्वेन याष्ठिकान्वयानेषां चारितार्थ्यमिति
तन्न भवतिक्रियायां कर्तृत्वेनान्वये कर्त्तुरुक्तत्वात्तृतीयानापत्त्याहरिणात्रात इत्यस्य सिद्ध्यापत्तेः करणत्वेनान्वये यार्ष्टिक[illegible]
स्यापि हरिकर्त्तृकत्राणकर्मणो बोधनापत्तेः कर्तृतृतीयान्ते[illegible]न समासविधायकासङ्गतेश्च यत्कर्तृकं कृतिकर्मवि
ध्वमिति विग्रहवाक्यजबोधाद्भिन्नबोधस्वीकारे न मानमित्यत आह षष्ठ्यर्थेति आहुतीति इदञ्च यथायोगमसर्वविभक्त्यपवा
दः नाम्नेति नामसम्बन्धितीक्ष्णत्ववानित्यर्थः करणशब्दानुवृत्त्येति एकसञ्ज्ञाधिकारेणचेति बोध्यम् ननु मनसादेव इत्यस
ङ्गतम् ५ कृद्योगलक्षणषष्ठीप्राप्तेः न च कर्तृसाहचर्यात्तत्र मुख्यव्यवहारेण धात्वर्थाश्रयस्यैव कर्मणो ग्रहणम् अत एव स्तोक
म्पाकइत्यादौ षष्ठी नेति वाच्यम् धात्वर्थभेदेनान्वयि कर्मग्रहणेनैव तदुपपत्तावत्र ग्रहणे मानाभावात् ध्वनितञ्चेदमाकडारसू
त्रे कैयटे तादृशसञ्ज्ञासत्वे दृढतरमानाभावश्चेत्यरुचेराह किञ्चेति कर्मत्वन्नेति न च वैकल्पिकत्वेप्युत्पन्नाविद्यमानकर्म
त्वाभावसिद्ध इति वाच्यम् तत्रोत्पन्नाविद्यमानकर्मकाणामेवग्रहणे मानाभावस्यान्यत्र निरूपितत्वादिति भावः फलान्तर
माह अणाविति दीव्यन्तेक्षैर्देवदत्तेनेति भावे लकारभावः फलमित्यपि बोध्यम् कारणत्वाच्चेति तृतीयेति समावेशफलम्
द्वितीयेतीति अक्षान्दीव्यतीत्यत्र अक्षपदस्याजेयधने लक्षणा न च तदा करणत्वम् अक्षैरित्यर्थे अक्षान् इति न भवतीत्यन्ये

ल०श०र० एकैवस्वत्रशक्तिरिति द्विधात्वर्थनिरूपितसाधकतमत्वशक्तिरित्यर्थः सहयुक्तेः अत्राप्राधान्यन्नामशाब्दगुणाद्यन्वयित्वाभा
वइत्याह पितुरवेति आर्थइति पुत्रसाहित्यस्यात्पितायागत इतिबोधेनसाहित्यस्य पुत्रेणागमनसम्बन्ध एवमश्चवइतिपश्चा
८३ त्तस्यापिमानसत्त्वात्सम्बन्धबोधइतिभावः शाब्दत्वञ्चविवक्षानिबन्धनम् एवञ्चैषुशाब्दत्वरूपविशेषणाभावकृतोविशिष्टा
भावः सहैवपुत्रैर्दशभिर्भारंवहतीत्यादौक्रियमानतावाचिसहशब्दयोगेक्रियाद्यन्वयित्वरूपविशेष्याभावकृतोविशिष्टाभा
वोदशानाम्पुत्राणाम्ध्रियमानत्वेपीत्यर्थइत्यन्यत्रविस्तरः अन्तरङ्गत्वादिति प्राचीनैरन्तरङ्गत्वम्मूलकतयोक्ताउपपदविभ
क्तेरितिन्यायादित्यर्थः वस्तुतस्तद्वाचनिकमेवेत्यन्तरङ्गत्वन्तन्न्यायोपलक्षणम्बोध्यम् प्रथमायाश्चकारकविभक्तित्वमन
भिहितेपादेभाष्येवहुशः स्पष्टम् अन्यत्रप्रपञ्चितञ्च अन्तरङ्गत्वन्तुनयुक्तम् षष्ठ्यपवादत्वमिवप्रथमापवादस्याप्यु
पपदविभक्तीनामापत्तेः अनन्तरस्येतिन्यायेनप्रथमापवादत्वस्येवापत्तेः उपपदविभक्तेरितिन्यायेनचवाचनिकेस
र्वतोवलवत्वेकारकविभक्तेर्वाधितेऽर्थाच्छेषषष्ठ्यपवादत्वमुपपदविभक्तीनामवतिष्ठते किञ्चोपपदविभक्तेःपदान्त
रनिमित्तकत्वात्कारकविभक्तेः क्रियानिमित्तकत्वात्तत्वन्दुरुपपादम् नचसम्बन्धस्यक्रियाकारकभावमूलकत्वेनतत्प्रयु
क्तङ्कार्य्यम्बहिरङ्गम् पुत्रेपितृत्तीयानापत्तेरेकक्रियाकर्तृत्वमूलकत्वात्साहित्यस्य क्रियायाप्राधान्यात्तन्निमित्तेकाविभ
क्तिः प्रवलेत्यपिनयुक्तम् अप्रधानक्रियायामपिकारकान्वयदर्शनात्तदेवधनयन्नाह इत्यादौकारकविभक्तेरिति अत्रा
दिनापुत्रेणागतपितेत्यस्यसङ्ग्रहइत्यलम् अर्शआद्यजन्तइति व्याख्यानादितिभावः अन्यथायेनगुणेनकरणत्वादिना ८३
अवयवस्यविकारोलक्ष्यतेइत्यर्थोपस्याऽक्षिकाणमस्येत्यादौप्रथमाम्बाधित्वागुणवचनात्कारणशब्द देरेवस्यात् अक्ष्णा

कारणइत्यादौतुषष्ठेवस्यादितिबोध्यम् प्रकृत्यर्थेति अर्श आद्यचप्रकृतेरेवस्येत्यर्थः शरीरस्यैवत्वमुपलक्षणम् सम्भवती
ति लक्ष्यस्सम्भवतीत्यर्थः इत्यादीति आदिनागुणक्रिये एवञ्चत्रितयसाधारणंहेतुत्वम् नियतक्रियमिति क्रियानिमित्त
मित्यर्थः क्रियामात्रविषयमितियावत् हेतुकारणयोर्वैषम्यान्तरमप्याह अनाश्रितेत्विति एवञ्चकरणंहेतुत्वविषय त्व
शाब्दबोधवाधायस्तत्रद्वयमित्यर्थः विकल्पतइति तदर्थत्वेनविवक्षायाञ्चतुर्थ्याहेतुत्वेनविवक्षायान्तृतीयायाश्चप्राप्ते
र्विवक्षाभेदेनविभक्तिद्वयमित्येतावतातयोर्विकल्पव्यवहारइतिबोध्यम् फलेनसहेति तच्चफलम्फलत्वेनतृतीयार्थइत्ये
केहेतुत्वेनैवान्ये अध्ययनहेतुकोवासइतिबोधस्तृतीयायाम् चतुर्थ्यामध्ययनोपकारकोपवासइतिबोधइतिमतेइदम्
अध्ययनोपकार्यकोवासइतिबोधश्चतुर्थ्यामितिमतेतत्राप्यभेदभानमेवेतिबोध्यम् गम्यमानेतीति श्रमेणेत्यादिपदज
बोधविषयेत्यर्थः स्पष्टञ्चेदंसहयुक्तइत्यत्रभाष्ये तदाह नतुश्रूयमाणेति श्रूयमाणत्वमात्रवाचकपदजन्यबोधविषये
त्यर्थः ज्ञाप्यतइति चतुर्थ्यर्थविहिततृतीयायुक्ताद्दाणआत्मनेपदमित्यर्थः साचेदित्यनेनतस्याः काचित्कत्वञ्ज्ञाप्यते
तेनाशिष्टव्यवहारेइत्यंशोपिसिद्धइतिभावः ॥ ० ॥ इतितृतीया ॥ ० ॥ अपुनर्ग्रहणायेति इदञ्चस्वत्वनिवृत्तेर्वाच्यतास्वीका
रफलकप्रदर्शनन्तुधात्वर्थनिविष्टमितिबोध्यम् भाक्तइति अधीतीकरणात्मकेत्यर्थः नशूद्रायमतिन्दद्यादित्यत्रम इ
तिन्नज्ञानकंशास्त्रन्नोपदिशेदित्यर्थः आग्रहइति अतएवक्रियाग्रहणङ्कर्त्तव्यमितिवार्त्तिकम्भाष्येप्रत्याख्यातम् भाष्या
न्तरमप्याह खण्डिकेत्यादि चपेटान्ददातीत्यर्थः त्वसंयोगोऽर्थः शेषित्वम् उद्देश्यत्वम् शेषत्वमप्रधानत्वम् शेषित्वं त्व
न्नास्तीति यद्यपिग्रामस्सम्प्रदानार्थमजानयनेतदपिग्रामस्यास्तितथापि अजायाइवपरत्वात्कर्त्तुरितिकर्मसञ्ज्ञयावाधान्नदे

८९

घइतिवाच्यम् अस्मात्कर्म्मणीति आदेर्धातोरादेर्वेत्यर्थः प्रीङ्गतावितिदैवादिकादित्यपि कश्चित् हरिम्प्रीणयतीति प्रीयमाणइ
ति निर्द्देशेनप्रीधात्वर्थकर्म्मणः सम्प्रदानत्वाभावज्ञापनात् अत्रनसम्प्रदानत्वमितिभावः अत्रपथ्यइति नचतदभावेसत्त्वस्यशेष
त्वविवक्षायाञ्चारितार्थ्येन परत्वात्त यासिद्धिरितिवाच्यम् देवदत्तस्यरोचतेइत्यस्यापत्तेः ह्नुङ्स्तोतीति स्तुत्या परस्मैह्नुत्य
ह्नुङ्कयतीत्यर्थः ज्ञीप्स्यमानपदेनप्रथमोपस्थितत्वात्मि कृत्यर्थकर्म्मैवग्राह्यम् तस्याविवक्षायांतु विषयेच्छाविषयत्वाच्छान
जुपपत्तिरितिभावः क्रुधादेरपिकृत्यादिना बोधनसमर्थइतिबोध्यम् अन्येत्विति प्राधान्यात्ज्ञीप्स्यमानपदेनतत्पर्यकर्म्मण एवग्र
हणमितितदाशयः तदेवाह कुप्यायेति कारकशेषत्वादिति कर्म्मणायमभिप्रैतीतिसम्प्रदानत्वाविवक्षायांशेषत्वादित्यर्थः सप
त्नीभ्यइति तत्रकुर्वानेत्यत्र मार्थिकार्थकथनंस्वाभिप्रायं ह्नुह्यमश्चोधयतीत्यर्थः एवंशापतेइत्यपिव्याख्येयम् सिद्धमिति स्वरतृतीयक
र्म्मणपनीयरितिभावः यद्यत्विति कर्म्मणःशेषत्वविवक्षेत्यर्थः इतिस्थितमिति शेषत्वविवक्षाकर्त्तुमशक्येत्यभिमानः अमर्षइति
वाक्चक्षुरादिविकारानुमेयःप्ररूढकोपइत्यर्थः अपकारइति अपकारविषयेच्छेत्यर्थः असहनम् उत्कर्षविरोधिधर्म्मारो
पानुकूलोव्यापारः गुणेष्वगुणविषयेदोषत्वारोपानुकूलोव्यापारः अकर्म्मकत्वादिति क्रोधजन्यस्यफलस्यदेवदत्तादेस्त्वेपि तस्य
धात्ववाच्यत्वादितिभावः द्वितीयेति तत्प्रयोजिकाकर्म्मसंज्ञेत्यर्थः शाद्यमिकेति राधीक्ष्योःप्रश्नविपर्य्यालोचनमर्थस्तत्रप्रश्नविषय षष
रूपफलाश्रयत्वात्कर्म्मत्वाप्राप्तिरितिभावः इत्यर्थाभ्युपगमेनेति तस्यप्रधानीभूतधात्वर्थाप्रयोज्यत्वेनतदप्राप्तिरितिभावः ध ८४
नादीति आदिनादुर्भिक्षेऽन्नम् अनेकधेति साक्षात्परम्परयाचेत्यर्थः ब्राह्मणायदधीत्यादौतद्भोजनोपकारत्वेनतदुपकारक क
त्वम्बोध्यम् ज्ञानात्मनेति आत्मशब्दस्तद्वृत्तिधर्म्मपरोज्ञानत्वेनपरिणामइत्यर्थः एवञ्चतस्यविद्धातिवाचकत्वाभावान्नचतुर्थी

किन्तु प्रकृत्यादित्वात्तृतीया स्वानन्तविशिष्टरूपान्तरप्राप्तिर्भक्तिकर्तृकेतियावत् रूपान्तरप्राप्तिर्हि परिणाम इत्यर्थः प्रथमेवेति
अप्रकृत्यादानकोऽज्ञानरूपः परिणाम इति तदा बोधः समासविधानादिति चतुर्थी तदर्थेति हितसुखयोगे समासविधानाज्ज्ञापका
दित्यर्थस्तदाह एवमिति वृत्तावाशीरर्थप्रतीतेर्न्न चतुर्थी चाशिषि इति चतुर्थ्यां हितयोगे निर्वाहः आशीरर्थयोगे आशीर्विषय
स्य विधेयत्वन्न्तद्द्रव्यस्योद्देश्यत्वञ्च प्रतीयते न च वृत्तौ तथान्वयोऽव्युत्पन्न इति हरदत्त इति दिक् नहि फलितार्थेति यद्यपि ब्रा
ह्मणाय दधीत्यादौ ब्राह्मणीयभोजनोपकारकमपि दधि तद्द्वारा ब्राह्मणोपकारकन्तथापि फलेन आहरणद्वारा न कोपि यानक्रियो २
पकारक इत्याशयः तुमुनेवेति भाववचनघञादीनान्तुमुनपवादत्वात् तुमुन्समानार्थत्वात् एकत्र प्रथमापवाद इति भावः द्विधा
न्विघातायविधातुमिच्छतः तदर्थत्र विघातायेति तादर्थ्ये चतुर्थी विघातार्थं न्यद्विधा तदर्थेत्थम्भवत इत्यर्थः एतेनात्र तुमुनस्तादर्थ्य
स्योक्तत्वात्कथञ्चतुर्थीत्यपास्तम् उत्तरक्रिययोस्तद्द्योतनेपि पूर्वक्रिययोस्तद्द्योतनात् कर्तुः प्राधान्यात् इति स्वच्च तादर्थ्ये चतु
र्थ्यास्तत्राप्राप्तेर्न्नित्यसमासप्रसङ्ग इति भावः विभक्त्यर्थेति तादर्थ्ये चतुर्थ्यैत्यर्थः ॥ ०॥ इति चतुर्थी ॥ ०॥ प्रकृतेति कर्तर्य्यति व्याप्ति
वारणाय सत्यन्तम् अन्यथा कर्तृसञ्ज्ञायाऽयमपवादः स्यात् कर्तृसञ्ज्ञान्तु पचत्यादियोगे चरितार्था कर्म्मेति ग्रामेति व्याप्तिवार
णाय विशेष्यम् अवधित्वन्न विरुध्यत इति तदुपात्तक्रियानाश्रयत्वादिति भावः न विरुध्यत इति तदनाश्रयत्वादिति भावः अत
दावेशादिति तद्धात्पात्तगत्यनावेशादित्यर्थः तदावेशादिति पाठे तन्मात्रावेशनात् विभागमात्रावेशादित्यर्थः विशेषणमिति वस्तु
तोवधयवधिमङ्गावरूपविभक्त्यर्थसम्बन्धेनावधिक्रिययोरन्वय इत्यन्यत्र निरूपितम् सा च क्रियाविभागरूपा कालिकसम्ब
न्धेन फलाश्रयेऽतिप्रसङ्गवारणाय फलतावच्छेदकसम्बन्धस्य कर्म्म[illegible]लक्षणे निवेशान्न तदाश्रयस्य कर्मत्वम् विभागजन्य

स॰श॰र॰ ७५

संयोगस्य धात्वर्थत्वाद्धित्यन्यत्र विस्तरः निवृत्तीति विश्लेषेइत्यर्थः इष्टापत्तेरिति शेषत्वविवक्षायाङ्केत्येति षष्ठीत्यन्ये सम्बन्धित्वेनेति
तज्ज्ञमेत्यर्थः अर्थासङ्गतेर्मिति नहिधातुम्प्रतिकर्त्तृत्वम् किन्तु तद्वाच्यक्रियाम्प्रत्येवेत्यर्थः समासानुपपत्तिस्तजकाभ्यामिति निषे
धात् उपधालोपप्रसङ्गस्तु गमेरिडित्याद्याविवजनिघसिभ्यामित्याद्यविवचास्यानुकार्य्यत्वेरूपभङ्गभियानकृतइत्यन्ये सौत्रत्वा
दितिपरे भाष्यकैयटेति इदमेवयुक्तम् प्रकृतिशब्दस्यतत्रैवप्रसिद्धेः प्रत्याख्यानपरभाष्यसम्मतत्वाच्च किञ्च वृत्तिमतेकारक
इत्यधिकृतत्वस्य कारणसामान्यवाचिनो निर्द्धारणसप्तम्यन्तस्यान्वयोऽसम्भवी नहिकारकाणांमध्येऽपादानकारणमितिवत्कारणा ना
नाम्मध्ये कारणमिति सम्भवति भावेक्तिविति व्याख्यानान्तु निसाहचर्याच्चेतिभावः प्रभवतीति प्रभवनमत्र प्रथमःप्रकाशःस
त्रैभवनमप्येतदेव अप्रयोग इति तदन्तशब्दाज्ञानेपितदर्थज्ञानेत्यर्थः यथाप्रविशंपिण्डीमित्यादाविग्यणस्सूत्रभाष्योक्तरीत्यावा
कैकदेशप्रयोगस्तस्यैकपदस्यवृत्त्यासम्पूर्णवाक्यार्थबोधकता तथाप्रकृतेपीतिबोध्यम् एवम्फलेभ्योयातीत्यादावपि अर्थद्वारा
पुत्त्वादिति तदर्थपरिच्छेद्याद्इत्यर्थः सिद्धत्वादिति अन्यार्थयोगेतुनतेनसिद्धिः निर्द्धारणप्रयोजकीभूतधर्मानभिधानात् परस्य
रप्रतियोगिकभेदस्यपरस्परवृत्तित्वेना निर्द्धारकत्वात् तुल्यत्वादिति तदन्यःकातरइत्यस्यापिवक्तुंशक्यत्वादितिभावः कैयटइति
मेरुष्टष्टादारभ्येतिपातञ्जलभाष्यप्रयोगोपिबोध्यः आरभ्येति अवधिमाश्रयेत्यर्थकन्तेन आदिप्रकारार्थकप्रभृतिशब्दयोगेतुन
पञ्चमीमानाभावादित्यन्यत्रविस्तरः विशेषणांशस्तुनेति तेनविनेतिमर्य्यादा तेनसहेत्यभिविधिरितिवृद्धोक्ताविति भावः अस्मादेव
निर्द्देशादिति यत्त्वनेनसूत्रेणैवेति तन्न एतद्घटकीभूतप्रत्यः प्रतिनिधाद्यर्थकत्वाभावेनकर्म्मप्रवचनीयत्वाभावात् उपादीय ७५
तइति अस्ययतइत्यादिः स्तस्य तत्तुल्यमूल्यादेःप्रतिनिर्यातनम् परावृत्त्यदानम् तृतीयेति हेतुतृतीयेत्यर्थः हरदत्तग्रन्थेइति भा

ष्येत्तु न दृश्यते इह श्वगुरोस्त्रियाश्चेत्यत्र सन्निहितैवेति उभयोः समुच्चयस्तु व्याख्यानादिति बोध्यम् सप्तम्यपीति प्रातिपदिकार्थ
मात्रे इति शेषः तद्विशेषकत्वमिति सत्त्ववचन प्रातिपदिकार्थविशेषणत्वमित्यर्थः द्वारान्तिकार्थेभ्य इत्यस्योदाहरणे क्रियाविशेष
णेनासत्त्ववाचितावोध्या सप्तम्यधिकरणे चेत्यत्रानुवृत्तेस्तु नास्य सम्बन्धो व्याख्यानादिति बोध्यम् क्रियान्द्रव्यमिति एवञ्चासत्त्वं सम
नाधिकरणविशेषणत्वादत्र स्तोकशब्दस्याद्रव्यवाचित्वमिति भावः तमन्वेत्येति प्राचोऽन्यमन्वेत्यर्थः तदनुपपत्तिः असत्त्वानु
पपत्तिः कृदभिहितभाववदिति वैधर्म्ये दृष्टान्तः यद्वा पक्त्वापक्तुमित्यादिकृदभिहितभावेऽत्यर्थः इत्यादाविति इदमुपलक्ष
णम् पचतीत्यादावपि कारकगतसङ्ख्याया क्रियायामारोप्य तत्रैव तदन्वयस्य व्युत्पत्तेर्भाष्येणोक्तत्वात् भवतीत्यादाविति प
ठपन्गोधावतीत्यादिशब्दार्थः लिङ्गस्येति तन्निरूपितविशेष्यतायामेव द्रव्यत्वमितिभावः क्रियानाधारेति धात्वर्थानाधारे
त्यर्थः करणत्वादिभिरितियावत् स्वातिरिक्तपदान्तरवाच्यक्रियानिरूपितकरणत्वादिभिर्न्नयुज्यत इत्यर्थः इयमेव लिङ्गकर
णत्वादिभिरसम्बन्धरूपैव असत्त्वरूपतेत्येतदपेक्ष्य स्त्रीलिङ्गनिर्देशः ॥ ॰ ॥ इति पञ्चमी ॥ ॰ ॥ प्रत्ययार्थस्य [illegible] सम्बन्धस्य प्र
र्थ कृत्यर्थम् राजार्थम् प्राधान्यादिति संसर्गविशेष्योभयनिरूपितत्वस्य प्रकारतायामस्वीकारादिति भावः तदर्थस्य प्रकृत्यर्थस्य
विशेषणम् षष्ठ्यर्थसम्बन्धेनेतिभावः यत्तु तदर्थशब्देन प्रत्ययार्थस्सम्बन्धः इति तन्न तस्य संसर्गविधयैव भानस्य भाष्यस
म्मतत्वात् उक्तन्यायेति प्रकृत्यर्थस्यैव प्रत्ययार्थम्प्रति प्राधान्यापत्तेरित्यर्थः राजसम्बन्धी पुरुष इत्येव बोधादितिभावः शे
षत्वाभावमुपपादयति पुरुषशब्दमिति इदमपि कर्मादीनां सम्बन्ध विशेष सामान्येनान्वयविवक्षणमपि नास्त्येवमिति शेषे
षष्ठीतिसूत्रेणासिद्धत्वादितिभावः अष्टस्त्रीकृत्योर्थेतिसूत्रवृत्तिरीत्याध्वतम् वस्तुतस्तत्र शेषग्रहणान्नानुवर्त्तते मध्येविच्छेदादि

लघुश०८०

८६

त्यन्ये तेषांसमसत्त्वीति बोध्यम् अनुवर्त्ततइति अतएवाधीगर्थेतिसूत्रेशेषइतिवर्त्ततइति भाष्येउक्तम् ननुतद्दलाह्लुगभावोऽस्तु

समासाभावः कुतइत्यतआह तथाचेति प्रतिपदविधानाषष्ठीनसंस्यतइतिवार्त्तिकवलात्तथाकल्पनेतिभावः वस्तुतोनिषेध व२

वार्त्तिकेऽनुवाद यमानिसूत्राणीतिबोध्यम् स्मरणमिति करणोल्युट् कृद्योगषष्ठेति अतएवसमासनिषेधप्रकरणेएता

निनोक्तानि तथासति कर्म्माद्यर्थकषष्ठ्यामपिसमासनिषेधापत्तेः दिवस्तदर्थस्येत्यत्रकर्म्मणीत्यस्यकर्त्तव्यतापत्तेश्च ननुशेषत्व

विवक्षायांकृद्योगषष्ठ्यावैकल्पिकसमासाङ्गीकारेऽधीगर्थेत्यादीनाम्वैयर्थ्यमेवेत्यतआह तत्रचेति करणल्युडन्तस्मरणादिश

ब्देः कृद्योगषष्ठ्यासमासेऽनोभावकर्म्मवचनइत्यस्याप्राप्तिरितिभावः मातुःस्मृतमिति आदिकर्म्मणिक्तः प्रशब्दंविना

पिअनुदात्तादेआदिकर्म्मबोधवदत्रापिप्रकरणादिनातद्बोधसम्भवः एतेनात्रकर्म्मणीत्युक्तेकर्म्मण्यनुक्तत्वादध्यीगर्थेत्यविषः त्य

यएवम्भावेतुक्तोदुर्ल्लभः सकर्म्मकत्वात् गत्याद्यर्थत्वाभावात्कर्त्तरिसदुर्ल्लभइत्यपास्तम् कर्म्मणःशेषत्वेनविवक्षायामवि

वक्षितकर्म्मत्वेनाकर्म्मत्वेनभावेक्तस्यसुलभत्वाच्च षष्ठीचेति चस्त्वर्थे एवञ्चतत्रसमासाभावोपिफलमितिभावः दुर्ल्लभ

मिति अर्थशब्दस्यद्वितीयान्तेतुकमर्थमित्युचितम् प्रथमान्तत्वेऽर्थशब्दस्यपुंस्त्वान्नपुंसकत्वन्दुर्ल्लभमितिभावः कथञ्चि

दिति आयइष्टिरिष्टम् अन्यल्लक्षणाभावोर्थासङ्गतिश्च कोर्थः किमर्थमितिसमासेसामान्येनपुंसकत्वाश्रयणाच्चेतिभावः

तेनेति यत्तुसर्व्वनामसूत्रशेषेभाष्यम् भवतःसर्व्वनामत्वेतृतीयाप्रयोजनम् सर्व्वनाम्नस्तृतीयाचेतितत्तुयथाश्रुतसूत्रमते ८६

अतएवसूत्रोपन्यासः ननुतद्यदिदम्सर्व्वनामविषयङ्कैयटादिविरोधात् हेतावित्यत्रोपन्यासस्यनिर्बीजत्वापत्तेश्चेतिबोध्य

म् पञ्चम्यपीति अत्रसार्व्वविभक्तिकःषष्ठ्यन्तात्तसिरित्यन्ये चिन्त्यप्रयोजनमिति इदमत्रैवसूत्रेभाष्येस्पष्टम् समानाधिक

रणान्वोध्यमिति ह्यधिकारात्परेणवासरूपविधिनेत्यत्र परेणेति तृतीया ततः परेणा शास्त्रेणवासरूपसम्बन्धोनेत्यर्थः ततः
परेणनायमनुवर्त्ततेइत्यत्र सार्वविभक्तिकः षष्ठ्यन्तात्तसिरितिबोध्यम् समुच्चीयतइति अतः षष्ठीपक्षयोरेवात्रविधानमि
त्यर्थः ननु षष्ठीति विधीयन्तइतिशेषः षष्ठीद्वितीयातृतीयाश्चात्र न विधीयन्तइत्यर्थः तत्राद्योपात्ताअन्येसमुच्चयेइतिबोध्य
म् समुदायविधानाभावे तात्पर्य्यम् उत्तरत्र सूत्रद्वयेति अयम्भावः अत्र शेषइत्यस्यसम्बन्धोविभाषोपसर्गेइत्यत्र शेषइ
ति सम्बध्यते उत्तरत्र नाद्यः दिवस्तदर्थस्येत्यनेनैवसमासाभावस्यसिद्धत्वेन सूत्रवैयर्थ्यापत्तेः नच पक्षे षष्ठीशेषइत्य
स्यप्रवृत्त्यापक्षे समासप्रवृत्तिः फलम् नोपसर्गइतिन्यासेन दिवइत्यस्य निषेधे शेषषष्ठ्यां समासविकल्पेन रूपद्वयस्यसि
द्धतया विभाषाग्रहणस्य तथापि वैयर्थ्यात् नान्त्यः वेदेपि विभाषोपसर्गइतिसूत्रेण कर्म्मणि द्वितीयायाः सिद्धत्वादापाद्यह्
पस्यतत्राभावाच्च द्वितीयाब्राह्मणेइत्यस्यवैयर्थ्यापत्तेश्च नच तन्निरुपसर्गे द्वितीयार्थमितिवाच्यम् कर्म्मत्वविवक्षायान्दिव
इत्यस्याप्रवृत्त्या कर्म्मणि द्वितीयेत्येवसिद्धत्वेन वैयर्थ्यस्य तादवस्थ्यात् नच द्वितीयाब्राह्मणेइतिसूत्रे शेषेइति अनुवर्त्तते तेनक
र्म्मत्वाविवक्षायान्द्वितीयार्थमिति वाच्यम् विधित्वेनानुवृत्तेरयुक्तत्वात् वक्ष्यमाणोदाहरणे कर्म्मत्वस्यैवप्रतीतेश्च कृति
त्विदन्नप्रवर्त्ततेइतिपुनर्विधानन्समासाभावायेत्यपिनवाच्यम् अतएव द्वितीयाब्राह्मणे [illegible] इतिसूत्रेभाष्यम् किमुदा
हरणङ्गामस्यतिदीव्यन्तो [illegible] पूर्वेणाप्येतत्सिद्धम् इदन्तर्हि गामस्य तदहः सभायान्दीव्येयुरिति दिवस्तदर्थस्येति नित्यं षष्ठी प्राप्नोति
इति कैयटश्चेति त्रिसूत्र्यामिति तृतीयस्य वैदिकत्वानुपन्यासोद्रष्टव्यः अप्रसक्तत्वादिति कल्याद्यन्तस्य तु न प्रैषे प्रयोग इति भा
वः उभयथा षष्ठीतदभावौ इदञ्चाकथितसूत्रे भाष्ये स्पष्टम् अविवक्षितेति तद्धितवृत्तेः पूर्वमविवक्षितेत्यर्थः पञ्चा[illegible]

ल०श०र० कर्म्मयोगोन्वयस्यैवेति अयञ्च प्रकार एतद्वृत्तिविषय एव तेन घटं क्रियत इत्यादिन नपुंसके भावे क्तोप्य कर्म्मकेप्य एव भ्रान्तं देश
मित्यादित्तु गत्यर्था कर्म्मकेति क्तेन निर्वाह्यम् तत्सूत्रोपात्तधातुभ्यश्चेन तस्य भावेपि विधानादित्यन्यत्र न विस्तरः धायैरामोदमु
म३ त्तममिति दधातेर्द्दातिदधात्योर्व्विभाषेति णः आतोयुगिति जयमङ्गला धयैरिति रूपस्य पाठो लेखकप्रमादात् उत्तममुख्यादि
सम्बन्धामोदन्धारयद्भिरित्यर्थोभिधानेन प्रश्नः यदित्वा मोदं गृहीत्वा माद्दशान्नु ध्वंसस्योषकैरित्यर्थो जयमङ्गला माख्यान
रीत्योररीक्रियते तदानकाप्यनुपपत्तिः निर्द्देशादिति अयम्भावः तत्रैव तस्य अर्हम् इति सूत्र त्रयङ्कार्य्यम् अर्हमित्यत्रयो
ग्यतावलात्कर्म्मणि षष्ठी तस्य भाव इत्यत्र च तस्येति न वाच्यम् एवं सिद्धे तदिति निर्द्देशोऽसमस्तद्वितीयान्तत्वविधानार्थः एतेनसू
त्रेकर्म्मोपपदादण् प्रत्यये उपपदसमासोऽजन्तस्य कर्म्मषष्ठ्या वा समास इति निरस्तम् अत एव द्वितीयासमर्थादिति व्याख्याय
ते राजानमर्हन्तीति च विगृह्यते तत्फलन्त्वनित्यत्वबोधनमेवेति भाष्येतु नैतद्दृश्यत इति बोध्यम् ऊकौचेति अमयञ्चेत्यादेरुपल
क्षणमिदम् तदन्तविधिरिति व्यपदेशिवद्भावेन तस्यापीति बोध्यम् ननु नपुंसके भावे क्तस्येति भाष्यवार्त्तिकात् कारकषष्ठी
निषेधविषये शेषत्वविवक्षा न तत्र त्याख्यानेत्वनभिधानात् क्तातिरिक्तविषये सा न पूरणगुणेति सूत्रे भाष्येध्वनितमिदमि
६ त्यस्त्वेराह यद्वेति सहयुक्तेति स्फुटोपममित्यत्रोपमाशब्दो भावसाधनः ॥ ॥ इति षष्ठी ॥ ॥ श्री ॥ प्रातिपदिकार्थमात्रेति
सप्तम्यधिकरणे चेति सूत्रेणाधिकरणे सप्तम्याः सिद्धत्वाच्चकारेणान्तरङ्गप्रातिपदिकार्थे सप्तमी विधीयते प्रागुक्ताश्चतिस्रः इयं
सप्तमी निरवकाशत्वात् परया अपि प्रथमाया अपि बाधिकेति भावः वृत्तिर्भेरमिर्यस्येति यत्नान्त निरूपितपदार्थाभिधायक ७
त्वाश्रय इत्यन्तः शब्द इत्यर्थः अत्रैनो विषयस्येनः प्रवृत्तेः क्तान्तस्येति षष्ठी तत्पुरुषोपि वक्तुं शक्यः तादर्थ्येति फलस्य हेतुत्वे

नविवक्षणात्फलार्थत्वाच्चकारणस्येतिभावः ननुज्ञाप्यज्ञापकभावरूपलक्ष्यलक्षणाभावो भूयोदर्शनाभ्यां दृष्टस्तत्त्वादिति आदित्ये
तमो न दृष्टमित्यादावेव स्यान्न तु प्रकृते कदाचिद्धि गोषु दुह्यमानासु अप्रसोगत इत्यत आह निर्ज्ञातकालेति कालोद्देशस्याप्युपलक्षणम्
तदुदाहरणे सति गुणोद्रव्यत्वमस्तीति तदाश्रययोरिति क्रियाश्रययोरित्यर्थः विशेषणीभूतयोरिति शिवोध्वस्त इत्यादौ शिवाया ध्वंस
त्वप्रयोगित्वविश्रान्तिवत् विशिष्टवैषणेवतस्य लक्षकत्वात् नत्विति गवाङ्कस्येत्यादौ गोत्वाद्याक्रान्तायष्ठेतिभावः तदाह नह्यत्रेति
वार्त्तिकादिति साधकर्मसौराज्ञ इति तु राज्ञो भृत्येनान्वये साधकप्रत्यासत्त्या च राजविषयमेव साधकत्वं कल्प्यते न तु शब्देन तं स्पृशते अर्चा
याम्प्रतियोगे निषेधार्थ न्त्वत्र साधकग्रहणमिति तत्त्वम् तत्परे इति रूढत्वादेतदर्थस्यैव ग्रहणान्तेन प्रकर्षेणासित इत्यर्थेन॥ ॥इति
सप्तमी॥ ॥इति श्रीमद्दीक्षितभट्टोजिपौत्रदीक्षितहरिविरचिते प्रौढमनोरमाव्याख्याने लघुशब्दरत्ने कारकान्तं समाप्तम्॥ ॥
॥ ॥इति कारकप्रकरणम्॥ ॥नित्याधिकारे इति उपपदमतिङिन्त्यत्रेत्यर्थः नियत इति अप्रतिबद्धप्रसरन्नित्य इत्यर्थः एवञ्चाधि
कारश्चाप्रमपि नित्यपदस्यान्तर्देशेन सम्बध्यत इति भावः योगविभागेनेति तस्य च वैकल्पिकत्वम्वक्ष्यते एतदपीति छन्दस्येवेत्येतदर्थः त
एतदुत्तरं छन्दस्येवेति केषाञ्चिल्लेखकप्रमादात् एतच्चेति उक्तच्छान्दसत्वमित्यर्थः निर्वाह इति शयितं भमित्यादेः क्रियावाचकस्यापि
नपुंसकत्ववदस्यापि प्रातिपदिकत्वे तत्त्वेन लुकातदश्रवणादित्यर्थः अन्यथेति सुबन्तमित्यनेनान्यतरस्यैव ग्रहणे विनिगमकाभावा
दिति भावः पूर्वशब्दस्यैवेति तस्य कालवाचकत्वेन क्रियायाम्विशेषणत्वादिति भावः क्वाचित्क इति कदाचित्क इत्यपि बोध्यम्
योगविभागसिद्धत्वात्तदनुवादेन क्रियाविशेषणत्वाद्द्वितीयेति भावः क्वाचित्क इति समासे हि वस्य परनिपातस्यादिति भावः अर
लोपश्च प्रत्यासन्नसमासावयवविभक्तेरेवेति न समासात्पुरस्तत्तस्याव्ययादिति लुग्भवत्येव ननु गोपदार्थस्येव चित्रगो इति समुदाया

र्थस्य चित्राभिन्नागोरूपस्यायमपदार्थोपसर्जनत्वमेवेत्यत्त्वेत्राह गौरीपतिरिति राजकुमारीपुत्रेत्वीपत्ययान्तस्य प्रातिपदिकत्वनाय
समासत्तस्य पूर्वपदत्वकरणम् उत्तरपदभूतयोरिति स्वरूपकथनमुत्तरपदस्यैवतथात्वसम्भवात् टजिति यतष्टजन्तएतदेवरूपमित्यन्व
यः सन्निधानादिति उपस्थितत्वादित्यर्थः परिशिष्टेत्विति अत्रारुचिः सष्टैव द्योतकसमभिव्याहारेषष्ठ्याः प्राप्तिश्चवाचकत्वेपिसन्निधान
त्यागेनमानमिति विग्रहायोगादिति एवञ्चविग्रहेप्रतितदुक्तिरसङ्गतेतिभावः प्रवेशस्यैवेति एकञ्चतादृशविग्रहस्वरूपकथनमसङ्गतमि
तिभावः असंस्पर्शादिति एवञ्चतत्रार्थकथनत्वस्यैवाभावेनतन्मात्रेत्युक्तिरसङ्गतेतिभावः दुर्व्विभापत्तेरिति हृतेकादेशौकारस्येवलु
कापहारिणोतिभावः वैकल्पिकेऽदादिविषयेसैद्धेत्यादावलौकिकत्ववारणायनित्येति आकरे अनभिहितसूत्रेभाष्येपरिगणनफलस्यभी
ष्मङ्कटमित्यस्यान्यथासिद्धिस्तत्रोक्ता रक्षितत्यन्त्येइति अत्रारुचिवीजम्मध्यार्थकसमयायोगेद्वितीयाविधानस्य ॥ द्वारार्थकारोदयोगेपञ्च स्य
मीविधानस्यचारितार्थ्यमिति प्रागुक्तरीत्या अधिहरीत्यत्रोक्तया अधिकरणशक्तीति कालवाचकत्वादित्यपिवोध्यम् क्रियापदेनैवेति
कर्तृकर्म्मद्वारेतिभावः निषेधोपीति अत्यन्ताभावार्थकनञः क्रियान्वयित्वमुत्पत्तेरितिभावः नवायुक्तीति उक्तिव्युत्पत्तिविरोधादितिभावः
ततोभूतलाधारकघटाभावप्रतीतिस्त्वार्थीतिवोध्यम् भाष्यकारेति सञ्ज्ञातुप्रतिस्यानमित्यादौषत्वाभावार्थेतितदाशयः अत्रार्थप्रतीति
वाक्येप्रतिशब्दस्येत्यादिमूलन्तुरक्षितानुसारीतिवोध्यम् साकल्येइति पूर्वोक्तपरि त्यज्येत्यर्थइतिभावः औत्सर्गिकत्वादिति उन्मत्त
ङ्गमित्यादौव्यभिचारादितिभावः नान्वग्नियन्थादग्रेप्यध्ययनमस्तीत्यतआह इदानीमिति तदर्थे तत्प्रतिपादके अन्तत्वविवक्षा
याम् तस्यापिविवक्षायामित्यर्थः ग्रन्थपर्य्यन्तमिति तदन्तमित्यर्थः अन्तत्वस्यसुतरामितिप्राधान्येनेत्यर्थः तस्येति अन्तत्वसि ८८
त्यर्थः ननुसहशब्दस्यान्तवाचकत्वाभावात्तेनसमासाभावोनस्यात् अग्निग्रन्थपर्य्यन्तमितिविग्रहप्रदर्शनम्भवतापिस्वीकारात् तस्य२
अग्निरन्तोयस्येत्यस्यचद्रुक्तविग्रहसमानार्थत्वादतआह सहयुक्तेइति एवञ्चप्रथमान्तेनसमासइत्यसङ्गतम् साहित्यञ्चसहश

द्यार्थः तत्रच सूत्रे विनिगमनाविरहाद्द्विकार्थैकसहशब्दस्य ग्रहणमितिभावः साकल्येवेति यस्तृणान्यभ्यवहरेत्स कथमन्यमप
रित्यजेदितिप्रतीतिभावः साकल्यस्यैवेति यस्तृणानि भक्षयेत्सकथमन्यमपरित्यजेदितिप्रतीतेरितिभावः एवञ्चयत्रन त्वत्रतृ
णभक्षणेतात्पर्य्यं साहित्यद्योत्यत्तयेति साहित्यवत्त्वद्योत्यत्तयावोध्यतयेत्यर्थः मयूरव्यंसकादित्वात्सुप्सुपेतिवासमासः पद्या
भ्क्तेतुग्रन्थद्वयस्यसहाध्ययनेपिसाहित्यप्रतीतिर्ज्जायते नत्वंप्रतीतितस्यद्योत्यतोक्तिरसङ्गतैवस्यादितिदिक् न्यायसिद्धत्वमेवाह
वचनन्त्विनेति विकल्पवोधकशब्दन्त्विनेत्यर्थः नित्यत्वादिति वाक्येनसञ्ज्ञानवगमान्नित्यसमाससदृशत्वादित्यर्थः पुनर्व्विधान
मिति समाससञ्ज्ञायाइतिभावः अन्यथातद्धितसमासानुवादेनाव्ययीभावादिसञ्ज्ञामेवविदध्यात् अत्रचव्याख्यानमेवशरणम्
वह्वीनाञ्चतत्सञ्ज्ञाविधानमव्ययपदानाम्समासशास्त्रप्रथमानिर्द्दिष्टत्वस म्पादनेनोपसर्ज्जनसञ्ज्ञार्थञ्चरितार्थमितिकथ
ञ्ज्ञापकमितिवाच्यम् तत्रसूत्रेसमासेइत्यस्यसमाससञ्ज्ञाव्याप्यसञ्ज्ञाविधौप्रथमानिर्द्दिष्टमित्यर्थेवाधकाभावादितिदिक् ६
वेनसमासस्यक्वाचित्कत्वेहेतुमाह जीमूतस्येवेति अतएवज्ञापकाद्बहिर्य्योगेपञ्चम्यासमासविधानाज्ज्ञापकादित्यर्थः लक्षण
त्वम्वस्तुसन्निमित्तन्तुतेनसम्बन्धेनान्वयस्तदाह अव्ययमिति अनोःसमायाप्यत्वादितिभावः वनस्यान्विति कर्म्मप्रवचनीयस
त ञ्ज्ञात्तुनात्रद्योत्येनलक्ष्यलक्षणभावेनेतरत्रान्वयाभावात् वनसमीपमित्येववोधादितिभावः तेनसम्बन्धेनान्वयेतुवनमन्वि
त्येववोध्यम् अग्निमभीतवत् अनुनाद्योत्यतइति दीर्घगङ्गासदृशीतिवाच्योऽर्थः गङ्गादैर्घ्यसादिःइतिफलितोर्थः द्योत्यार्थ
स्यविशेषणतायाएवसम्मतत्वात् यद्वा वोध्यतइत्यस्यवोध्यतइत्यर्थः सचशक्तोवेतिवोध्यम् लक्षणत्वञ्चवस्तुसदेवनिमित्तं
सम्बन्धेएकञ्चात्रापितेनसम्बन्धेनान्यत्रान्वयाभावान्नकर्म्मप्रवचनीयत्वप्रयुक्ताद्वितीया साहश्याद्यन्तर्भाविकैकार्थीभावव२

ल०श०२०

८९

त्वादुपलक्षितेत्यस्यविशिष्टेत्यर्थः गंगायांदैर्घ्यसदृशो सादिवाधोत्तरन्नियमेन मनसादिवाधोत्तरन्नियमेनमनसा तऊत ज्ञापकत्वे
बोधात्तस्यानुद्योततत्तोक्ता यथा प्राप्तस्यप्रारम्भद्योतकत्वात इदिति बोधम् सामान्यशब्दोपीति तेनपञ्चनदम्सप्तगङ्गमित्यादि
सिद्धिः पदान्तरसमभिव्याहारेणेति तद्घटितमेवतत्रवाक्यन्न केवलएव तत्पदार्थघटितमितिभावः समासस्येति इदञ्चस
मासान्तइत्यादिसूत्रेषुभाष्येस्पष्टम् समासार्थोत्तरपदस्येवेति अयम्पक्षः सरूपसूत्रेकैयटेस्पष्टः परन्तुचिन्त्यः समासपदस्य
तदर्थोत्तरपदलक्षणायाम्मानाभावात् तदर्थवाक्यस्योपचारेणसमासपदेनग्रहणमित्यर्थस्यैवगोस्त्रियोरितिभाष्येउक्तत्वा
च्च अन्तमितिसूत्रस्यभाष्येणोत्तरपदावयवत्वपक्षस्यविरोधाच्च सरूपसूत्रस्यभाष्यन्तुसमासावयवत्वपक्षेपिसुयोज्यमस्तु
धियान्तद्धनयनोद्यपक्षेएवफलद्वयमाह तेनेति अदन्ताव्ययीभावत्वप्रयुक्तोयम् अदन्तद्विगुत्वप्रयुक्तोङीप्चेत्यर्थः नचद्विधु
रीसाधावकारान्तोत्तरपदत्वाभावात्स्त्रीत्वङ्कथंस्यादितिवाच्यम् लिङ्गानुशासनसूत्राणांलोकसिद्धलिङ्गानुवादकत्वेनचाम्यत्र
द्विगोस्त्रीत्वाभावनियामकत्वाभावात् तदुक्तम् लिङ्गमशिष्यंलोकाश्रयत्वाल्लिङ्गस्येति समासान्ताइत्यादिसूत्रेषुभाष्ये नचोत्त
रपदावयवत्वेपि अवयवावयवस्यसमुदायावयवत्वेनोक्तप्रयोगयोस्सिद्धिरितिवाच्यम् अन्तइतिसूत्रेसमासस्यान्तोदात्तत्वमुत्त
रपदस्यवेतिविकल्पे आद्येइदम् प्रथमकाइत्यादौकपोतोदात्तत्वापत्तिमुक्तास्तु तदर्थोत्तरपदस्यवुत्पत्तिपक्षेनचइत्यत्रान्तोदात्त
त्वासिद्धिरित्यर्थपरभाष्यविरोधेनतत्पक्षस्याङ्गीकर्त्तुमशक्यत्वादित्यलम् इन्द्रियमात्रपरमिति बाह्येन्द्रियेत्यर्थः सद्योबाह्येन्द्रि
याविषयेएवपरोक्षत्वव्यवहारादितिभावः नसञ्ज्ञायाइति नसञ्ज्ञकस्येत्यर्थः नपुंसकङ्गस्वइति उपलक्षणमेतत् उपसर्ज ८९
नङ्कस्वस्यापि तदुक्तमिति माधवादिभिरितिभावः नदीभिश्चेत्यत्रकैयटोप्येवम् परन्तुयोगविभागसिद्धस्यसामान्यत्वेनविशेष
णनदीपौर्णमासीत्यनेनबाधःकथन्नेत्यत्र दृढप्रमाणमफलञ्चचिन्त्यम् तदसत् तदुक्तमित्यनेनध्वनितम् इत्यव्ययीभावः ०

इतिपक्षेत्विति अत्रतु नास्त्यचितमरुचिवीजमुक्तम् यद्यपिसम्बन्धोपि सम्बोधनेइति एवञ्चतत्रैकार्थेनेनसमासःस्यादितिशङ्
का तद्घटितेति तेनप्रकृतिकसुबन्तेसमर्थः गर्गादिभ्यइति तद्धारितविधौसुपइतिनाधिकारः तत्सम्बन्ध्यपत्यमित्यर्थेगर्गा
दिभ्यःप्रत्ययइत्यर्थेतदर्थवोधस्यसुबुत्पत्तिम्विनासम्भवात् परिष्कर्णीम्पदस्पदार्थान्तरेणान्वेतीतिकुत्सितइतिसूत्रभाष्यो
क्तोच्च सुबुत्पत्त्यनन्तरंसामर्थ्यात्सुब्भवहितप्रत्ययोत्पत्तिरिति किमर्थन्तत्रलक्षणाकथम्वातस्यज्ञापकत्वमितिचिन्त्यम् तच्चके
यटेति समासप्रत्ययविधौप्रतिषेधइतिआख्यावसरेश्रितान्तस्यचसुबन्तत्वाभावमाशङ्क्यसम्भवइत्युक्तम् प्रमादइति
कष्टश्रितइत्यत्रयथास्यात् कष्टम्परमश्रितइत्यत्रमाभूदिति भाष्यविरोधादितिभावः समर्थेनेत्यस्यविशेष्यत्वमादाय प्राप्त
स्यतदन्तविधेःसमासप्रत्ययेतिनिषेधइतितात्पर्य्यम् सुबुत्पत्तेरिति स्त्रीप्रत्ययोत्पत्तेरित्यपिवोध्यम् नसिद्ध्येदिति श्रितशब्देन
समासेततष्टापिसमुदायस्यस्त्रीप्रत्ययान्तत्वाट्टक्सिद्धिः श्रिताशब्देनसमासेतुसमुदायस्यटावन्तत्वाभावइतितद्भावःसा
पेक्षत्वेनेति ननुकारकाणांक्रियायानित्यसापेक्षत्वेनकोदोषः नचसापेक्षत्वेनकष्टशब्देनैकार्थीभावायत्वेनटगर्था
यसनन्निष्कृष्यतस्यकेवलस्यैकार्थीभावोदुरुपादइति असामर्थ्यमिति तदर्थेइतिवाच्यम् परमेगार्ग्येऽस्यापत्यमित्यर्थे
परमगार्ग्यायणइतिप्रयोगस्ययेनविधिरितिसूत्रभाष्यसम्मतत्वेनतदनुपपत्त्यानिष्कृष्यैकार्थीभावाभावेपियवर्था कथ
ञ्चिदेकार्थीभावमादायवृत्तौभाष्यसम्मतत्वादितिचेन्न समुदायादपितदादिनियमाभावेनकेवलायतेदुर्वारत्वमितिदो
षस्यानेनोपलक्षणात् द्विगिति द्विगर्थेत्तुउपपदमतिङितिसूत्रस्थेनषष्ठीसमासादुपपदसमासोप्रतिषेधेननवाषष्ठीसमा
साभावाद्उपपदसमासइत्यन्तरकृत्वाभिप्रायमुक्तातदुभयप्रत्याख्यानपरेण अथवाविभाषाषष्ठीसमासोपादानसततेपप

ल०श०र०

दसमासो भविष्यतीति भाष्येण यथा कथञ्चित्कारकोपादानेपि तत्परिभाषाप्रवृत्तेः षष्ठीसमासोपि सुवुत्सत्तेः एवमेव गतिकारकेति
९० स्वरश्च षष्ठीसमासे यातुभयोस्समत्वेनान्तरङ्गत्वाभावेपि न क्षतिः एकसञ्ज्ञयोरेवोभाभ्यामपि प्रवृत्त्या विरोधाभावेन युगपदेवो
भाभ्यां सञ्ज्ञाद्वयेजाते यावान्षष्ठीसमासो नैतत्कृतार्थीभावस्तदोपपदसमासस्तत्कृतैकार्थीभावो भविष्यति स्यात् स्यतोर्थकेन
तस्याः कारकमात्रविषयत्वौचित्यात् अन्यथाकर्तृकरणोपपदानामित्येव वदेत् तथापि न तदुक्तप्रयोजनासिद्धिरेवात्र दूषणमि
ति एवञ्चेह द्रोशेषु सुपेतस्यासम्बन्धेपि न क्षतिरिति बोध्यम् फलमिति तेन मुख्यागत्यर्थाभावात्कथञ्चित्तरिक्तः कथम्वाकर्मणि त्वा ५
द्वितीये त्यपास्तम् यद्वेति प्रत्यासत्तेरगतित्ववादिनाम्मते तदर्थमावश्यकमिदम् द्वितीयाग्रहणस्येति चतुर्थीवेत्येव सिद्धेत्तत्साम
र्थ्यात् षष्ठीवाधत्वमित्याशयः प्रत्याख्यायेति सन्दर्शनादिपरत्वे धात्वर्थस्य कर्मत्वया कर्मणा यमभिप्रैतीति सम्प्रदाने चतुर्थ्याः तद्
परत्वे कर्मणि द्वितीयायाश्च सिद्धिमाश्रित्य तत्प्रत्याख्यातमाकरे नित्येतीति समाससमानार्थकवाक्याभावेन तत्त्वाभिमानः अर्थ
द्वारकमिति गुणवचनस्य शाष्टत्वादितिभावः नन्वेवङ्कर्तृकरणोऽइत्येव सिद्धमत आह रूढत्वन्निति धनरूढत्वेत्वित्यर्थः अर्थ
रैभिन्नवाश्रयी समरः एतदभिप्रायेणैवार्थग्रहणमिति तात्पर्यम् श्लक्ष्णानिपुणयोगे हेतुत्त्व सम्भवेपि सर्वत्र हेतुत्वोपादानास
म्भवरूपाम्नचेराह वचनादितीति अर्थमिति सदृशाद्यद्योगे प्रतिपदोक्तयातुल्यार्थैरिति तृतीयाते नैवसमासो न तु भोजने
न[illegible] द्वनेनासदृशइत्यादौ एतेन तत्र षष्ठीसमासेनासिद्धिः हेतोः षष्ठ्यर्थत्वाभावादिति परास्तम् अभिधेयपरमिति ऊनार्थ ९०
कस्य हन्तृतीयाइति सूत्रेव्याख्यानाद्दूनार्थग्रहणम्वृत्तिकृतोक्तम् ऊनार्थसुतरपदात्पर्धकलहशब्दोत्तृतीयान्चात्पर
राप्नतीदम्लानीत्यर्थः तत्रहि प्रतिपदोक्तत्वाद्दस्यैव ग्रहणमतोऽत्राप्यर्थशब्देऽभिधेयपर इति भावः तृतीयेति सूत्र भाष्ये

ईत्यमर्थग्रहणम्प्रत्याख्यातम् अतएवसमर्थसूत्रभाष्येऽवृत्तीयातत्कृतेस्तुपमस्योपादानविकल्पइत्युदाहृत्तमुपादानेनकृतोवि
कल्पइत्यर्थः स्वाम्नेधायकेव्याख्यानादर्थग्रहणेतुनभाष्यानुग्रहः किञ्चवृत्तीयायाइत्युक्त्याप्रातिपदोक्तपरिभाषायाअप्र
प्रवृत्तिरेवाचाकृतइत्याद्यर्थेकवाक्कलहोदाविष्टमेवेतितदाशयः प्रतीयन्ते कैयटस्यतत्रप्रमादादित्यन्यत्रप्रपञ्चितम् स
रजंनस्यचेति उभयथापिसूत्रपाठदर्शनादितिभावः अस्यवार्त्तिकस्यसमासप्रकरणेदर्शनादाह एतच्चेति अत्रद्विशब्दे न
नेति नरसम्बन्धोद्विजस्तदितरमनुष्येभ्यःश्रेष्ठइतिभावः द्विजनरसम्नुपयोरवयवावयविसम्बन्धः द्विजेतरमनुष्येभ्यइ दापू
त्याधारः यतस्समुदायादेकदेशस्यपृथक्करणाङ्गुणादिभिरितिवृत्यातथैवलाभात् तत्रपृथक्करणेस्वघटितसमुदायघट
कस्वेतरेभ्यइतिमतेइदम् यत्तुव्यावृत्तत्वाख्यःसम्बन्धोनिवारणेविभक्तेरर्थः नराणामित्यस्यचद्विजेतरमनुष्यपरत्वात्तद्व्या
वृत्तश्रेष्ठत्ववान्द्विजइतिबोधइतिवदति तन्मतेश्रेष्ठशब्देनसमासप्राप्तिर्बोध्यातत्खण्डयन्नाह कथम्पुरुषोत्तमइति पूर्व
मतेतुपुरुषस्योत्तमेसामर्थ्यमनुरूपपादम् उत्तमत्वस्यनिर्द्धारकगुणत्वात् निषेधइति इदमुपलक्षणम् तत्रैवनिर्द्धार
णषष्ठीत्यपिबोध्यम् एकत्वसम्बन्धसामान्यषष्ठ्याअत्रसमासइतिभावः सामान्यतएवषष्ठीसमासनिषेधयोःप्रवृत्ति
रितिवैत्तरणिकमतमभ्युपेत्याप्याह यद्वेति संज्ञायामिति समासइति हलदन्तादित्यलुक् तुनालुकिसंज्ञात्वभङ्गापत्तेः
कृतालुकस्संज्ञात्वेहितेननतस्य साधुत्वाख्यान अतएवरघुनाथादीनान्त्वन्न सर्वनामानीत्यत्रनिपात नात्सत्त्वा
भावइत्यस्यत्वयमाशयः स्वायत्तसंज्ञाकरणेशास्त्रानुगतायाएवकर्त्तुमौचित्ये नाकृतणत्वस्येवसंज्ञात्वेनोच्चारणान्
तादृशस्यैवसाधकत्वार्थम् तदुक्तम् बाधकान्येवनिपातनानि संज्ञायामन्नद्विजइत्यादिनेष्यतएवाभिधानलक्षणा कृ

ल०श०र०
९१

तद्धितसमासाइत्यकर्त्तरिचकारकेइत्यत्रभाष्योक्तेरितिदिक् पूरणार्थत्वम् तत्सञ्ज्ञकत्वम् कृत्रिमन्यायस्यसञ्ज्ञाविषयत्वादितिभावः उक्तेष्विति अधिकरणसप्तमी पाठ्पूरणमितिनिर्द्देशात्पूरणेननिषेधस्यानित्यत्वञ्ज्ञाप्यते तेनकुम्भपूरणाभवद्दित्यादि उक्तषष्ठेत्यादिचसिद्धमित्यन्ये भाष्यएवेति एवञ्चस्वकल्पनम्भाष्यविरुद्धमितिभावः उक्तोदाहरणस्येति ब्राह्मणस्यशुक्लाइत्यस्येत्यर्थः गुणवाचितयेति सदागुणवाचितयेत्यर्थः पूर्वग्रन्थेति पूर्वग्रन्थेनसमासप्रतिषेधस्योक्तत्वेनपुनस्तेनतत्स्वीकारोविरुद्धइतिभावः भावप्रत्ययान्तएवेति भावप्रत्ययार्थेन्तःसेनोगुणमेवाहेत्यन्वयः तदाह तद्भावेगुणगुणिनश्चेति घटस्यशुक्लोघटःशुक्लइत्युभयप्रयोगदर्शनादितिभावः गुणाभवेति नगुणिनमित्यर्थः किष्टमिति भावप्रत्ययान्तोगुणवाचीतिशब्देनाक्षरमर्य्यादया तदर्थलाभात्क्लेशः पुनरुक्तोशुक्लादिरेवेत्यनेनैवगम्यादिमितेर्निषेधइत्यर्थलाभेन सदेत्यादिपुनरुक्तियस्तमित्यर्थः नकृष्टगुणमिति गुणमेवाहुः किन्तुगुणगताञ्जातिमाहुरित्यर्थः तुल्याएवेति तेनतत्रनिषेधाप्राप्तिरिष्यते तत्रसभाष्यादिसम्मतत्वादितिभावः स्वयमन्येनैवेति तत्रहिसशुक्लादिरेवेत्युक्तम् अस्यापवादमिति भावप्रत्ययान्तःसदागुणवाच्यप्यत्रनिषिध्यतइति तदर्थइतिभावः केवलस्यगुणस्येति भावप्रत्ययान्तोप्यग्रह्यतइतिभावः तेनब्राह्मणस्यशुक्लोरूपमित्यत्रापिनिषेधइतिबोध्यम् तत्स्थैश्चगुणैरिति इदंषष्ठीतिसूत्रेभाष्यम् तत्रगुणमात्रेतिष्ठन्तिवाचकतयागुणिनितेतत्स्थास्तैर्गुणैः गुणबोधकैःशब्दैरित्यर्थः गन्ध ९१
त्वेनेति गन्धशब्देनेत्यादिः गन्धशब्दात्तेनरूपेणप्रतीयमानोगन्धःशुक्लादिशब्दाच्छुक्लगुणइवनगुणिसमानाधिकरणेनतद्विशेषणतयाप्रतीयते किन्तुस्वप्रधानःस्वनिष्ठविशेष्यतावानेवप्रतीयतइत्यर्थः तात्स्थ्यमिति गुणपसामाना

धिकरणेनैव गुणवाचकत्वमित्यर्थः अदर्शनादिति गन्धमालतीप्रकुसुममित्यप्रयोगादित्यर्थः नलत्स्येति घटःशुक्ल इत्यादौ
गुणिसमानाधिकरणगुणस्यापि तैः प्रतिपादनादित्यर्थः शौक्ल्येति तैः सर्वदावगुणपसमानाधिकरणस्यैव गुणस्य प्रतिपाद
नादिति भावः सामानाधिकरण्यमस्त्येवेति गुणिसामानाधिकरण्येन प्रतिपादकशब्दवाच्यगुणवाचकत्वं तत्स्यत्वन्तु शौ
क्लादिशब्दस्तेषां गुणिसामानाधिकरण्येन प्रतिपादकशुक्लादिशब्दवाच्यगुणवाचकत्वन्तत्स्यत्वन्नैव शौक्लादिशब्दास्तेषां
गुणिसामानाधिकरण्येन प्रतिपादकशुक्लादिति दिक् तादर्थ्यरूपसम्बन्धस्येति अत एव गुर्वर्थशब्दस्य गुरोरिदमिति विग्रहद
र्शनम् भाष्ये सर्वपश्चादि। ततः पश्चादिति भाष्यप्रयोगे आद्यादित्वात्सप्तम्यन्तात्तसोपपत्तौ तद्योगे पञ्चमीकल्पने मानाभाव इति
भावः भाष्यप्रयोगोपीति प्रकृतसूत्रभाष्यस्वसार्पत्य स्याप्युपलक्षणमिदम् कैयटेति उक्तमात्रारुचिवीजम् तद्येनत्विति
यद्यपि शेषषष्ठ्यन्तस्वरभेदस्तथापि कारकषष्ठ्यामस्त्येव समासनिषेधस्याविशेषादुभयोरपीति भावः सतिसमास इति षष्ठी
समास इत्यर्थः षष्ठ्यन्तत्वेनोभयोरपि प्रथमानिर्दिष्टत्वेनोपसर्जनत्वादिति भावः पाठक्रमादार्थक्रमो वलीयानिति अप्रधान
मुपसर्जनमित्यन्वर्थतामाश्रित्येतत् तच्च षष्ठीसमासेपि सुवचमित्यस्य चवोध्यम् व्यवस्थेष्यत इति पूर्वनिपातव्यवस्थेष्यत इ
त्यर्थः तच्चेति व्यवस्थारूपमन्यत्त्वित्यर्थः अप्रधानमुपसर्जनमित्यन्वतामाश्रित्य षष्ठीसमासेपि सुवचमिति योजना तत्र कैयटे
न्येति आसीदित्याध्याहारेण धातुसम्बन्ध इति भूते क्त इति वाच्यम् सुरासुरैः पूजितोस्तीत्यादौ दोषात् तेनेतीति अन्यथा वर्त्तमा
ने क्तप्रत्यये क्तस्य च वर्त्तमान इति कर्त्तरि षष्ठ्या दुर्वारत्वेनोपज्ञातशब्दयोगे तृतीयान्तत्वासम्भवः नचायमर्थान्तरे तृतीया पूर्वो
क्तस्त्रकर्त्तरि तृतीया यारवतिर्द्देयात् सामान्यविषयकत्वस्येवेति विधेयविषयएव सत्वा योनानुवाद्य विषय इति सामान्यतो

ल० श्१० ६०
नो०

ज्ञाप्यत इत्यर्थः परे त्वाहुः तक्रकौण्डिन्यन्यायेन वर्त्तमाने क्तेन भूते क्तो बाध्यत इति वक्तुमप्ययोग्यम् यतस्तक्रकौण्डिन्यन्या
९२ यो येन नाप्राप्त इत्यनेन समानविषयः नाप्राप्ते दधिदाने तक्रदानमारभ्यत इति तेन युक्तोऽधिबाधः प्रकृते तु न सः अप्राप्ता-
यामेवोन्त्योपधावृद्धौ अचामादिर्वृद्धिरारभ्यते सोऽप्युक्त इत्यादवतो न तक्रकौण्डिन्यन्यायेन तया तयोर्बाध इति तद्धितेष्वचा
मिति सूत्रभाष्योक्तेः अत्र वर्त्तमाने क्तस्य भूतक्तेन प्राप्तेनारम्भात् वर्त्तमानत्वभूतत्वयोर्युगपद्विवक्षाया असम्भवात्
यदा यत्तस्य वर्त्तमाने लट् स्यात् इति तस्यैवायमपवादो नाप्राप्तो न तु भूते क्तस्येति दिक् अतुमासकार इति मत्यादिसूत्रे
कैयटोऽप्येवम् कारकषष्ठ्या एवेति ज्ञादियोगे तस्याः प्रतिपदविहितत्वादिति भावः एतेनेति उक्तप्रकारद्वयेनेत्यर्थः
कथन्तर्हीति किमो वृत्त्याधिकरणमित्यर्थाभिप्रायेण प्रश्नः व्यर्थः स्यादिति कर्त्रर्थतृजकाभ्याङ्कर्म्मषष्ठ्या एव समा
सप्रतिषेधस्तेनेति भावः परिशेषितेति कर्म्मातिरिक्ते निषेधेन कर्म्मणि परिशेषितेत्यर्थः विधिरूपेणेति अयमेव प
क्षोऽयुक्त इत्यन्यत्र प्रपञ्चितम् उपरञ्जकत्वमात्रम् बाधाभावेन सम्भवमात्रम् जयादिस्य इति अनेनारुचिस्सूचिता
तद्बीजन्तृच्कर्म्मणि चेति सूत्रस्य भाष्यविरोधः तत्र हि कर्म्मषष्ठीमात्रे तन्निषेधस्य वैयर्थ्यमापादितम् आहुरित्यत्रारुचि
बीजन्ताभ्याङ्कारकषष्ठ्या एव निषेध इति प्रत्यासत्तिलभ्यार्थस्यैव ज्ञापनमुचितम् एतत् त्रिभुवनविधातुरित्येतत् सा तु
वन्धकस्येति तस्य हितनाच्चमावर्त्य इति भावः मतान्तरे सानुबन्धनिर्द्देशः कर्त्तरीतिवत्स्पष्टार्थः अन्यथा तत्स्याह ९२
चर्य्यात्कर्त्रर्थकस्यैव ग्रहणे सिद्धे कर्त्तरीति व्यर्थमेव अत एवेति अन्यथा न कर्म्मधारयान्मत्वर्थीय इत्यनेन वृत्तिद्वयक
स्यन लाघवमल्लकेनापन स्यादिति भावः अत एवाह पुष्पशब्दान्मत्वर्थीयो नेति तिरस्कृत इति सूत्रे भाष्ये उक्तम् रूढत्वेन तु

दोषः कर्म्मधारयान्मत्वर्थीयेनैव तेयोर्थः प्रतीयते तस्मिन् वहुव्रीहिणा लाघवाच्चिंता नास्मपेति तात्पर्य्यात् कृष्णसर्प्पवानिति
अत्र जातिविशेषवान् प्रतीयते न तथा प्रतीतिर्वहुव्रीहौ सर्व्वधनीत्यादितु व्रीह्यादिपाठात्सिद्धम् अदण्डी अवाग्मीत्यादौ
मत्वर्थीयान्तेन न समासः वहुव्रीहिणा दण्डसंयोगनिषेधस्य सम्यग्वहुभाषितत्वनिषेधत्वानवगमात् असुव्रतोगस्येति प्र
त्ययस्यात्सूत्रस्थभाष्यप्रयोगेणाक्वचिल्लाघवानादरो यात्सम्पत् ऊर्द्धीद्यवयवेकायशब्दप्रवृत्तौ वीजमाह समुदायइति तथा
चेति इदमुक्तप्रायानुसारेण सूत्राशयवर्णनमात्रम् परवल्लिङ्गमिति सूत्रस्थभाष्यात्तु सत्यभिधाने षष्ठीसमास इष्यत एवेति
लभ्यते तच्चोपरिष्टात्स्फुटीभविष्यति नाभेर्यइति नाभ्यवधिकइत्यर्थस्तदाह दिग्योगलक्षणेति नपूर्व्वशब्दस्य नाभिसापे
क्षत्वात्कथं समासोऽत आह पूर्व्वशब्दस्येति प्राधान्याच्चेति भवति च प्राधान्यस्य च सापेक्षस्यापि वृत्तिरिति भावः समुच्च
येति छात्र समुदायावयवः पूर्व्व इति वोधः एकदेशिसमासम्विनेति लक्षणप्रतिपदोक्तपरिभाषयैकदेशपूर्व्वकस्यैव तत्र ग्र
हणमिति भावः इति भाव इत्यर्थ यथाश्रुतसूत्राशयवर्णनाभियुक्तानां ज्ञापकवादिनामिति भावः एतत्सूत्रप्रत्याख्यानभाष्य
रीत्यातु तत्र लक्षणप्रतिपदोक्तपरिभाषाया नप्रवृत्तिः कर्म्मधारयेणैव सर्व्वप्रयोगसिद्धिः नत्रेवार्थेन्विसाधुत्वम् यथोत्तरमु
त नीनाम्प्रामाण्यात् षष्ठीसमासस्तु द्विषयेऽनभिधानाद्वारणीयः यद्वा इष्ट एवसः ज्ञापकस्य च नोपयोगः तद्ध्वनयन्नक्ष्यति
एषाम्प्रत्याख्यानमिति दिक् निर्द्देशादेवेति न च शब्दपरत्वेपि तुर्य्याणेति वत्र नपुंसकोच्चारणसत्त्वेन तेन क्लीवग्रहणसिद्धि
रिति वाच्यम् योगविभागपूर्व्वकधर्म्ममिति निर्द्देशेन तल्लाभइत्याशयात् भिन्नलिङ्गत्वमुपपादयति शाकलस्येति निर्द्देशे
नेति शाकलखण्डइति निर्द्देशेनेत्यर्थः लभ्यतेइति तेन खण्डमात्रवाचिनस्त्रिलिङ्गत्वेन सिद्धमत एव दन्तार्द्धमास्यात्मति

त०श०२०

९३

तमित्यादयः प्रयोगा उपपद्यन्ते अवयववाची पुंल्लिङ्ग इति भाष्यन्तूपलक्षणं तयेति भावः अमे तु भाष्यानुरोधेन कोशे वा पुंसीति शब्दान्तं च्छेवदन्त्यार्द्धमित्यादौ समासत्वारोपाभिप्रायेण नपुंसकत्वम् शरीरार्द्धं रूणमिति षष्ठीसमासः द्वियां प्रयोगादर्शनाच्चेत्याहुः प्राप्तमिति तद्वोक्तविग्रहे निष्टमिति भावः ननु पिप्पलीनाम्बहुत्वाद्बहुवचनङ्कुतो नेत्याह परवदिति विशेष्यैकत्वादिति अर्द्धस्य विशेष्यस्यैकत्वादित्यर्थः माभूदिति अवयविन एकत्वाभावादिति भावः खण्डसमुच्चये त्विति एकशेषेणेति भावः एतत्सूत्रमिति एकस्यैकदेशिसमासस्य विधायकं सूत्रमित्यर्थः जातावेकवचनम् तेन सूत्रत्रयमित्यर्थः अर्द्धपिप्पलीत्युपलक्षणम् सूत्रत्रयोदाहरणस्य एकदेशिसमासो नारभ्यत इति तत्र भाष्ये उपक्रमात् इष्टत्वादिति तथा च तत्रैव भाष्यम् इष्यत एव पिप्पल्यर्द्धमिति इति प्रयोगरूपैतद्भाष्यादिविरोधादर्द्धपिप्पलीत्यत्रैकदेशिसमासे न सुके षष्ठीसमासो न भवति द्वितीयेति सूत्रस्थभाष्यमेकदेशयुक्तिरित्याहुः द्वितु प्राप्तेति तद्विराष तत्पुरुषेषु परवल्लिङ्गतानिषेधकन्नतत्पुरुषग्रहणं प्रत्याख्याने ऽर्थादेव प्रत्याख्यानं तस्येति भावः त्रिसूत्रमिति उक्तरीत्या कर्मधारयेण सिद्धिमाश्रित्येत्यर्थः एवं हि तत्र भाष्यम् तत्पुरुषग्रहणं न करिष्यते एकदेशिग्रहणात्सिद्धम् द्वन्द्वैकदेशिनोरिति वक्ष्यामि तदेकदेशिग्रहणं कर्त्तव्यम् न कर्तव्यमेकदेशिसमासो नारभ्यते कथमर्द्धपिप्पलीति समानाधिकरणो भविष्यति अर्द्धश्चासौ पिप्पली चेति षष्ठीसमासो पि प्राप्नोति इष्यत एव षष्ठीसमासः अपूपार्द्धं पिप्पल्यर्द्धमितीति भक्त्यादि पदैस्त्रीलिङ्गाम्बतुर्थ्यादिशब्दैरनभिधानात्समास एव नेति तत्रैकदेशिसमासे चतुर्थी भिक्षेति कर्मधारये तु पुंवत्त्वे चतुर्थभिक्षेति नेष्टमिति नशब्दाभ्यम् इत्यादीति आदिना लोपश्चेत्यादग्रहणमिसादेसङ्ग्रहः इमङ्केशमिति न चात्रं पक्षे तस्य व्यवहितत्वात्प्राप्त ९३

न्ताभ्यामन्वयक्लेशः सोऽत्रत्वकल्पनस्येतोऽधिकक्लेशत्वमित्यभिमानात् तद्धानिति परिच्छेदक इत्यर्थः तद्वारेति तत्परिच्छिन्न
जनकक्रियाहि पुरुषक्रियाहि पुरुषस्य परिच्छेद इत्यर्थः तदाह यस्यहीति परिच्छिन्नेत्येवेति तावत्कलतो नत्र न नाश्रयत्वेने
तिभावः द्योतयितुं यस्य स इति गुणीभूतमपि यच्छष्ठ्यर्थं तच्छष्ठ्येन परामृश्यतस्य मासजातपदमत्र तिपाद्यत प्रदर्शनेन द्योतन
मितिभावः यस्य समासजातपदार्थ इति विग्रहवाक्याद्बोधः मासजातो दृश्यतामित्यादौ जातस्येव दर्शनकर्मत्वादिप्रतीते
र्न्नत्वतावता मपदार्थप्रधानोयमिति भ्रमः कार्य्य इति वोध्यम् नास्य प्रवेश इति तत्र विशेष्यविशेषणभाववैपरीत्येनैकार्
थीभावारोपादिति भावः अत्यासेनेति जातपरिच्छेदको मास इति वाक्यार्थो मासपरिच्छेद्यो जात इति त्वर्थ इति भावः वि
ग्रहस्त्वन्नीति वृत्तिविग्रहः प्राधान्यार्थ साम्यायेति भावः अथ षष्ठ्यर्थस्य बहुव्रीहावित्यस्य विप्रकर्षः स्यादित्यनेनाप्यन्वयः पञ्चवि
धे कर्म्मकरणसम्प्रदानापादानाधिकरणारूपे तत्र प्राप्तस्योदकस्याय मितिविग्रहे पि ततः कर्म्मत्वादिना विधानात् निर्विवादत्वादिति
त्वदीय न्यासकृदादीनां चेति शेषः किञ्चेति षष्ठ्यन्तानान्तु नालोकिकप्रवेशः शेष इत्युक्तेरिति विवक्षते अनुपस्थित कल्पनं षष्ठ्यन्त
कल्पनम् असाम्प्रदायिकञ्चेति सर्व्वादीनीति सत्रे सर्व्व आदिर्येषान्तानि नामानीति भाष्ये विग्रहप्रदर्शनादिति भावः पदान्तरे
ति स इत्येतदर्थः अत एवेत्यस्य पूरुषमत इत्यनेनान्वयः प्राचीन स इत्यतः स्वर्व्वाचित्रागावो यस्येत्यादिना अपितेवाधितेवाकोवि
षयेतीति तद्धर केयच्छदात्तत्पद तत्पदेन तत्परामृष्टं वाक्यभेदेनेति यस्य चित्रागावः सन्ति स चित्रगुपदवाच्यो भवतीत्येवं वाक्य
भेदेनेत्यर्थः इयकृत्कारिकाग्रन्थकर्तुरेव तत्र जताभिति वाक्ये गवामेव प्राधान्यं वृत्तौतु सम्बन्धिन इति नास्येव वाक्ये व प्रधानार्थता
म्यमित्यर्थः क्वचिद्गुणेति अर्थानां वृत्तिविग्रहयोर्गुणप्रधानत्वं समानमिति यत्तदविवक्षितमित्यर्थः यतस्तद्विद्वैर्योपदर्शके आख्या तद
ता

ल०श०२०

९४

तेष्टत्यपेक्षयागुणप्रधानभावस्यविपर्य्ययोवैपरीत्यंक्रियाप्रधानत्वादिरूपंदृष्टमित्यर्थस्तदाह विग्रहवाक्यानांहेति परेतुयादृशोगु
णप्रधानभावोऽर्थानांलोकेदृष्टः सकश्चिदविवक्षितस्तद्धितार्थविग्रहवाक्येतिङन्तेलोकदृष्टस्यक्रियाप्रधानत्वस्यवैपरीत्यंकर्तृप्र
धानत्वंदृश्यतइतिश्लोकार्थः तद्धितेतूपलक्षणम् वृत्तिमात्रस्य एवञ्चवृत्तिसमानार्थतदर्थबोधकमतेतदर्थबोधकत्वेनदृ
श्यमानंवाक्यमितिभावः तदेवप्राधान्यंतच्छब्देनदर्श्यते तच्चसर्ववाक्यानामुत्सर्गतःप्रधानपरामर्शकत्वात्तच्छब्देनदर्शितंभव
ति चित्रगोसम्बन्धीयःसचित्रगुपदवाच्यः इत्यर्थादन्यएवतद्वहतीतिसूत्रेभाष्यइदमित्येवसिद्धेइदंत्वर्थमित्याशङ्क्यवहतिवो
ढेतिशब्दस्यभेदोऽत्रतेनविधिरित्युक्तेशब्दभेदेप्यर्थसाम्यात्सिद्धम् यएकार्थेरथम्वहतिसएवइत्यस्यबोढेतीत्युक्तं तत्रशब्दभे
दादित्यस्यवहतीतिक्रियाप्रधानबोढेतिकर्तृप्रधानमित्यर्थः अर्थसाम्यादित्यस्यवृत्त्यर्थोपदर्शकेवहतीत्यत्रापिविशेषणविशे
ष्यभावव्यत्यासाद्वहनकर्तृत्वेवार्थइत्यर्थः वर्तमानकालस्यविवक्षितत्व एवमन्यत्राप्यूह्यम् कालाःपरिमाणिनेतिसूत्रेभाष्ये
पिस्फुटमिदंसूक्ष्मदृशामित्याहुः हेतुकश्चिद्विति तद्धितार्थोत्तरपदविहितेत्यर्थः वार्त्तिकेनुत्तरपदेनेतिहेतौतृतीयेतिभावः नि
यमसङ्कोचेनेति इदङ्कृपदानुरोधेन यद्वा एतस्याधारत्वेतदन्वयद्वारैवतस्यक्रियान्वयइतिशोणादेरस्तिक्रियान्वयवेनतद्द्वारातद
न्वितात्तस्यापितदन्वयइतिप्रकारान्तरेणापितदसङ्कुसम्भवात्तदभावेनमानमक्षकुशलइत्यादौतदाहक्तत्वाद्यप्रतीतेश्चेत्यर्थः
आधेयप्रधानेति अधिशब्दस्याधिकरणवृत्तिरित्यर्थः ईश्वराधीनइत्यस्येश्वररूपाधिकरणाद्यतिरित्यर्थः स्पष्टञ्चेदंस्ववि
धायकेभाष्ये अधिकरणप्रधानस्येति अधिकरणशक्तिमात्रबोधकस्येत्यर्थः अधिकरणप्रधानइति मध्यगताधिकरण ९४
त्वशक्तिप्रधानइत्यर्थस्तदाह मध्येइत्यर्थादिति वनं अन्तरिति वनवृत्तिमध्यभागइत्यर्थः अधिकरणत्वमात्रेति नतुमध्या

लिंतत्तद्वृत्तिरित्यर्थः असङ्गतेरिति अव्ययीभावस्यनित्यत्वेनव्यपेक्षायास्तत्रसम्भवादितिभावः प्राचांग्रन्थमिति प्राचग्रन्थ
मित्यर्थः परस्परसम्बन्धाभावादिति निष्कृष्यपञ्चगोपदमात्रयोः परस्परं विशेष्यविशेषणाभावपूर्वकमेवान्यपदार्थोपस
ङ्क्रमाच्छत्रोपानहप्रियइत्यत्रसमूहबोधपूर्वकमेवर्त्तनुपसंक्रमात्तदसङ्गतिःस्पष्टैव वचनसामर्थ्यादिति तत्सामर्थ्याद्धि
तत्पूर्वंसामानाधिकरण्यमाश्रित्येत्यर्थः बाधितइति त्रयाणामेकार्थीभावेद्वयोर्व्यपेक्षायादुर्लभत्वात् महाविभाषाहि
व्यपेक्षायाएवबोधिकेतिभावः ज्ञापकसिद्धेति वचनसामर्थ्यसिद्धंतत्पुरुषस्यन्यायसिद्धनित्यत्वरूपार्थस्यचानुवाद
मात्रमितिभावः ज्ञापकशब्दोबोधकपरः अतएवेति वाक्यस्यतत्पुरुषपदस्यपदस्यचसिद्धार्थानुवादकत्वादेवेत्य
र्थः त्रिपदेबहुव्रीहौरवादिरीपदस्य स्योत्तरपदपरत्वाभावात्पुम्वत्वन्नस्यात् वार्त्तिकस्यापूर्वकत्वेहिप्राप्त्यात्पूर्वेणोत्तरप
दपूर्वयोस्तत्पुरुषेपुम्वत्कर्मधारयेत्यनेनपुम्वत्त्वसिद्धमेवेति तदाश्रयणमन्यार्थस्यादितिभावः पूर्वनिपातेति त्रि
पदेबहुव्रीहावितरशब्दस्यसर्वनामत्वात्पूर्वनिपातस्यादितिभावः नचैवंपूर्वनिपातव्यावृत्तयेतदाश्रयणस्याव
श्यकत्वेकथंप्रकृतार्थसाधकत्वेनास्यकैयटस्योपन्यासइतिवाच्यम् तपरइत्यादिनिर्द्देशेनत्पूर्वनिपातस्यानित्य
त्वेनापित्तत्सिद्धिरितिपुम्वत्त्वमेवमुख्यम्फलमित्याशयात्कर्मधारयपूर्वपदकबहुव्रीहौतुतस्यविशेषणेनपूर्वनिपा
तापत्तेः सनत्कृतः पूर्वानुवादकत्वेतुनात्रतत्प्राप्तिः दिक्सङ्ख्ययोरभावात् अतएवेति ज्ञापकसिद्धार्थानुवादादेवे
त्यर्थः अन्यथाचित्राशब्देपुम्वत्वापत्तिरितिभावः ननुमौति शब्दिंकसामानाधिकरण्यमादायद्विगुवत्पूर्वकालैके
त्यपिदुर्वारमितिटच् दुर्वारोतआह पूर्वकालैकेति नित्यसामर्थ्यात्तत्प्रवृत्तावप्यस्यप्रवृत्तौमानाभावइतिभावः दि

ल०श्रा०२० गर्थस्तु यदि सामानाधिकरण्यमात्रे नियामकं। न तु निष्ठान्तयोरेवेति तदाग्रहः एवमेकार्थीभावमात्रमपेक्षितं न तु निष्ठान्तेत्या
ग्रहः अत एव येन विधिरिति सूत्रे भाष्ये प्रत्ययग्रहणे यस्मात् विहितः इत्यस्य परमगार्ग्यायणादिसिद्धिप्रयोजनमुक्तम् किंचैवं
९५ प्राचीनशालाप्रियायस्य प्राक्शालाप्रिय इत्यादौ सामानाधिकरण्यनिबन्धनपुंवत्वासिद्धिः पुंवत्वे यथाकथञ्चित्सामा
नाधिकरण्यं निमित्तं कर्मधारये तु निष्ठान्तेत्यत्र मानाभावात् तथा चार्थवृत्तिता द्वन्द्वे नियामिका न तु तन्मात्रवृत्तित्वं वृत्तिता
अतिप्रसङ्गस्त्वनभिधानाद्वारणीयः अत एव भाष्ये संख्याविचनमेव प्रत्याख्यातमित्युच्यते तदा मूलं सम्यगेवेति वा
गृहपदप्रिय इति अत्र वाग्गृहपदयोः सामानाधिकरण्याभावेपि प्रियशब्देन तयोः सामानाधिकरण्याद्बहुव्रीहिर्निर्विघ्नः
एवं तिन्त्रेति गाथस्य लक्षणे द्वादशाहाध्याये दृष्टस्य षडहो द्वादशाहे इत्यन्त्यः तत्राहुः क्रमेण रथन्तरबृहद्वैरूप्यवैराजशाक्वररैव
तानि साम्नामित्यामयनेष्टम्भः षडह इत्यादि वाक्यम् द्वन्द्वेत्वेति बृहद्रथन्तरे सामनी यस्येत्यर्थः नेह द्वन्द्व इति किन्तु
त्रिपदबहुव्रीहिरेवेत्यर्थः स्वरे विशेषस्येति त्रिपदबहुव्रीहौ पूर्वप्रकृतिस्वरेण बृहत्पदस्वरः नञ्जुत्तरपदे परतो द्वन्द्वे तु सति
शिष्टद्वन्द्वस्वरेण बृहद्रथन्तरे त्यन्तोदात्तमिति स्वरे विशेषः स्वरविशेषेष्वस्य प्रवृत्तिरिति समर्थसूत्रे शेषे भाष्ये स्पष्टम्
तत्रैव हेतुमाह नित्येति चोहितो संकोचे समासान्तमात्रकृतविशेषविषयत्वे न चाब्रह्मद्वे सर्वपक्षे इव षड्वस्वप्य हः सु
[illegible] उभयोरनुष्ठानापत्तिरेकस्मिन्नेकमितरस्मिन्नितरदिति स्वनुष्ठानं सिद्धान्तेऽप्यत इति वाच्यम् षडहापेक्षा इतरेतरयोगो
न तद्वयवापेक्षा इत्यदोषात् केषुचित्तिलेन भोजने पिमासंघतैलाभ्यां भोजयितव्यामितिवत् यदि तु श्रुतो बृहत्पदस्वरः ९५
वं बृहद्रथन्तरसामेत्यत्र श्रूयते तदा छान्दसत्वात् त्रिपदे बहुव्रीहौ द्वन्द्वो नेति विकल्पम् यस्य चार्थान्तरभावे गौणकार्थीभावस्त

दाहिद्वन्द्वस्यनित्यतावार्त्तिकसम्मता यदातुतदन्तर्भविशेकार्थीभावस्तदाछन्दसाप्राप्ताविपदोनिर्बाधएवेत्यने स्वरोनभवतीति ना
अधिकस्तद्धिसंख्यायामितिसमासेनद्विगुत्वाभावादितिभावः एवमेवेति पूर्वनिपातार्थत्वमेवेत्यर्थः शब्दप्रवृत्तिनिमित्तेति वैयाकर
णत्वादित्यर्थः पापाणकेति अत्रापिसूत्रेकुत्सितशब्दःकुत्स्यमानपरः अतएव पूर्वपदस्यसदृशत्वाक्षणिकत्वादेव नचदर्शनी
यामातादर्शनीयमातेत्यत्रापिद्वयोरेकविशेष्यकप्रतीतिजनकत्वेनसामानाधिकरण्यात्पुंवत्त्वापत्तिः प्रवृत्तौहेतोःप्राक्तामाना
धिकरण्येएवतत्प्रवृत्तेः इवस्यद्योतकत्वाद्वृत्तेःप्रागपिसामानाधिकरण्यमत्रेतिबोध्यम् भूतपूर्वगत्येति घनेनतुल्यःश्यामइ
तिवाक्येतच्छक्यार्थस्यसादृश्यप्रतिप्रतियोगित्वेनान्वयादुपमानत्वमस्तीतिभावः उपमेयपरत्वमिति तच्चश्यामादिशब्दानांस्व
ष्टमेव खञ्जपाचकइति खञ्जत्वकुणाइत्यभिमानेनेदम् नन्वप्रधानमुपसर्जनमितिमहासंज्ञयाऽनेकस्यप्रथमानिर्दिष्टत्वेऽप्र
प्रधानस्यैवसंज्ञानत्वप्रधानस्येतिबोधयितुंशक्यम् नन्वप्राधान्यद्वयस्येत्यत्रास्यनियामकत्वेनेत्यरुचेराह यद्वेति निरूढविशेष
णेनेति विषयताविशेषप्रकारतावदित्यर्थः तदेवहिलोकस्यविशेषणत्वेनबोध्यम् ननुद्रव्यगुणसमभिव्याहारेकस्यतादृशवि
षयतावत्त्वमतआह रूढिश्चेति रूढिविषयतादृशविषयतावत्त्वमित्यर्थः अवसीयतइति गुणादेरेतादृशविषयतावत्त्वंनिश्ची
यतइत्यर्थः एकेनेति अनेकशीत्वादिजीविनष्टताइत्युदाहरणार्थः असमूहरूपाःसमूहरूपाःकृताइतिवा गुणक्रियेति स
त्पाठकःसच्छुक्लइत्यादौ रूढिशब्देति चेनमतल्लिकामचर्चिकाप्रकाण्डमुद्घतल्लजौ प्रशस्तवाचकान्यमूनीतिकोशप्रसि
द्धमतल्लिकादयः न्याय्यमिति नचपुंवत्त्वारोपवत्तुंस्त्वस्याप्यारोपेणसामानाधिकरण्यादुभयापेक्षयालक्ष्यानुसारेणपरिभा
षाज्ञापकस्यैवौचित्यात् पूर्वान्तग्रहणेनेति पूर्वान्तित्वथाग्रहणेनेत्यर्थः क्वचित्तथैवपाठः पूर्वनिपातेविशेषइति गुणवच

ल० श० १० नत्वागुर्विणीश्च एवस्य सर्वं निपात इति भावः अयमा नसंग्रह इनेनेति लक्षणाप्रतिपदोक्तपरिभाषयेति भावः इदञ्च मतद्वैयटस्य स्पष्टम् कि
९६ यारूपस्येति क्रियापदवाच्यरूपस्येत्यर्थः भिन्नवाचीति पूर्वपदार्थप्रधानश्चायम् नित्येति तेन ताभ्यामविग्रहो न उत्तरपदार्थेति
स्पष्टञ्चेदम्भाष्ये आरोपितत्वञ्च नञा द्योत्यत इति आरोपितब्राह्मणत्वम् ब्राह्मणपदं निमित्तमित्य ब्राह्मणमित्यत्र नञा द्योत्यत प्रवृत्ति०
इत्यर्थः एवमन्यत्रापि बोध्यम् एतदेव भाष्यसम्मतं नञो वाचकत्वे आह आरोपमात्रञ्चेति इदन्नञ्वाच्यमेवोत्तरपदार्थवि
शेषणन्तदाह विषयत्वन्तु संसर्ग इति तदात्म्यारोपश्चात्र नामार्थयोरभेदान्वयव्युत्पत्तिस्तु निपातातिरिक्तविषये इति भावः यत्तु
अत्रापि पक्षे द्योतकत्वे वा नञ इति तन्न समभिव्याहृतपदशक्त्याद्युद्बोधकत्वस्य द्योतकत्वे विशिष्टस्यैव तच्छक्तिविषयतया पृथगु
पस्थित्यभावेन विषयत्वन्तु संसर्ग इत्यस्यासङ्गतेः पृथगुपस्थितयोर्हि संसर्गो भवतीत्याह आरोपितो ब्राह्मण इति अयमन्ते बो
धाकारः आद्ये तु आरोपितब्राह्मणवानिति प्रदर्शनीयम् अत्राद्यमेव युक्तम् न त्वन्त्यम् तस्य नञर्थत्वेपि ब्राह्मणादि पदानाम्
मुख्यसम्बन्धेन ब्राह्मणत्वादिमति शक्तिग्रहात्तत्रारोपितत्वान्वयस्य दुर्घटत्वात् न च नञ्समभिव्याहारात्तदर्थत्यागः सर्वशब्दा
र्थसम्बन्धस्यानित्यतापत्तेः मम तु न दोषः मुख्यसम्बन्धेन ब्राह्मणत्ववतः इवारोपितसम्बन्धेन ब्राह्मणत्ववतोपि तदर्थत्वात् न
ञ्तु स्वविशिष्टस्य तदर्थकत्वतात्पर्यनिर्णायकः इदमेव नञो द्योतकत्वनामैतावतैवार्थाभावव्यवहारोपि विशिष्टानुपस्थितौ द्यो
त्यार्थान्तर्भाविणा शक्त्यावच्छेदकत्वाद्विशिष्टस्यार्थवत्त्वम् समासविधायकशास्त्रबलादत्रैवमेव कल्पनोचिता प्रजयतल
दोत्तु नैवम् अऽदिम्नव स्यार्थम् अन्यथा तत्र कल्पनानञोकस्य तु तत्रापि विशिष्टशक्त्यैव बोधः अवयवशक्तिबोधनद्वाराविशि ९६
ष्टस्य विशिष्टे शक्तिबोधकमेवं व्याकरणामिति दिक् पर्यवस्यतीति भावे एवारोपस्यासम्भवादिति भावः अत एवोत्तरपदार्थप्र

धानत्वादेव द्वि लिङ्गमिति अन्यथोपसर्जनत्वाद्त्वानापत्तौ हल्ङ्यादिलोपस्य दुर्वारत्वे नतद्वैयर्थ्यस्पष्टमेव नचवचनसामर्थ्यादुप
सर्जनत्वेप्यत्वमिति वाच्यम् लाघवेनोत्तरपदार्थप्राधान्यस्यैवज्ञापयितुमुक्तत्वात् अब्राह्मणानन्वयोविशेषश्चिन्त्यः आर्थिका
र्थमिति आरोपिततत्त्ववाधोत्तरंप्रकरणादिनातात्पर्यग्राहकवशान्मासस्तदर्थवोध इतिभावः उत्तरपदप्रधानन्नत्तदर्थप्राधान्यम्
भाष्योक्तमिति अनेनकैयटाद्युपपादितपूर्वपदार्थप्राधान्यपक्षस्य तदसामान्यात्तुच्छत्वम् वोधितम् तच्चान्यत्रप्रपञ्चितम् वास्त
ववहुत्वेति नन्वेकत्वादेशदेशेविषये आरोपितस्योत्तरसङ्ख्यायाश्चपूर्वसङ्ख्याव्यवहारप्रतिवन्धकत्वान्नतत्रवहुत्वभानंशक्ते
नेकत्वस्यैवोपस्थितेश्च अन्यथानेकमन्यपदार्थइत्यत्रापि वास्तववहुत्वसत्वाद्बहुवचनापत्तिरित्यरुचेराह यद्वेति रथोगतइत्यु
पलक्ष्यसायकसमूहस्यापि अनेके इत्यस्यापि च भेदेनोभयविशेषणत्वात् साद्दश्याप्यस्य इति तद्वत इत्यर्थः कारिकायांसदृशा
दीनीतिपाठदर्शनात् तत्त्वकार्येति तद्भिन्नेपि पूर्वन्तेषामार्थिकार्थत्वकथनादाकरविरुद्धञ्चेति विशिष्टेनलक्षितस्यप्राधा
न्येऽपि आकरोक्तोयंत्रपदार्थप्राधान्यहानेरितिभावः मासजातवदिति तत्रयथाजातस्यप्राधान्यन्तथाप्रकृतेब्राह्मणादेरारो
पितोब्राह्मणइतिवोधात् नञर्थमिति तम् नञर्थप्रकारेणाजनितवोधम् तत्समस्तपदं आवृत्यान्यदणादिलक्षकमित्यर्थ
इतितद्व्याख्यातारः भाष्यविरुद्धमिति तथाप्रकारस्य भाष्येऽनुक्तेः अर्थतएववोधसम्भवेनलक्षणायाव्यर्थत्वाच्च समर्थ
यितुमिति मीमांसकाद्युक्तपूर्वपदार्थप्राधान्यमितिशेषः लक्षणेवेति नञोऽभेदएवतात्पर्यइदमुपलक्षणन्निपातानामनेका
स र्थत्वादिदमपि ज्ञापकादिति नञ्समासेउत्तरपदार्थप्राधान्येसतियद्भवति तत्पूर्वपदार्थप्राधान्येपीति सामान्यापेक्षज्ञाप
कादनेकमित्यादावेकवचनस्यापिसिद्धिः एवमाश्रयणेऽतिगौरवंलाघवादुत्तरपदार्थप्राधान्यज्ञापकत्वमेवोचितम् एतदे

ल०श०१०

वध्वनयतोक्तक्कथचिदिति यत्तुइदंसमर्थनंचिन्तामणिश्लोकोत्तरार्द्धस्येति तन्न तत्रोत्तरपदस्यतदर्थत्वा दृशिकत्वेनविशेष्यकबोधे चो
९७ पसर्जनसम्भवेनात्त्वासिद्धयेतापकोपन्यासवैयर्थ्यापत्तेः त्वाद्दृशिकतामात्रेणोपसर्जनत्वाभावाद्विशिष्टस्यत्वाद्दृशिकत्वेनप्रथमपद
प्राधान्यमितितदुक्तिविरोधादितिरहस्यम् नन्विदम्भाष्येनोक्तमत आह उपेति तस्येत्यर्थः एवंसमर्थनेप्यत्रासाधुत्वमेव मुनित्र
यसम्मतेर्थे एवशब्दानांसाधुत्वस्यसर्वसम्मतत्वादितिबोध्यम् वदन्तीति विचारचिन्तामणावित्यादिरितिभावः वतइति यतोवधारि
नं तत्तोऽध्वनयतीत्यर्थः सम्बोधनान्तंअत्रसम्बोधनपदंयच्चतत्क्रियायामिति हृद्युक्तिः प्रमाणम् इत्वोऽर्थाः क्रियाजन्मगणनेतद्वि विशेषता५
धानात् कारकत्वञ्चादिषट्कक्रियाजनकस्यैवकारकेणाकर्त्रादिसंज्ञाविधानात्प्रथमोपस्थितेः तेनतुल्यंक्रियाचे[illegible]दितिवहवः असम
स्तनञ् प्रसज्यप्रतिषेधार्थकइतिशेषः अतएवप्रसज्यप्रतिषेधेऽसमर्थसमासइतितत्रभाष्यमुक्तम् एतत् असमस्तनञः क्रियान्व
यित्वम् वचनपुरुषव्यवस्थेति घटाभावोयद्भावइत्यर्थएकवचनप्रथमपुरुषयोरेवापत्तिरितिभावः अन्यथाघटाभावबोधोक्तव
नपुरुषव्यवस्थावदिदमपिदूषणमित्यर्थः कारकत्वे शिष्टक्रियायांयाइति भूतलेघटोनास्तीत्यादौभूतलाधिकरणकघटकर्तृकसत्ता
भावइतिबोधइतिभावः पूर्वपदार्थप्राधान्येइति असंहितमित्यसंहिताभावइत्यर्थात् असंदेहाइत्यत्रोचितःसंदेहनिश्चयइत्यर्थः इ
तिबोधेनदभावप्रतीतिरार्थीभेदेनधर्म्मिणआरोपात् एवमनुपलब्धिपदेपिबोध्यम् न्यायसिद्धे एवञ्चविशिष्टदर्शनमूलोक्तमि
तितत्त्वम् इत्यस्येवेति अत्रनञानञ्शब्देनचैकशब्दस्यसमासस्ततोधाप्रकारेऽनेकसङ्ख्यात्वप्रतीतेः एकप्रकारिनञ् र्थानत्रुभ
वाच्च एवमेवंनैकरूपोमहद्भानुरितिसहस्रनामपद्येऽनेकरूप इत्यर्थनैकशब्देनरूपस्यबहुव्रीहिर्बोध्यः गतिसञ्ज्ञाविकल्पइति ९७
तत्फलंसमासविकल्पः कथमिति गतित्वेनतेप्राग्धातोरितिधातोःप्रागेवप्रयोगःस्यादितिभावः प्रयोगनियमइति गत्युपसर्गा

सञ्ज्ञाधातोः प्रागेव प्रयोक्तव्याः इति तदर्थः सञ्ज्ञानियमेति धांतोः प्राग्युक्तानामेव गत्यादिसञ्ज्ञानामेषामिति तदर्थः अय
मेवयुक्तोलाघवादितिभाष्येस्पष्टम् प्रयोगोपाधिरिति ल्यवन्त प्रयोगद्योत्यम्पश्चान्मानसबोधविषयमित्यर्थः पश्चादभि-
लाषातिशयः एतेनेति पुरइतिकौतुकेत्यनेनान्वेति तस्यवचनक्रियावाचकत्वम् तस्येत्यस्यसमीपइतिशेषइतिभावः स
ञ्ज्ञानियमपक्षेतुशङ्कैवनेतिभावः माधवइति विभाषेतिसूत्रेतद्धीवित्यस्यनिवृत्त्यापित्तत्सिद्धिरित्यन्ये इहेति ननिवचनेहकृत्वेति
सिद्धम् गतार्थेवृत्तिमिति प्रशाखादेरितिभावः नित्यसमासतामिति तेनान्तोदात्तादुत्तरपदादनित्यसमासेइत्यनेनानित्यसमा
सेयदुत्तरपदं सावकाशमन्तोदात्तन्नतः परत्वात्तृतीयादिर्विभक्तिरुदात्तेत्यर्थकेननविभक्तिरुदात्तत्वमेतेन शाकपार्थिवादित्वादिदं
सिद्धमित्यपास्तमितिभावः ज्ञाप्यत इति अतिङ्ग्रहणाकरणेन तदर्थस्यस्वेष्टत्वम्बोध्यत इत्यर्थः उक्तेर्थेसाधकमिति सुबुत्पत्तेः
पूर्वं समासोबहुलग्रहणादितिभावः [illegible] सुबुत्पत्तेरित्युपलक्षणम् स्त्रीप्रत्ययोत्पत्तेः प्रागित्यपिबोध्यम् अनुवर्त्तत इति
उपरञ्जकतयान्वयसम्भवाद्विरोधाच्चेतिभावः उपपदमितिमहासञ्ज्ञयासुबन्तस्यैवोपपदत्वात् अतएवेति सुबुत्पनन्तरमेव
तेनसमासादेवेत्यर्थः व्याङोरिति व्याङोर्मध्ये विशब्देन तदन्तेनाङ्शब्देन गतिसमास इत्यर्थः आङोत्तूपपदसमास एव आत
श्चोपसर्गेइति समासनिर्देशात् उपसर्गपर्य्यायस्य अधिकरणस्यैकस्यैवोपपदत्वात् इतिकश्चित्तन्न गतिसमासेनसिद्धत्वान्नात्रो
पपदसञ्ज्ञायाएवफलाभावेनाभावात् अतएवकर्म्मणपूर्णीतिसूत्रेऽनुपपदत्वेनायम्व्यवहृतोभाष्ये व्याङोरुक्रमेणाघ्रशब्दे
नतदन्तेनावगतिसमास इत्यर्थः कच्छेनेति अधिकरणत्वस्याविवक्षयात्तृतीया नचकारकत्वात्सिद्धम् कारकत्वेप्युप
पदत्वाहान्यापरत्वादुपपदसमासस्यैवप्रवृत्तेः उपपदमितिमहासञ्ज्ञामाश्रित्यप्रथमान्तस्यनिवृत्तिरुच्यते उततदनाश्रित्य

९८ नाद्यः तदाश्रयत्वेऽतन्त्रिवत्प्रीत्येम राङ्कानुवृत्त्याश्रयणे गौरवात् नान्त्यः इत्याह तथा सतीत्यादि प्राप्नोतेति गतिरिति सूत्रे
पि तदसम्बन्धेऽयं दोषः एवं निर्गतः संयन्तेति च प्रत्युक्तमिति सुविसेतत्सम्बन्धेनैव व्यावृत्तावतिङ् पदस्यैवैयर्थ्यापत्तेरित्यभिमा
नः शेषीकृतेनेति भाष्यकृतेऽतिशेषः कथमिति संहितायामित्यत्वादिति भावः दिगीति दिगर्थस्तु यदि सुविसनुवृत्तैव रथा
हारको व्रजतीत्यस्य व्यावृत्तिसिद्धावतिङ्ग्रहणमेवो योनिवृत्तौ ज्ञापकम् महासंज्ञाकरणाच्च राजदृश्वीत्यादौ न दोषः मुख्यजा
तावित्ति सुबुत्पत्तिम्बिना सम्भवेन तन्विनोपपदत्वाभावेनादोषाच्च निर्गत इत्यादौ शब्दान्तरसम्बन्धात् सर्वथैव सुबुत्पत्तौ लुकि
च पदत्वोत्तरं पदान्तरसम्बन्धे समासेन क्षतिः माङि लुङीत्यादौ सप्तमीति नोपपदत्वम्फलाभावाच्च प्रथमार्थे सोत्रीसप्त
म्येव हितन्निमित्तम् अत एव यशावित्यादावनोपपदत्वम् एधानाहारक इत्यादौ तु क्रियार्थोपपदस्य च कार्य्यार्थमुपपदसंज्ञा
वश्यकत्वे न तत्रास्य प्रवृत्तिव्यावृत्त्यार्थत्तच्चरितार्थम् ध्वनितं चेदम्भाष्ये इत्युच्यते तदा तु उभयोर्निवृत्तिः अतिङन्तश्चेत्यस्यति
ङन्ताच्चत्रित इत्यर्थः एवं च्चोपपदमतिङन्तमिति व्याचक्षाणस्यानवकृप्तमर्थयोरिति सूत्रस्थभाष्यविरोध इत्यलमिति निय
मस्वभावेति अमैवेति नियमस्वभावलब्धेत्यर्थः अमैव तुल्यविधानं यदुपपदन्तदव्ययेन समस्यते अमैव तुल्यविधानमिति
वचनव्यक्तेरिति भावः न तु सूत्रस्थ इति न तु सूत्रे स्यैवकाराहत्याद्धा योज्यते इति भ्रमितव्यमिति भावः तद्देवेति उपपदमित्यर्थः अ
ग्रेभोजमिति विभाषाग्रे प्रथमेति सूत्रे णमुलोऽपि विधानात्स्यामेव तुल्यविधानता अग्रेभुक्त्वेत्यादावमन्तेन समासाभावान्नातस्य निय
मविषयतेति भावः उत्तरपदप्रकृतिस्वर इति उत्तरपदाद्युदात्तत्वमित्यर्थस्तदाह आमुत्वीति अत्राभ्यस्तानामिति नानुवर्तत ९८
इति मते इदम् यद्यपि लित्स्वरणमुलस्वरयोरविशेषः आदिर्णमुल्यन्यतरस्यामिति तेनैकार्थः तथा च अभ्यस्तानामित्यनुवृत्त्यभावपक्षे

परत्वात्स्यादित्याशयमित्यभिमानः लितीत्यनेनापीदं सुसाधम् अन्तोदात्तमिति किद्ध्रस्वरेणेति भावस्तदाह स्वादिष्विति चेत्त्वर्थेऽणपा
डुपक्षेइतिभावः समासान्तापेक्षयेति तत्पुरुषस्य समासस्यान्तावयवइत्यर्थः समासान्ताइतिसूत्रेसमासइति लुप्तषष्ठीकन्त्वो
ध्यम् द्व्यसजिति ऊर्द्ध्वमानत्वे इदम् प्रमाणत्वेतु मात्रचोलुगिति बोध्यम् नन्वेवमप्रकरणविरोधोऽतआह हेमन्तेति चोहेतौ यतो
द्वन्द्वेदर्शनमतोगोऽस्मा ग्रहणाग्रइत्यर्थः स्पष्टञ्चेदंद्वन्द्वार्थत्वम्भाष्यकृतोक्तम् एकवद्भावादिति समाहारद्वन्द्वार्थत्वादित्यर्थः अ
करेति पुंल्लिङ्गस्यैवतत्रोदाहरणादित्यर्थः रात्राह्नाहाःपुंसि प्राप्ते आह सङ्ख्यापूर्वमिति स्पष्टार्थमिति विपरीतनियमवारणार्थत्वदूषन
यन्नक्लेशेनवारणमाह अह्नएवेति लिङ्गादिति अह्नएवेति लिङ्गादिति अह्नएवेतिनियमेतद्वैयर्थ्यंस्पष्टमेव नियमफलन्त्वाक
मिति अह्नानिर्वृत्तमित्यर्थेषष्ठीसमासःसम्भवति तथाप्यत्रसूत्रेऽह्नः सर्वैकदेशसङ्ख्यातपुण्याच्चे त्यस्यानुवृत्तेरेवसिद्धेरेतेभ्यइत्यु
क्ता अव्यवहितानामेवह्नः शब्दभिन्नानामेवग्रहणमित्याद्युपादानादितिबोध्यम् तस्यानभिधानाच्च प्रकरणेति तद्धितसमस्तभावि
परिणामइतिभावः सामर्थ्येति अहन्शब्दान्ततत्पुरुषादच्चएवविधानादितिभावः कथञ्चिदिति शब्दतोनुपस्थित्यावाक्यार्था
न्वयित्वासम्भवइतिभावः यत्त्वाहा देशकृथसोऽनङ्वत्समासान्तएव एवञ्चविभक्तिपरिणामोनकार्यइति तत्रत्वनवयव
वाक्यार्थान्वयित्वासम्भवइतिभावः यत्त्वाहपदत्वापत्तावपकृष्टत्वादवन्तोदात्तत्वानापत्तेः टचिच ज्ञततत्सामर्थ्यादन्तोदात्तत्वंतत्रे
ष्टमितिदूषनयन्नाह भाष्येत्विति अत्रप्राचइति अहन्तस्येतिवक्तव्यमित्यस्यप्रकृतसूत्रस्थ वार्तिकस्यप्रत्याख्यानायभाष्यकृतइत्य
र्थः दीर्घाह्नीति बह्वादिषुअहनीतिपाठादुपसर्जनत्वेपिङीष् अयुक्तमिति कालाद्गुत्रस्तदपवादत्वादितिभावः प्रामादिकत्वादिति
भावः प्रामादिकत्वादिति तदपवादस्यठञः प्राप्तेरितिभावः लुकेति स्वरूपकथनमेतत् अरण्योकारइति एवञ्चवर्णप्राधान्यान्नस

ल० १।०२०

९६

यल्लक्षणामिति भावः ठञो लुकीति निष्कादिभ्यः समासे ठको प्राप्तिरिति भावः निष्कस्य परिमाणत्वेऽदम् उरोभूषणादिवाचित्वे ऽसमासे इ
ति सूत्रे परिमाणवाचिनिष्कादानमेव ग्रहणे ठको लुकीति बोध्यम् न च द्विनिष्के त्यत्र निष्कस्य परिमाणत्वे द्विनिष्कोति ङाय्येव पाठ्यम् उन्
मानत्वेपि उन्मानस्य चेद्विस्तकम्बलयोरेव निषेध इति नियमेन ङीवेव प्राप्नोति एवं द्विविस्तेत्यत्र विस्तादिप्रतिषेधे नङीव भावो ऽनन्तु ठञो
ऽकारणभावादिति वाच्यम् निष्कशब्द उन्मानवाची विस्तादयः परिमाणविशेषा एवेति मतमनुसृत्य हरदत्तादिभिराकरे तथोक्तेरित्या
शयान्न ह्याहि अपरिमाणान्तत्वाद्द्विगोरिति ङीपि निषिद्धे पिठन्नन्तत्वात् प्राप्तस्योक्तरीत्ये व वारणात् एतेन द्विविस्तेत्यपि व्याख्यातम्
न चैवमपरिमाणेति निषेधो व्यर्थः स्यात् तत्सामर्थ्येन तदभावकल्पनापेक्षयोपायसिद्धोक्तरीत्यैव तद्वारणस्योचितत्वात् तेनापि
तदर्थबोधनस्योचितत्वात् तदन्तस्येति तदन्तार्थस्येत्यर्थः उदाहृतमिति अनुपसर्जनादिति सूत्रे वार्त्तिककारैरिति शेषः चतुर्थः
द्विगोरिति ङीविधेस्सवं रूपः ननु द्व्यादिगणे ऽहन्शब्दपाठाद्दीर्घाह्नो त्यादावुपसर्जने ङीषि वान्नापिस्यादिति चेन्न समासान्ते कृते
ऽहन्शब्दत्वाभावात् तस्मात्तद्धिधेति अस्य स्त्रीत्वमङ्गीकुर्वतामते इति शेषः अत एव तन्मतमाशङ्क्य खं मुपपादयति स्यादेतदित्यादि
ना स्त्रीत्वसम्भवेपीति रात्राह्नाहाः पुंसीत्यस्य रात्राह्नशब्दघटितसमासमात्रार्थनिमित्तलिङ्गस्यानन्तरङ्गस्य सार्वत्रिकस्य च बाधेनोपपत्तौ
तद्धितार्थनिमित्तलिङ्गबाधकत्वे मानाभाव इति भावः पुरुषाहमित्यत्रोत्तमैकाभ्यां चेत्यस्मादेशनिषेधात्सुपसुदिनाभ्यामहः स्त्री
वत्वस्य सत्त्वाच्चेत्याशयेनाह चतुर्णामिति परत्वादिति अह्नान्ताः पुंस्यपेक्षया तद्धितार्थे द्विगुरित्यस्य परत्वादिति भावस्तदाह तथा
चेति केवलायामष्टकौ सर्वाङ्गः स्यादेः अत्वे अनेति अनेन स्त्रीत्वमेव नास्तीति सूचितम् तथाहि रात्राह्नाहाः पुंसीत्यनेन नहिभूततद्धिता
र्थनिमित्तलिङ्गबाधकस्य तेन उपस्थितरात्राह्नाहःशब्दार्थविशेषत्वप्रयुक्तप्राप्तिकलिङ्गस्यैव बाधकः स्यान्न तु बहिर्भूतसमाहारविशे ९६

ष्यत्वप्रयुक्तप्राप्तिकस्यापि अतोऽनन्तरङ्गत्वादायाप्तिः किञ्च प्रबलमित्यादौ वाक्यस्यापि कोशेपरत्वात्तित्याह्नाहादि विषये पुंस्त्वबाधापधा
प्रत्तोपरवल्लिङ्गं सूत्रे एकदेशिग्रहणाद्कृत्वा भाष्यकृताह्नतस्यद्विगुप्राप्तेति वार्त्तिकव्याख्यानस्यासङ्गत्यापत्तिः तत्वरात्राह्नाहादिवाधार्थस्याव
श्यकत्वात् न चेदमप्येकदेशिसमासविषयकमेवाऽस्त्वाह्नग्रहणस्य पुराणसुदिनाभ्यामित्यादिचैयर्थ्यापत्तेः अतिरात्रः सर्वाह्न इत्याद्यसि
द्ध्यापत्तेश्च एवञ्चोत्सर्गस्य परवल्लिङ्गस्य द्विगुस्त्वित्यादिनिषेधे तद्विषये तदपवादस्याप्रवृत्तिरित्यपास्तम् अहरतिक्रान्तारात्रिरित्यर्थे स
मासस्य स्त्रीलिङ्गत्वात्तत्र टजचोऽङ्गेपुंव्यवस्थापितिपसत्वेन नास्ति टजचोर्विशेष इति कैयटासङ्गतिश्च तस्मात्त्वाद्यलम्प्राप्तेस्यादित्त द्विता
र्थो द्विगुरिति कोशश्च क्रान्ताद्यतिरिक्तविषय एव न्याय्य इति दिक् द्वे अहनी यस्यामिति बहुव्रीहोरात्राह्नाहः इत्यस्याप्राप्तेरिति भावः बह्वादि
भ्यः ... पाठादुपसर्जनत्वेपि ङीष् तदन्ते तस्यापत्तिः तेन परममहावाहुः सिद्धः अपाणिनीयत्वादिति घासाद्विमहत आत्वपुंवत्त्वयो
र्वार्त्तिकदूतोक्तेरिति भावः आन्महत इत्यत्र लिङ्गविशिष्टपरिभाषाभावस्य प्रातिपदिकादिति सूत्रे भाष्ये उक्तत्वेन पुंवत्त्वाभावात्स्वरत्वा
दात्वमिति न शङ्क्यम् अतिरमसादिति आहीयप्रत्ययस्यैव तेनलुको विधानादिति भावः द्वन्द्वेनेति राजमबहुवचनं द्वन्द्व इत्यनुवर्त्तमाने स
द्ध्यत्यनेन सर्वपदप्रकृतिस्वरस्य तत्र प्राप्तेरित्यर्थः प्रक्रमणादिति प्रक्रमादित्यर्थः प्रकरणादिति यावत् प्रामादिकमेवेति समाहारद्विगावेव
प्रवृत्तिः भविष्यतिमय्यादिति सूत्रस्थे त्रिंशद्रात्रः पञ्चदशरात्र इति भाष्यप्रयोगे तु त्रिंशत् पञ्चदश वा रात्रयो यस्मिन्निति बहुव्रीहिरच् प्रत्ययश्चेति
योगविभागात्समासान्तो वोध्यः पृषोदरादित्वाद्दकार इति कश्चित् पौरस्त्यपरिग्रहाय आह सुदिनशब्द इति सुदिनास्त्विति प्रशस्तास्वित्यर्थः
ष्यत इति एतदर्थमनेनापदिद्वयिपठ्यत इति मतेनेदम् माधवेनोक्तप्रायमिति अत्रारुचिवीजमुक्तम् किञ्च पठ्यत इत्यस्य परवल्लिङ्ग
तापवादत्वात्तत्पुरुषे प्रवृत्तिस्तत्रैव प्रवृत्तौ चापवादत्वमित्यन्योन्याश्रयोप्यत्र वोध्यः तस्माद्विपद्यातियथेत्यादावद्वैनाव मितिवल्लोका

अप्रयत्वादिनिकुस्यलिङ्गमशिष्यमितिन्यायेनसिद्धमितिवोध्यम् एवञ्चव्यध्यो विपथकापथ्यावित्यपिसमे उसद्वितीयेति क्रियाविशेषणा
दितिशेषः ज्योतिष्टोमेनेति तदभिन्नेनयागेनेष्टं भावयेदितितत्रवोधात् नसिद्धेदिति कर्म्मभूतकलशाभावेनद्वितीयानापत्तेस्तुताया
पत्तेश्चेत्यर्थे कथन्तदुपपत्तिस्तत्राहापीति व्याप्यमानत्वादिति तेषान्धात्वर्थेत्वविवक्षितेत्यर्थः ज्योतिष्टोमाभिन्नयागकरणिकामिष्टभाव
विषयामप्यशेपदितिवोधइत्यभिमानः तथावोधाननुभवेनाह पुंस्त्वमेवेति आदिशब्दसमितिपुंस्त्वात्॥ ॥ इतितत्पुरुषः॥ ॥ॐ॥
नन्वप्रथमाविभक्त्यर्थेइत्यनुचितम् अन्यपदार्थेइतिसूत्रात्यदन्त्वसुबन्तमित्यतआह पदेनहीति तत्रविभक्त्यर्थाक्षिप्तंसम्बन्ध्यन्तर्भा
वेणाप्येकार्थीभावाङ्गीकारान्नचित्रगुर्देवदत्तइत्यादौसामानाधिकरण्यानुपपत्तिरित्यन्यत्रविस्तरः तस्यापि सशब्दस्यापि अयमे
वेति कर्म्मग्राम एवेत्यर्थः भिन्नेवेति प्रत्ययार्थस्यप्रकृत्यर्थम्प्रति विशेषणतां विषयेत्यर्थः नहीति तस्माद्विशेषणीभूतेकर्त्तरित
स्याभेदान्वयइतिव्युत्पत्त्यनन्तरमङ्गीकार्य्यम् वहूनामिति सामान्येनोक्तमर्थाविशेषतेविवृणोति चकारादिति आदिनाक्तान्ता
द्यर्थसंग्रहः तेषान्निषेधाभावस्तद्वोधकत्वोपवचनङ्कार्य्यमित्यर्थः वहुव्युत्पत्तीति प्रत्ययार्थप्राधान्यादिव्युत्पत्तीत्यर्थः कर्त्त
व्यमिति इदमुपलक्षणम् विभाषाधिकारादीनामपि न्यायसिद्धमिति तादृशतादृशार्थान्तर्भावेणैकार्थीभावाङ्गीकारादित्य
र्थः विशेषणत्वेनोपस्थितेविशेषणान्यान्वयोपिनेत्यत्रविस्तरः समासेनाभिहितत्वादिति एवञ्चतेषाङ्कर्म्मत्वादिरूपतैवना
स्ति विभक्त्यवाच्यताबच्छेदकरूपेणाकर्म्मकादीनाङ्कर्म्मादिशब्दैरेवानभिधानादितिभावः वचनारम्भएवानुज्ञापनात् नसि
द्धेदिति आतेष्वेतिनिषेधस्तन्नात्रनिषेधविषयेएवपुम्वत्कर्म्मधारयेत्यस्यप्रवृत्तेः किञ्चतत्रजातेरितिपञ्चमीनिर्देशात्ततः
परेयःप्रत्ययस्तदन्तेननिषेधोनायन्तथाएवञ्चसत्यभिधानेबहुव्रीहावपिएडविडभार्य्यइत्येव भाष्योत्तरसत्रोदाहरणन्तुतत्रा

प्ययमेवार्थइतिसूचयितुमेडविडस्यानन्तरापस्येतुभाष्यमते। जातित्वाभावोच्च प्राचामनुरोधेनेति तदनुरोधवाजंतु प्रागुक्तार्थकभा
षितपुंस्कस्यादित्यस्याप्रसिद्धत्वम् षष्ठ्यन्तपाठइति अन्‌ऊ‌ङ्समानाधिकरणेइत्येवंरूपः पुमान्यस्मिन्निति प्रवृत्तिनिमित्तस्याधार
त्वविवक्षया सप्तमी सति सप्तमीवा यस्मिन्नर्थे पुमान्भाषितो भवतीत्यर्थः स्त्रीप्रत्यये स्वरितत्वप्रतिज्ञया प्राप्तमित्यर्थः अचः परस्मि
न्निति उत्तरपदत्वनिमित्तत्वादस्याप्रवृत्तेरितिभावः प्रवर्त्ततेति ननिवर्त्ततेत्यर्थः अस्त्रियामितीति तथाजस्यवहुव्रीतिस्तत्रात्त
त्ततदनुवृत्तेरितिभावः पूर्वसवर्णदीर्घानेति पूर्वशब्देसानुस्वारः पाठः दीर्घाज्जसीतिनिषेधात् इत्थमेवेति पूर्वपदत्वाक्षिप्य
तइत्येवमित्यर्थः चतुर्ष्मीन्द्वन्द्वेइति उपक्रमभाष्यतस्तथैवत्वाभादितिभावः एतेनेष्टन्तद्वन्द्वतोऊात शब्दे वद्वन्द्वेनदोषइ
त्यपास्तम् पूर्वपदमिति येनानइस्यादितिशेषः लिङ्गविशिष्टपरिभाषयेति जरच्छब्दस्यप्रथमानिर्दिष्टत्वात्तेन लिङ्गविशि
ष्टपरिभाषयाजरतीशब्दस्यापिग्रहणेनोपसर्जनत्वेसति जरत्याः पूर्वनिपातइतिशेषग्रहणेनान्वयः विशेषान्तरमिति पर
मः स्वोधर्म्मोयस्येतित्रिपदवहुव्रीहावतिजभावरूपमित्यर्थः महान्नेदइति यदितुकर्म्मधारयोत्तरपदे वहुव्रीहोनीलपदस्व
रः सिध्यतीत्युच्यते तदाचिन्त्यमेवप्राचीनोदाहृतमितिभावः तत्करोतीति प्रमाणाङ्करोतिजनयतीत्यर्थः क्विवन्तस्येदमिति स
वर्णदीर्घस्यजादेराकृतिगणत्वादाप्‌वोध्यः अगतिकागतिरिति भाष्यानुक्तत्वादितिभावः प्रत्ययाश्रयइति तेनलोपस्यवहि
रङ्गत्वेनासिद्धत्वान्नतद्प्राप्तिरितिभावः गोधइत्यादि रशब्दतशब्दयोः प्रत्ययावयवत्वेपिप्रत्ययत्वाभावादितिभावः विरोधाद्वे
ति चेनतुकोपिप्रत्ययापेक्षत्वेनसमत्वमित्यस्यसङ्गहः ततस्तन्त्रीति तस्यास्तस्यामित्यर्थेइदंतिलिति लिङ्गविशिष्टपरिभाषयेति
भावः परिगणनसामर्थ्यादिवजातेय्रेतिनिषेधाप्रवृत्तिरितिवोध्यम् कैयटइति अनेनहिकैयटेनभेदकसम्मार्गत्राङ्गुणइ

ल०शा०र० त्वस्यनिरासेनमुक्तादिगुणाग्रहणंसूचितम् अत्रारुचिवीजन्तु सञ्ज्ञाप्रमाणातिक्रान्ततद्धितान्तसमस्तसर्वनामसङ्ख्याशब्दातिरिक्तःश
ब्दोगुणवचनःशब्दइत्याकरसूत्रस्यभाष्यविरोधः अयञ्चसङ्ख्यासर्वनामेतिचस्पष्टमेव प्रगृह्यसञ्ज्ञेति इग्यणाइतिसूत्रेउभ
१०२ यसञ्ज्ञात्वस्येति भाष्यप्रयोगोपिमानंतस्यसमासत्वेनाप्यगुणवचनत्वम्बोध्यम् कृतार्थेतेति कृतार्थेदुःखशीलप्राप्तौ क्रियाश
ब्दावितिभावः समस्तोचेत्यपिवोध्यम् व्याख्यातइति द्वारवतीति सन्तापिनेष्टाकिमुतद्वीयोर्थइतिमाख्यात्वमिव्याख्यात्वेनसं
ज्ञाशब्दत्वात् भाष्यरीत्यातद्धितान्तेनगुणवचनत्वाच्च त्वेचेति कृत्स्नत्वस्तुछन्दस्येतिवोध्यम् रोहितेयइति पुम्वद्भाववेतिहेत्वप्र
त्ययविधावित्यनाश्रित्येदं तदाश्रये तुरोहितितिरित्यापत्तिर्वोध्या संस्कारविशेषेइति तद्वतीत्यर्थः पत्सन्येति लिङ्गविशिष्टपरि
भाषयेत्यर्थः इत्यविरोधइति एवञ्चमाधवानुसारेणायंलिखितइतिसूचितम् सूत्रार्थञ्चेति तत्रतदर्थभेदेनिपातनेनविः
वाहनिवन्धनापतिशब्दघटितस्यतस्यत्वविवाहितस्त्रीमात्रवोधत्वेनातिप्रसङ्गाभावेनरूढिः कल्पनाफलाभावाच्च तस्याः
भाषितपुंस्कत्वेनपुम्वत्त्वबाधनार्थमितिन्यासग्रन्थासङ्गतेश्च किन्तुतृतीयस्यसहियोगार्थप्रवृत्तिनिमित्तकरणञ्चतोलोक
व्यवहारेणसमुदायोच्चारणेनचस्त्रीविशेषमध्यसपत्नीवोध्येरूढमितिभावः अतएवसमानस्वामिकदासपत्नीतथाव्यवहा शब्द
रः क्वचित्तथाव्यवहारस्तुगौणः किञ्च विवाहनिवन्धनपतिशब्दोनास्त्येव स्वामित्वेनैवहिसवोधकःस्वामित्वञ्चप्रकरणा
दित्यपत्यफलनिरूपितङ्कश्चिदुच्यते तञ्चनयनपुम्वद्भाववोधकत्वेदूषणानन्तरमाह किञ्चेति सापतइति प्राप्नोतीति अदे
इत्युच्यतेतत्रसापत्न्येपुम्वत्त्वम्प्राप्नोति एवञ्चसापतइति प्राप्नोतिइतिभाष्यकैयटयोरुक्तम् तृतीयस्यहिभाषितपुंस्कत्वेनपु १०२
म्वत्त्वापत्तिः सहिसमानस्वामिकत्वेनपुंसोसमप्प्याह पुम्वत्त्ववाधेहितदसङ्गतिःस्पष्टैव किञ्च विवाहनिवन्धनसत्त्वेतस्या

भावितपुंस्कत्वमादाय सापत्नसिद्धेस्तदसङ्गतिः नच सापत्न्यं एवं न सिद्ध्यति सापत्नोऽपि प्राप्नोतीति भाष्यार्थ इति वाच्यम् द्वितीय
पक्षे रूढत्वेन तस्यैवाशिवादौ ग्रहणात्तृतीयादर्शोऽभावेन माधवरीत्या सापत्नाऽइति प्राप्तेरितिदिक् केवलयौगिकस्य ग्रहणान्ने
ति केवलयोगमात्रलभ्यसमानपतिकत्वरूपप्रवृत्तिनिमित्तकत्वेनेत्यर्थः तेनैव स्वविवाहितपतिविवाहितां स्त्रियमाह न तु तत्ते
न व्यक्तिविशेषस्य बोधनाच्च रूढार्थनिपातनमुक्तम् अत एवास्य भावितपुंस्कत्वमिति भावः यद्वा केवलयौगिकपतिशब्द
घटितस्येत्यर्थः एवं चेत्तत्र भाष्यम् सापत्नः प्रकृत्यन्तरत्वात्सापत्नशब्दः प्रकृत्यन्तरमस्तीति अस्यार्थः अन्या प्रकृतिर्यस्य सप
कृत्यन्तरत्वादित्यर्थः प्रकृत्यन्तरमाह सपत्नशब्द इति अत्र निरूपितप्रकृत्यन्तरत्वं सपत्नशब्दस्य शब्दसर्व्यादिपाल्लभ्यते ननु
ङीन्निरूपितं लक्षणाया तथा व्याख्यानमत्र मानम् एवं च सपत्नीति गणपाठमाश्रित्य सपत्नप्रकृतिकसपत्नीशब्देन सापत्न
सिद्धावपि सापत्नापि प्राप्नोतीति भाष्ये पूर्वपक्षः त्वत्सम्मता प्रकृतिर्गणे न पठ्यते किन्तु भिन्नः सपत्नशब्दः तदपि लिङ्गविशि
ष्टपरिभाषया ङीनन्तादण् न सिध्यति बाधसामान्यचिन्तया शिवादिपाठोऽपि बाध इत्युत्तराशयः एवं च केवलयौगिकपति
शब्दघटितस्य ग्रहणान्नेति स्पष्टमेव एवं च मूले द्वितीयस्य पत्नीशब्दस्योत्पादनं माधवानुरोधेन तदेतद्ध्वनयता यत्तु पारक्ष
णाद्युत्पादिना माधवग्रन्थमनुपन्यस्य तत्र द्वितीयसपत्नीशब्दमाश्रित्य तत्तु सापरविरोधाभावमुपपादितः सापत्नमिति प्रयोग
...सपत्नप्रकृतिकादेव ब्राह्मणादित्वात्ष्यञ्निबोध्यः सपत्नप्रकृतिकोऽपि तृतीयसपत्नीशब्दार्थे एव तत्र केवलयोगेन तत्र योगात्
रूढयोरेव ग्रहणादित्यस्य सपत्नशब्दस्य लिङ्गविशिष्टपरिभाषया तत्प्रकृतिकङीनन्तस्य चेत्यर्थः तयोः शुद्धरूढत्वात् तृतीयस्तु
योगरूढः अन्यथा अस्यापि स्वयंकल्पितत्वेन तद्ग्रहणे बीजाभावः मध्यमाद्ययोरिति व्याख्यानात् मध्यमस्य रूढिघटितस्य तु

ल० श०२० योगिकग्रहणोऽस्यारूढस्य कथं त्यागः स्यादिति समुदायो विभावयन्नु सन्निपातपरिभाषयेति द्वादिसकारस्योच्चारणार्थत्वेनाऽलि
धितयास्यानिवृत्त्यायोगात्वेति अपिवोऽस्तम् निष्कर्षेत्विति वार्त्तिकभाष्योक्तस्यापि सूत्रसम्मतत्वप्रवेति निष्कर्षत्वित्यर्थः अत एव सूत्
त्रेणासिद्धत्वादेव प्रकरणोक्तस्यैवेति अनन्तरस्येति न्यायादिति भावः समाविष्टत्वादिति दक्षिणोत्तराभ्यामतसुच् दिङ्नामोनीत्यन
१०२ योः भाष्ये पाठादिति भावः तद्धितरे सूत्रसुप्सुपेति समासः निर्विषयं स्यादिति पुम्वत्वेनापो निवृत्तेरिति भावः अग्यात्त्रेति यत्तुदक्
षुत्सोरित्ति नियमार्थन्तद्धिते चेति सर्वनाम्नः पुम्वत्वन्नास्ति कृत्सोरेवेति अतो मयडातेः निष्टमेव पुम्वत्वमिति तत्र दक्षिणोत्तराभ्या
मतसुजिति सूत्रस्य भाष्यविरोधात् भवन्मयडिति तत्सहकृतवचनेन मयट् नन्नाहरणं पूर्वमिति सर्वनाम्नासमासत्वेन पूर्वस्यत्राह
णोत्वादेः पुम्वत्वापत्तिरिति भावः उक्तोदाहरणयोरिति सञ्ज्ञोपसर्जनघटितोदाहरणयोरित्यर्थः एतत्र सर्वनामसञ्ज्ञकत्वस्यैवाभा
वेन लक्षणाभावेनेति भावः अतिसर्वशब्दस्येति उपलक्षणमिदम् सञ्ज्ञाया अपि कन्यापीति वृत्तौ वृत्तेः प्राकृत्यर्थः वैयाकरणाभा
र्य्यइति नद्याभ्यामिति सूत्रस्य कैयटहरदत्तानुरोधेनेदम् भाष्येइति नकोपधायाइति सूत्रस्येत्यर्थः इतुकेरिति हस्तिन्शब्दस्या
दन्तत्वाभावे नततो जातिलक्षणाङीषोऽप्राप्तेरिति भावः दावादिभिरिति इडविडोऽपत्यं स्त्री इडविडा सा भार्य्या यस्येत्यर्थे समासे एतत्
न्निषेधाभावेन पुम्वत्वम्भवत्येवेति भावः अनूङित्यस्य पर्य्युदासत्वे ऐडविडं दरदि केति निषेधविषयोत्तरसूत्र विषयकर्म्मधारयउदा १०२
हरणात् बहुव्रीहावशेपुम्वत्वनिषेध इष्ट एवेति तु न वाच्यम् उत्तरत्राप्येतदनुवृत्ति नेत्रापीदृशार्थकत्वमितिध्व नयितुन्तयोरुक्तेः
इडविडादेरनन्तरापत्यत्वे जातित्वाभावाच्च परस्परेति ब्राह्मणीत्यत्र हितेनापि ङीनिवोक्त इत्तिभावः यदित्तु तत्र ङीषितिपाठस्तदाकर
विरोधोबोध्यः सामानाधिकरण्यस्येति दर्शनां संभीत्रियेन इत्यर्थान्तिदासेपशाब्द इत्यादिउच्चारणार्थइति तन्मात्रार्थैः फलाभावान्नो

तपरकृत्त्राप्रवृत्तेरितिभावः प्रत्याख्यातमिति अव्यावर्त्तकत्वात्तस्याग्रहणम् तस्याविशिष्टरूपोपादानविषयत्वाच्चेत्यपिबोध्यम्
विद्यमानतावाचीति दृशामाम्पुत्राणांविद्यमानत्वेइत्यर्थस्तत्फलितमाह दृशास्विति अव्यभिचारादिति पूर्व्वराहस्पष्टादृश्यंसदृश्पूर्व्वेरा
हमित्यादावपि अवयवस्यप्रथमानिर्दिष्टत्वेनोपसर्ज्जनत्वमस्त्येवेतिभावः अव्यवहारकमिति समासस्योपसर्ज्जनत्वासम्भवादितिभा
वः यद्यपिसहकृत्वप्रियइत्यादौसमासस्योपसर्ज्जनत्वसम्भवः सर्व्वत्रोपसर्ज्जनमेवेतिविशेषणासामर्थ्यादितत्त्वामइतिभावः नादरा
स्वबहुव्रीहेरेवेत्याह बहुव्रीहेरिति व्याख्यानाच्चात्रोपसर्ज्जनपदेनलौकिकंशास्त्रीयञ्चतद्गृह्यते तेनसपुत्रइत्यादावपिउपसर्ज्जनत्वा
वयवकत्वम्बोध्यम् सपूर्वायाइति एतच्चवृत्त्यनुरोधेन अत्रसहविद्यमानःपूर्वायस्याइत्यनेकमन्यपदार्थेइतिबहुव्रीहिरित्यन्ये अ
न्यत्रापिकेति अव्ययादेरित्युक्तत्वादित्यपिबोध्यम् अतएवगोर्विंशतिरित्यादौन नक्षत्रेयइति तद्धितेत्वन्वेतच्छब्दस्यतत्सामा
नाधिकरण्यात् तेनचन्द्रोनेतायस्यसचन्द्रनेतामृगइतिसिद्धम् समासविशेषेतुबहुव्रीहिर्नक्षत्रवृत्तित्वाद्दोषःस्यादेव उपलक्ष
णमिति स्पष्टञ्चेदङ्कुतिश्चेतिसूत्रेभाष्ये अव्यात्रीत्यादिप्रयोगेनये त्यत्राव्याप्तिः अनपूषेत्यत्रातिव्याप्तिनिवृत्तिंतत्रापीदृशार्थक
त्वमितिध्वनयितुन्तयोक्तेः इडविडादेरनन्तरापत्यत्वेजातित्वाभावाच्च परस्परेति ब्राह्मणीत्यत्रइतिभावः सामानाधिकरण्यास
म्भवादिति यद्यपिप्रातःकल्पमित्यादाविवृत्तौशक्तिमत्प्रधानत्वंसम्भवति प्रातःकालेस्वरूपतःशोभनत्वस्यनिरूपयितुमशक्य
त्वात्तत्रैवप्रयोगाच्च कर्म्मपर्य्यन्तलक्षणेतिबोध्यम् व्यावृत्तिमध्यमध्यमस्यनपूर्व्वपदत्वम् यत्पूर्व्वपदन्ततःपरत्वञ्चनधर्मीशब्द
स्येतिभावः पूर्व्वपदाक्षेपेइति यौगिकपूर्व्वपदाक्षेपेइत्यर्थः वस्तुतस्तत्फलञ्चिन्त्यम् आकरग्रन्थेति केवलपदस्यलोपेकेनमुदुर्मां
केवलाभ्यामित्यादौचसजातीयान्याभावेएवप्रयोगेणत्वदुक्तार्थेमानाभावादितिभावः एतच्चेजादेरितिसूत्रेभाष्येस्पष्टम् निवृत्तिधर्मे

ल०श०र० ति प्रवृत्तिधर्म्मस्यस्योपलक्षणम् स्मामितिर्जेमेर्द्दे तेसुतं अभिषुतंसोमं पिबेतितदर्थः प्रयुक्तात इति रूपकेणेतिशेषः इतिशब्दादि
ति लौकिकविवक्षानुसारकत्वात्तस्येतिभावः कर्म्मव्यतिहारः परस्परस्यहरणादिः अव्ययीभावत्वमिति तेन तस्याव्ययत्वम्बोध्यम्
१०३ एतच्चवृत्त्यादिग्रन्थपारायणादिस्थितम् एवञ्चस्वार्थमयीति इदञ्च सतिशिष्टस्वरवलीयस्त्वनाश्रयणेन यदितुनपजीव्यत्वेन बहुव्रीहि
सञ्ज्ञयासमावेशोपिसतिशिष्टस्वरवलीयस्त्वेनाव्ययीभावत्वप्रयुक्तसमासान्तोदात्तत्वेनसिद्धिरित्युच्यते तदायमेवप्रयोजनमि
तिबोध्यम् समावेशफलन्त्विच्प्रत्ययाव्ययत्वयोः सिद्धिः विषयविशेषेति युद्धादिरूपमपदार्थः उभयस्त्रामरेति इदम्वेदभा
ष्ये यद्यपिउभाभ्यांहस्ताभ्यामाभरेति व्याख्यातंतथापिसमुदायनिपातनादेव बहुव्रीह्यधिकारेपितत्पुरुषोदयमव्ययत्वाच्च
मोलुक इदमप्यस्यफलम्बोध्यम् आश्रितेति आरोप्येत्यर्थः स्वतन्त्रोजातिज्ञानुवाचीत्यर्थः उपज्ञुरिति जानुसमीपमित्यर्थः ए
कदेशइवेत्यस्यविवरणमविभागेनेति अवयवावयविनोर्हि अविभागलक्षणसमवायसम्बन्धएवम्प्रकृतेपीति इवेत्युक्तन्त
च्छनयन्नाह एवञ्चगुणेति गुणोपसर्ज्जनद्रव्यवाचिन इत्यर्थः एतद्वृत्तिविषयमेवगन्धस्यतादृशत्वमिति नपूरणेतिसूत्रस्थस्वग्रन्थ
विरोधः एतदेवाभिप्रेत्यभाष्यकैयटयोरुक्तं कुङ्कुमाद्यनुलेपनमपिदेवदत्तादेरविभागापन्नोनिलानंयदिविवक्षितं तदासुगन्धि
र्देवदत्तइति विभागेनावस्थानेतु सुगन्धइतीति नतुद्रव्येति चन्दनत्व जातिविशिष्टद्रव्येत्यर्थः सुगन्धिर्वायुरित्यत्रापिगन्धाश्र १०३
य्याणांसान्तस्पृष्टानांवायुविभागापन्नानामेवग्रहणमितिनदोषः एवंसुगन्धिपुष्पंसलिलञ्चेत्यत्रापिद्रष्टव्यम् कोशेपिद्र
व्यकवनइत्यस्योक्तएवार्थः आध्मीयीति ध्मानवहुनवापुराणप्रातन इत्यर्थः दुर्घटेति अत्रकेचित्चितपत्रचारुत्वबीजन्तुतादृशार्थत्वे
उत्तभाष्यादिविरोधस्तिदिक् यद्वारादिनोक्तस्त्रिन्त्वम् परनिपातायज्ञापकाश्रयणस्यावश्यकत्वात कथयन्तीहीति सञ्ज्ञात्वाभावेन

हि[illegible]संख्यायामित्यस्याप्राप्तेरिति भावः नच तत्रोत्ति सिद्धइति इदं लक्ष्मीशब्दमात्रविषयप्रकारान्तरम् अन्येषु तु अविभक्तिकपाठे
कार्यमविभक्तिकपाठात्तद्धि वक्षितम्बोध्यम् एकवचनान्तस्यैवेति तदवयवकस्यैवेत्यर्थः सिद्धमिति बहुवचनान्तेन विग्रहात्तदाह
कृशइति बहुलक्ष्मीकइति बह्वीर्लक्ष्मीर्यस्येति विग्रहः तत्प्रामादिकमिति विशेषविहितत्वेनास्यैवोचितमिति भावः निषेधमुखेने
ति तत्पक्षेहोत्तरनिवृत्तावेवास्यतात्पर्यमिति भावः पक्षमाश्रित्यवेत्यनेनं सपक्षोभाष्यसम्मतइतिसूचितम् ह्रस्वादिग्रन्थानामितित्र्या
दिनाभाष्यम् अस्यपर्यालोचनयेत्यवान्वयः तत्रप्रकृतसूत्रस्थेनोक्तसमासान्तेइत्यर्थलाभोबहुव्रीहिप्रकरणस्थेनसङ्ख्याव्ययेत्यादि
सूत्रस्थेनशेषाधिकारस्यादित्यस्यलाभइतिबोध्यम् बाधापत्तेरिति इदञ्चसमासान्तमात्रापेक्षंशेषत्वमितिवदन् कैयटाद्युक्तम्
अनन्तरबहुव्रीह्यधिकारापेक्षशेषत्वं नकवपेक्षं नापिसमासान्तापेक्षमितिवदतोभाष्यकारस्यमतेनेदन्दूषणम् किन्तुप्रतिपदोक्तत्वमा
त्रेणनवाकवकित्वं नचसावकाशकत्वेन नचात्रतदस्तिकबभावेसावकाशत्वादितिभाष्योक्तन्दूषणम्बोध्यम् तदेदमिति विशेषणश
ब्देनपरिच्छेदकउच्यतेइत्यभिमानः एवंहियदाअस्यचित्राःसन्तीतिनिर्ज्ञातं तत्सविच्छेदायचगावइतिप्रयुक्तं तदागोचित्रइत्यस्याप
ग्रहणम् त्तिः तस्माद्विशेषणत्वेनसिद्धावपिसप्तम्यंव्यधिकरणसमाससञ्ज्ञापनार्थमितिवक्तव्यम् तक्रकौण्डिन्यन्यायेनेति इदञ्चित्यमनुवाद्य
त्वात् तस्मादत्रपदार्थविवक्षयोभयोभयोरप्यप्राधान्यत्वेनप्रथमनिर्दिष्टत्वेनवानियमेप्राप्तेउत्तरपदार्थविशेषणस्यैवपूर्वत्वनिय
मार्थमितिबोध्यम् जश्त्वम्पदत्वमिति यत्पदेनयस्यपदंस्वार्थस्यसगृह्यतेचाद्विवितिभागुरिमतम् यस्येतिबहुव्रीहिः ॥ ॥ इतिव
हुव्रीहिः॥ ॥[illegible]॥ कर्म्मीदीनामिति अन्यपदार्थेत्यर्थः समप्रधानानामिति समप्राधान्यम्परस्पराविशेषणत्वम् सम्भवतीति
पुष्पवत्तावादितिभावः समुच्चयान्वाचयोस्यातामिति एकार्थीभावविषयावितिशेषः तत्रैकस्येतरामिति तस्यैवानयादितिभावः

२०४

द्वैधमिति यथातु चार्थइतिसूत्रे भाष्यम् तथो भयत्रापिसमुदायस्य विशेष्यत्वम् आद्येउद्भूतावयवभेदोऽन्येतिरोहितावयवभेदइति
अन्यपदार्थप्राधान्ये बहुव्रीहेरिव चार्थप्राधान्ये द्वन्द्वस्यैवोचितत्वाच्च उद्भूतावयवभेदत्वमारोपितावयवगतसङ्ख्यावत्त्वमेतदनारोपे
तिरोहितावयवभेदत्वम् अन्यथास्वपदेस्तेषामुभयत्रापि तत्तद्रूपेणाबोधात्तत्त्वनुरूपपादम् आरोपानाययोश्चशब्दस्वभाव एववी
जम् अत एव बाधेघटश्चपटश्चेत्येवविग्रहो श्वेतयोस्समाहार इतितत्त्वम् चशब्दान्तर्भावेणोवप्रवृत्तिनिमित्तयोस्सामानाधिकरण्य
न्तत्त्वार्थः नीलत्वसमानाधिकरणोत्पलत्ववदुत्पलन्नीलमितिबोधात् अत एव तदन्तर्भावेणोवप्रवृत्तिरायातीतिभावः द्वन्द्वस्याप
त्तिरिति आशंसासम्भावनयोरविशेषइतिभाष्यप्रयोगइवनीलोत्पलयोरभेदइत्यादौ अभिदादिपदान्वयेतयोस्सामानाधिकरण्यप्रस
पश्चान्न[illegible]तावपिद्वन्द्वरूपपदसंस्कारवेलायान्तदविवक्षणात् यद्वा शब्दरूपपरावेतौ एव अभिन्नार्थत्वान्नैकशेषः ना
पिसामानाधिकरण्यप्रयुक्तः कर्म्मधारयः तयोश्शब्दयोरर्थभेदाभावादविशेषोऽभेदो वेतितदर्थइत्याशंसायांमत्पूर्वं च्चेत्पत्रकैय
टेस्पष्टमितिदिक् ससौष्टवेति सौष्टवौदार्य्ययोर्व्विशेषात्तच्छालिनामित्यर्थः समाहारेति समाहारेद्वन्द्वे प्राण्यङ्गादीनामेवेतीस
र्थः अध्वर्युशब्द इति अध्वर्युगणाकृतोः सम्बन्धाव्यभिचारादितिभावः कथन्तर्हीति व्यक्तिप्राधान्यविवक्षया निर्वाहः सकल
तरुरंजनस्याविवक्षितत्वादितिभावः चत्वार इति नद्यादेशो इतिभिन्नेपदे द्विवचनम्पुंस्कत्वान्यतरापत्तेरिति भावः जनपदो
हीति जनानाम्पदं स्थानं यत्रेति व्युत्पत्त्या मनुष्यवासयोग्यइत्यर्थः तादृशाश्चयो ग्रामनगराद्यपि अत एवेति अत्र भाष्यमुदा २०४
सीनम् एकशेषोबाध्यतइति निपातेनेतिशेषः गोऽश्वमित्यइति एवम्पररूपपक्षेपिनेतिबोध्यम् प्रतिपदविधानार्थमिति
सनपुंसकत्वियस्यप्रतिपदविधानत्वार्थमित्यर्थः तदेवोपपादयति तच्छब्दे नहीति एकवद्भावभाजइति विनिगमनाविरहात्

पदादेकवद्भावइत्यर्थः प्रतिपदविहितमिति अनवकाशत्वेऽपिबोध्यम् विधेर्यायत्वेन मृगशकुनिग्रहणावदस्यानियमार्थत्व
मप्युदाहृतमिति विप्रतिषिद्धमित्यस्येत्यर्थः तदभावस्त्वद्रव्यवाचिनां समाहारद्वन्द्व एवेत्यर्थे प्रवृत्तेनेतरेतरद्वन्द्वापत्तिरित्याशयः इ
त्यादाविवेति काममक्रोधयोर्विरोधाभावेऽपि सुखदुःखादेरिवद्रव्यवाचित्वाभावेन नियममात्रस्यैकोटावप्रवेशात् येनविभाषानु
कर्षणान्नियमएवोचितः तन्त्रावेशेवन्नियमः वैकल्पिकोयस्समाहारे द्वन्द्वः सद्रव्यवाचिनामेवेतिनियमः तदाशयइति एवञ्च
विप्रतिषिद्धपदाभावेऽद्रव्यवाचिनामेवेतिनियमः स्यात् एवञ्चात्रापुमर्थस्यात्तत्स्वत्वेतु विप्रतिषिद्धानामेवेतिनियमात्तस्य
चबाध्यसामान्यचिन्तयाऽनेननिषेधात् अतएवब्रह्मप्रजापत्यादिपाठश्चरितार्थः परिगणमनियमइति सचसङ्ख्याकृतमात्मा
नादितिभावः नियमस्येति नियमस्यैवेत्यर्थः तदुदाहृतमिति प्राचीनोदाहृतमित्यर्थः निषिद्धत्वादिति तथाचसमाहारद्वन्द्वः
स्यादितिभावस्तत्रशङ्कते नन्विति वाक्यमेवस्यादिति एतदेवप्राचाम्पक्षे दूषणसारम् अभ्युच्चयमाह किञ्चेत्यादि कथञ्चेत्तर्ही
ति अवयवेषु दशत्वसङ्ख्यान्वय इत्यभिमानः गृह्णातीति नच्चैवं समाहारेदशत्वान्वयविवक्षायाः प्राप्तसमाहारद्वन्द्वनिषेधोक्ति
रितिवाच्यम् द्रव्यसङ्ख्यानवगमेनैतत्सूत्राप्रवृत्तेः प्रधानस्येति ममतुप्राणापङ्क्त्यादिषु द्वन्द्वश्चेतिनियमादितरेतरप्रयोगापत्तेरित
द्विधानिजास्यचारितार्थ्यम् नचनियमनिषेधेऽनुभयोरापत्तिः असामर्थ्येनसमाहारे तदप्राप्तेरितिभावः दिगिति दिगर्थस्तु
यदापन्नोऽष्टद्वारकसम्बन्धेनसमाहारेवदशत्वान्वयविवक्षातदास्त्येवसमाहारेद्वन्द्वप्राप्तिः प्रधानस्यैवसापेक्षत्वाद्द्रव्यसङ्ख्या
वगमाच्च किञ्च समाहाराप्राप्तावनियमाभावेननियमाप्राप्त्याकस्यानेननिषेधस्स्यात् तस्मात्सर्वंसूत्रवदयमप्युभयोर्निषेधः
अतएवोत्तरसूत्रविषयेसमाहारद्वन्द्वासिद्धिः सामर्थ्येन सामर्थ्येसमासकल्पनापेक्षयैवमन्वयकल्पनेनैवोचितत्वादिति अथ

वे
ल०श०र०

१०५

यीभावस्यैति समानलिङ्गवचनत्वादितिभावः यदित्विति एकवद्भावपक्षेइतिशेषः नचवहुव्रीहि अनुप्रयोगेऽपदंश मित्यस्या
सिद्धिः उपदशाइत्यस्यैवोचितत्वादितिवाच्यम् दिगर्थोक्तरीत्यावयवद्वारकसम्बन्धेनसमुदायार्थेऽन्वयेनद्वन्द्वार्थस्यैकवद्भावे
नतत्सिद्धेराह उपदेशस्येति अव्ययीभावानुप्रयोगेतुनाव्ययीभावादित्यादिनानदोषइतिभावः अव्ययीभावानुप्रयोगेसामानाधि
करण्येतुसमीपसमीपिनोरभेदविवक्षयाबोध्यम् इतरेतरयोगेतुवहुव्रीहिरेवानुप्रयोगस्तस्यसमीपप्रधानत्वात्समानत्वात्समान
लिङ्गवचनत्वाच्च अतएवत्त्रनाव्ययीभावानुप्रयोगः अत्यन्तसहचरितेति तत्त्वंएकहविर्भागित्वेनवेदकल्पसूत्रप्रसिद्धत्तयालो
केप्रसिद्धसाहचर्यतयावेत्यप्यत प्रायुक्तेति तदार्षमित्यन्ये अकारेसतीति सचेत्स्यात्कइतिबोध्यम् निपात्यतेइति उत्तरस्वहेतुक
तोङीत्वं वा सिद्धे निरामतएवचच्छन्दसिमातरपितराविति सूत्रद्वयविषयम्पूर्वोत्तरपदयोरराविति भाष्यन्तुपूर्वोत्तरपदयोस्सतोःपूर्व
पदस्येत्यर्थपरतयाकैयटेनव्याख्यातमितिनतद्विरोधः अतएवउत्तरपदेइत्यधिकृत्यस्यनवाधनवाधइतिदिक् वाक्त्वजत्वचमिति
गुर्वक्षरत्वेपिवाक्शब्दस्यपूर्वनिपातस्तत्प्रकरणानित्यत्वात्॥ ॥इतिद्वन्द्वः॥ ॥ ॥अपत्यमन्तर्हितमिति पौत्रप्रभृत्यप त्यमि
त्यर्थः यूनेति अपत्यविशेषवाचकेनयुवशब्देनेत्यर्थः तत्साहचर्येणापत्यविशेषवाचकस्यैववृद्धिशब्दस्यग्रहणम् नतुवृद्धिप्यस्य
त्यादिनासङ्केतितस्येतिभावः अनुवृत्तेरिति सारूप्येसतितल्लक्षणाविशेषेएवैतत्प्रवृत्तिरितिभावः नियतोनस्यापिति सरूपाणामि
त्येकशेषेतुस्त्रीवाचकस्यापिशेषापत्तिः नचेष्टापत्तिःकैयटादिविरोधात् तेहिपुमान्स्त्रियेत्येकशेषोऽत्रोक्तः नचतदादितःशेषे १०५
पुंनपुंसकतइत्युक्तेरेतावित्यस्यानियमेनसिद्धेर्गार्ग्यावित्यत्रतुरूपेनविशेषइतिवाच्यम् अद्वन्द्वतत्पुरुषविशेषणानामितत्रद्वन्द्व स्त्रा०
पदेनतदपवादेकशेषस्याप्युपलक्षणेनतदप्राप्तेरितिभावः तदितरेति ताभ्यांस्त्रीपुं[illegible]भ्यामित[illegible]रः पुम्योगादित्युतल्लुतङीषा

दावितरेत्यर्थः तात्पर्य्यादिति वेदेवशब्दोपा[illegible]नसामार्थ्येनविशेषणंस्वेतत्तत्तदक्षराणएवेत्यन्वयेनेतिभावः तदक्षराणएवेत्य[illegible]व्यावर्त्त्यमा
हइन्द्राणपाविति मातरमपीति पितरत्वारो[illegible]रित्यर्थः त्यदादिभिरेवेति सर्व्वेपदंसावधारणमित्यर्थलब्धोयमेवकारः इत्येवार्थोमाभूदि
तिवान्वयः सर्व्वेइत्यस्यत्यदादिभिरमैस्वेत्यर्थः शब्दपरेति गणपाठोपीत्यादिः आद्यादित्वादिति पुंनपुंसकतेत्यत्राप्येवमेव किन्तुविशि
ष्येति अनेनगान्तरङ्गस्वार्थलिङ्गवाधेनचरितार्थस्यवहिरङ्गविशेष्यसमान्यप्राप्तलिङ्गवाधकत्वेमानाभावइतिन्यायसिद्धमस्यत्
चितम् अतएवएकशेषविशेषणेपित्यदादितइत्यस्याप्रवृत्तिः अतएवपुंस्त्रीसद्धेस्त्रीसद्धेगावइमांश्चरन्तीतिभाष्यप्रयोगस्सङ्गच्छते इ
मांइत्यत्रस्वननैवैकशेषः अनारङ्गादिति विभक्त्यनपेक्षत्वेनतदुपपत्तेःपूर्व्वमेवसइत्यर्थः वाधकमात्रपरतयेति वाधकमात्रत्वञ्चएवं
त्वस्यप्रवृ[illegible]प्रवृत्तिप्रतिवन्धकत्वम् इत्यत्रयथेति भिदिरित्यादाइकइत्यस्योपस्थितावयवषष्ठीत्वेनालोन्त्यस्येत्यस्यप्रवृत्तिप्रतिवन्ध
कत्वमात्रे[illegible]कइत्यस्यालोन्त्यापवादत्वव्यवहारइतिभावः ॥६०॥ ॥इत्येकशेषः॥ ॥६१॥करणोल्युडिति यच्छब्दकैःपदकैःपरार्थोचि
तत्वार्थ[illegible]एवंतत्तदाभिधासमुदायाभिधाभिरूपस्यावंसावृत्तिः विशिष्टार्थविषयकमिति राजपुरुषपदराजसम्बन्धवतिपुरुषेशक्ते
मित्येवशक्तियहाकारेणतच्छक्तेस्तद्विषयकत्वमितिभावः पर्य्यवसानगत्यातुतस्याअवयवशक्त्यालभ्येपर्य्यवसानमित्यन्यदेतत्
शक्त्यन्तरमेवेति तद्वाकर्त्तव्यमेवेत्यन्वयः तत्फलमितिविशिष्टैकोपस्थितिस्तत्फलमाह अतएवेति मीमांसकानामिति अरुणाधिक
रणवार्त्तिकेस्पष्टमेतत् विस्तरस्त्वन्यत्रद्रष्टव्यः योगरूढिस्वेति पङ्कजादिशब्देइतिशेषः रूढशक्त्यनुसारिणेति रूढत्रिकावयवपद
शक्त्यसम्बन्धरूपेत्यर्थः निरूढेति प्रयोजनाभावादितिभावः एकत्रवहुव्रीहोचरमपदस्यैवतत्रापिडप्रत्ययादेर्लक्षणायैवोपपत्तौ
समुदायिसमुदायशक्तुच्छेदइतितात्पर्य्यम् अपसिद्धान्तादिति अनुपपत्तिसन्धानंविनापिवोधादित्यपिवोध्यम् यावत्पदेति तेनव

हुव्रीहेर्न्न दशानित्यत्वम् कृत्स्वविधौ क्विप्पचीतिवार्त्तिकेनमिकम्पीतिसूत्रेच सुसाधमिति अनेनप्रकरणोप्यत्रसमासः प्रत्ययसन्नि
स०श्रा०र० योगेनैवयोगविभागस्यैष्टसिद्ध्यर्थत्वादितिबोध्यम् यद्यपिसच्चच्छन्दस्येवेतिपूर्वमुक्तन्तथापिलक्ष्यानुसारात्क्वचिदन्यत्रापिप्रवृत्तौ
नबाधकमितितात्पर्य्यम्॥ ॥इतिसमासशेषः॥ॐ॥ ॥तद्वाचकेति अक्षिसम्बन्धिपूर्ववाचकेत्यर्थः भाष्येत्विति अनेनविशेष्य
२०६ स्यालिङ्गत्वेऽस्यपुंस्त्वमसाध्विति समोदेवयजनमितिप्रयोगोऽसङ्गतइतिसूचितम् गतिश्चेतिसूत्रेइति उपसर्गाइतिसूत्रेपिएतौप्रयोगौ
बहिर्धीति क्रियायोगेउपसर्गत्वेच्छन्दसिधात्वर्थेयद्रूतःप्रणसमुखंप्रेयमित्यादौक्रियायोगाभावादुपसर्गत्वाभावेनदोषइत्याशङ्क्यो
पसर्गग्रहणस्योपलक्षणत्वन्त्समाहितम्तत्रभाष्येइतिबोध्यम् प्रतिसामनिति इत्यादिष्वित्यर्थः पद्माकारेति तत्वेचपद्माश्रय
त्वेनयथा[illegible]चिद्बोध्यम् यद्वेति पद्मंनाभौयस्येतिविग्रहइतिभावः प्रमादएवेति पद्मशब्दस्यनपुंसकत्वाभावेइतिमते इदमुक्तं
हिन्लिङ्गत्वेतुपुष्पवाचिप्रत्ययविशेषणत्वेनद्वितीयान्तमाघश्लोकेऽचम्बिनापिसाध्वेव सन्नते सर्व्वतोभ्यासम् वसुमान्यज्ञइति
एवञ्चवसुमच्छब्दादीयप्रतिवसीयइतिष्फत्पालभ्यते स्पष्टञ्चेदन्तैत्तरीयोपनिषद्शाङ्करभाष्ये तद्वार्त्तिकेच वसुमत्तरशब्दादीयसुनि
तिपक्षान्तरमपि तत्रपक्षद्वयेप्यस्मादेवनिपातनात्साधकत्वम् विषयमिति विषयभूतामित्यर्थः आशीर्विषयतायाइति[illegible] तेनाशी
र्लिङन्तसमभिव्याहारएवास्यसाधकत्वमितिभावः प्राग्बहुव्रीहेरिति बहुव्रीहिसञ्ज्ञेयइत्यतः प्राक्समासान्तरविधेरभावाद्बहुव्रीहे २०६
राकृत्यपक्षेणोरित्यस्यैवतत्रग्रहणमितिभावः॥ ॥इतिसाधारणसमासान्ताः॥ ॥ॐ॥ लोकान्मुक्तिरिति लोकशब्दाद्वृद्धिःप्रयो
जनं निषिधाश्चवल्लीयानितिन्यायेन तद्धि[illegible]निमित्तस्तुकोपिनिवृत्तिरितिबोध्यम् एकस्त्वयमपिसमासफलम्बोध्यम् समासशास्त्रे
पठिताएवेति उत्तरपदाक्षिप्तसमासःसाध्य[illegible]पदोक्तत्वात्तोकान्तिकेतिविहितस्यैवग्रहणेचोपस्थित[illegible]तत्त्पानमिवग्रहणान्नोतु

करणोचस्तोकेतिसूत्रेपठितानामितिभावः भाष्यवार्त्तिकविरोधइत्यस्य ॰ आख्यानग्रन्थविरोधइत्यर्थः तमुपपादयति विशेष
णेत्यादि तदारम्भेपिपादस्यपदेतिसूत्रेपि ॰पादोपहतमित्यादेशवारणायविशेष्यविशेषणभाववैपरीत्यस्यात्रसूत्रेभाष्यएव
आश्रयणेबाधकाभावइत्याहुः अम्यंतीति आज्ञायिनिंच आत्मनश्चपूरणेतिपसंख्यानमितिकर्त्तव्यमितिभाष्यवार्त्तिकमूलविवेके
नामिति आत्मनश्चेतिसूत्रे आज्ञायिनिचेत्यनुवृत्तिप्रदर्शनार्थभाष्येसूत्रद्वयग्रहणम् अतएव आत्मनश्चेतिसूत्रे चःसार्थ
कः व्याख्यानभाष्ये आत्मनश्चेत्युल्लेखस्तुवार्त्तिकस्याज्ञायिनिचेत्येतत्साधारणत्वभ्रमव्यावृत्तयेइतितेषांभावः भेदमपरिकल्प्ये
ति आत्मत्वेनवर्त्तिपदार्थजनादन्वनान्यपदार्थेतितिभावः अधिकरणव्यापारस्यधात्वर्थविवक्षयातस्यौक्वि क्षेतिबोध्यम् अस नत्वं
यापरत्वात्कर्मसंज्ञायातस्याबाधस्यात् अधिकरणसंज्ञाकर्मसंज्ञाम्बाधते गेहंप्रविशतीतियथेत्याकडारसूत्रेभाष्या
त् वस्कत ॰ कलस्यहृदयनिष्ठतयाप्रतीतावेवास्यप्रयोगस्यसाधुत्वमित्याह भाष्येत्विति हलदन्तादित्येवेति इत्यवीत्यर्थः तत्पुरुषे
हृतीत्य॰पिनाग्रहः नोक्तदोषेति अनित्यत्वान्नातुःसिद्धित्तदाश्रयणाच्चेलुकःप्राप्तिरितिभावः तद्भाष्यादाविति छयमानोपिभा
ष्यतथा॰ठोसाम्प्रदायिकोहरदत्तविरोधादितिभावः उक्तत्वाच्चेति एतत्सर्वंहरदत्तानुरोधेनोक्तमित्यन्यत्रविस्तरः मूर्द्धीति त्र
ज्ञानरहिताइत्यर्थः तेहिपशुवद्देवनियम्यास्तदाह देवपशुत्वादिति पाक्षिकमपीति नित्यस्यप्राप्तिरेवनव्यवधानात्॥ ॐ॥
॥ ॥इत्यलुक्समासः॥ ॥पराल्लाइति निषेधसत्वेन पुम्वत्वाप्राप्तेरेवाभावादितिभावः पद्वितरेत्यादेशोत्तरपरत्वादितिवक्तु
मुचितम् नित्यस्त्रीलिङ्गइति वृक्षजातिःस्त्रियामितिलिङ्गानुशासनसूत्रादितिभावः आम्रइत्यादिदर्शनात्तत्कार्त्तिकमित्यन्य
त्र शौनकाश्वालत्रिष्फलात्वामलकीत्रिषित्यमरात् त्रिष्फलाख्यामलकाविशेषस्यत्रिलिङ्गत्वमपितुशब्दादन्यात्री

ल०श०२०

१०७

स्त्रीत्विकृतिलभते नायन्तुशब्दस्वारत्नपर्य्यायत्वन्तिष्यफलायाव्यावर्त्तयितुंस्त्रीलिङ्गनिर्देशेनैवतत्त्वात्तच्चेरित्याहुः तदपिनेति प्रक
र्षयोगात्प्रागित्यस्योक्तिसम्भवोनेत्यर्थः इतिदिगिति दिगर्थस्तु यद्यपिविदुषीतरेतिरूपासङ्कृतिंशङ्कते पुम्वद्भावोऽत्रेति पक्षे
ह्रस्वाभावपक्षेइत्यर्थः तत्पक्षेपुम्वद्भावस्योदाहर्तुमुचितोनतुदीर्घइतिभावः समाधत्ते प्रकर्षयोगादिति एवन्तथापूर्वङ्क
र्म्मविदक्षयैवविद्वत्तरेत्यादेःसिद्धौह्रस्वविकल्पविधानसामर्थ्यात्पक्षेदीर्घश्रवणात्कृतपूर्व्वीकटमित्यादौयथापूर्वङ्कर्म्मावि
वक्षापर[illegible]त्तत्सम्बन्धेएवम्प्रकृतेपिपूर्व्वसामान्येननपुंसकविवक्षांकृत्वाततएवतरपिपश्चात्तदर्थविशिष्टेस्त्रीत्वविवक्षास्वार्थे
त्यादेरपिपरवल्लिङ्गम्पूर्व्वम्विवक्षितन्तत्कार्य्यमन्तरङ्गमितिसैषएवार्थइतिवृत्तिग्रन्थयोजनाकर्त्तुंशक्या तथापिप्रकृतविषये
स्वार्थस्यप्र[illegible]कृत्वादीदृशोऽर्थः प्रकृतेनसाधुत्वनियामकइति शास्त्रीयस्येति लोमादिषुपादशब्दपदभावादितिभावः
सङ्ख्येकवचनादिति शसम्योगविभागादितिसुप्सुपेत्युचितम् आक्षिप्यतइति तत्रपूर्वंदंष्यङीतिशेष्यन्तेनष्यङन्तग्रहणाष्य
ङ्मात्रस्यपूर्व्वम्पदत्वा[illegible]भावादितिबोध्यम् समप्रकरणांशपथाकरणाम् सत्सङ्कारःशपथकर्त्ताच वैधइति विषप्रतिपक्ष
इत्यकरणाश्रेत्यपिबोध्यम् अव्ययमिति तिङन्तानुकरणमित्यन्ये हरदत्तइति कैयटश्च पठ्यतएव तेनतदर्थोपीतिभावः श्रीराम
कइति अचिव[illegible]बेतिलत्वम् इत्यादिश्लोकस्यापीति भवेद्वर्णागमाद्धंसः सिंहोवर्णविपर्य्ययादित्यादिश्लोकस्येत्यर्थः अन् १०७
कधेतिजराद्दावेवमत्ययोऽन्यस्यत्येकोप्ये[illegible]रोन्तोह्रस्वस्तदाप्रत्ययातिरिक्तकार्य्यमेवोणादित्येवमित्यर्थः तुमुन्कामेत्वत्तुमितिसपि
प्युपलक्षणन्तेनसकामस्समानाइतिसिद्धम् निपातादिति पृषोदरादिषुविशिष्टपाठादित्यर्थः समासएवेदन्तेभावश्यकृत्ते
व्यमित्यादिसिद्धिर्मांसस्येत्याशयः [illegible]हानितिसूत्रस्थेनमांसहृतनेसांद्विताहिकेनापिरूपपाठोत्र[illegible]धानात्तंततस्त्वितिसाधु

निर्वाह इति तेन कार्य्यविशेषणात्वन्नाधिशे[illegible]पदत्वञ्चेति भावः तन्मन्त्रघटके ऽन्तादृधाविति पदे तत्कमित्यर्थः त[illegible]तेतीति अस
ङ्गात्वाद्धलत्यन्तादित्यस्याप्राप्तेरित्यर्थः [illegible]मस्यार्थस्येति अयेशब्दार्थस्य प्राधान्येपीति भावः कथमिति दौवारिके[illegible]तीहारपदप्र
योगः कथं साधु[illegible]रित्यर्थः तत्पुरुषस्यापीति एकदेशविकृतन्यायेन वहु[illegible]व्रीहेरप्यर्थः शौवादन्ये मरीरिति स्वादे[illegible]नीति सूत्रेण
ष्यप्रयोगादिति बोध्यम् वक्तव्यमिति तत्पदघटितन्वार्त्तिकमित्यर्थः चत्वार्य्यङ्गान्यस्येति नचोत्तरपदत्वे चेति निषेधात्कथमं
गराशब्दस्य पदत्वम् [illegible]भ्यासस्योत्तरपदस्य कार्य्यित्वे एव तत्प्रवृत्तेरित्यन्यत्र प्रविस्तरः पञ्चमीति योगविभागादिति सुप्सुपेती
त्यन्ये॥:०:॥ ॥इति समासाश्रयविधयस्समाप्ताः॥ ॥:०:॥ समर्थानाम् अलुग्विधानाद्वितीति नहि स्वार्थेपरिपूर्ण
स्येत्वपद[illegible]सम्बन्धइति बोध्यते इति सुबन्तादुत्पत्तिः कुत्सित इति सूत्र[illegible] भाष्योक्तरीत्या सिद्धेति भावः किञ्च तत्सम्बन्धप
त्यमित्यर्थे प्राप्नुय इत्यादिरीत्या तस्यापत्यादिवाक्यार्थ इति सम्बन्ध्यादिबोधनार्थं विभक्त्युत्पत्तिरावश्यकीति दिक् उचितमि
ति भ्रयस्य स्पस्य वैकल्पिकत्वेपि भावानुष्ठाने धर्माधिक्यादुचितमित्यर्थः अतएवं दैम्यादित्ययुक्तमिति नोक्तम् तान्ताच्छे अ
व्ययानाम् [illegible]भमात्रे इति टिलोपवारणार्थन्तस्यानित्यत्वाश्रयणेदोषः स्यादित्यप्यस्योचितत्वं बोध्यम् परिगणनाच्चेति इयमप्यु
पयुक्तिः भाष्ये तस्य त्याख्यानात् एवमुक्तमिति ष्यत्रिनपुंसकत्वापत्तिः स्वरे भेदश्चेति हरदत्ताशय इति तदनुरोध इति भावः
परिषदश्चेत्यत्रेति तच्चपात्राद्ग्रह्येइत्युक्तेरयमप्यर्थविशेषलक्षण इति वाच्यम् इदमिति सामान्यशब्देन तद्विशेषसङ्ग्रहात्
विशेषलक्षणप्रत्ययत्वविशेषशब्दोपादाने न बोधितार्थकप्रत्ययत्वमिति भावादि[illegible]शब्दादिति क्तिजन्ताभ्यामिति शेषः न
पदान्तेति पूर्व[illegible]त्वासिद्धे नेति निषेधोप्यत्र बोध्यः निर्वाह इति ष्यत्रः पित्वेप्यजादिपाठादिति भावः स्त्रीत्वन्तु लिङ्गमशिष्यं लोका

ल० श० १० ष्यत्वादिति बोध्यम् वस्तुतस्तु एषोपि प्रागुपपादितः हरदत्तादिरीत्या प्रमाद एवेति बोध्यम् याम्याः शंसन्तीति वैदिकप्रयोगनिर्वाह
गुणान्तरत्वादित्यन्ये आह्नुरिति युक्तश्चैतत् भाष्ये सर्वत्र गोरजादिप्रसङ्गे यदित्युक्तेः अपवाद इति बाधक इत्यर्थः तस्यापवादेः जादी
१०८ नां तत्पादयोऽर्थविशेषलक्षणादिति पूर्वविप्रतिषेधेन बाधक इति भावः धेनुरनञ्जित्यत्र वा नञ इत्युक्ते नञ्पूर्वे न ढगिति बोध्यम्
धेनोः कादेशसत्त्वे नेकनित्यमनुचितमेव आह ठकमित्यर्थः इति कैयट इति तदधीन इति प्रकरणे इति शेषः सूत्रद्वयमिति वि
द्यालक्षणात् सूत्रान्तादिति वार्त्तिकसूत्रिक इति भाष्योदाहरणात् सूत्रान्तकोपधादिति सूत्रे सङ्ख्याप्रकृतेः सूत्रवाचकादिति वाच्य
म् यथाहि क इति नेह माहावार्त्तिक इति भाष्याच्च तत्तत्प्रकरणस्य भाष्यप्रामाण्याच्च स्वरितो वानुदात्त इति सूत्रभाष्यप्रामाण्या
त्वार्त्तिके [illegible] ङीकारादिति भावः ॥ ॥ इत्यपत्यादिविकारान्तार्थसाधारणाः प्रत्ययाः ॥ ॥ ॥ सामान्यापेक्षमिति स्त्रीपुंसाभ्या
मिति योगापेक्षमित्यर्थः हेतुत्वमिति न तु स्यान्न सम्बन्धतः प्रत्ययादर्शनस्यैव लुक्त्वात् नाप्यानन्तर्यसम्बन्धः पञ्चकपालस्य पुरोडाश
स्येदं स्याच्च कपालमित्यादावतिप्रसङ्गादिति भावः [illegible] स्यात् ऐन्द्र्या यवाग्वान
ऽङ्गीयादिति [illegible] ताविति भावः ननु चीत्यपकर्षे हिरण्य इत्यत्र तस्येदमित्यधिकारविहितयतो लुक्कृतस्यान्नचेष्टापत्तिः येन विधिस्तद
न्तस्येति सूत्रस्थ [illegible] र्ण्यविरोधादत आह वाग्रहणमिति समर्थानामिति सूत्रस्थमित्यर्थः तेन कस्यचिदन्नादेरपि लुग्भवति ह्रिरितिभा
अग्रे तु न सम्बन्धः फकफिञोरिति सूत्रेऽन्यतरस्याङ्ग्रहणात् वस्तुतोऽचीति नापकृष्यते अनभिधानान्नातिप्रसङ्ग इति तत्त्वम् तथे
वेति अत्र गोत्रप्रत्ययस्यापत्यलुकोऽसम्भवेऽपीजम् स चोपपादयिष्यते गोत्रे इत्यस्य फलमाह कुवलस्येति अत्र फले लुकः सचणो
त्र प्रत्यय इति स्पष्टम् तस्यैवालुग्यथा [illegible] इति गोत्रे इतीत्युक्तिस्तत्त्वे [illegible] र्यलाभ इति एतन्मात्रे गोत्रे इति बोध्यम् तद्वितस्येत्यतोऽत्र

अश्वत्थन्तरं सामे [illegible] दिरि
तियदिरथ [illegible] सामा
सोमः ६

१श०र० वह्वचित्यनुवृत्तेस्तदप्येतत्प्रकरस्यमितिवाधकम् अतएवजनपदशब्दात् क्षत्रियादञितिसूत्रेतद्राजलुकोप्ययमलुगुक्तः यत्तुगोत्रद्वि
याइतिसूत्रेणास्यणित्वङ्किमर्थम् वतण्ड कौत्रापत्यंस्त्रीवतण्डीवतण्डाच्चेतिविहितयञोलुक्स्त्रियामितिलुकिशार्ङ्गरवादित्वात्
ङीन् तस्यात्रपत्यंवातण्डोजात्यन्तत्वादौवड्यर्थम् तच्चगोत्रेलुमचीतिलुक्प्रतिषेधः ईकारेणाप्यवधानादितिसूक्तात् तत्रकिङ्कारणाम
२७९ भस्याढइतिपुम्वद्भावःसुत्कम् तत्वेकदेशयुक्तिः पुम्वत्वेनङीनश्चलुकोपिनिवृत्तेरितितन्नात्रवाधकम् यदा तत्रेत्यपत्यंयोजन
म्युम्वद्भावेनङीलुकोनिवृत्तिसिद्धेरित्यर्थइतिनतद्विरोधः यदपिवान्यातिमिन्नितिसूत्रेगोत्रयुवसञ्ज्ञयोःसमावेशेपीलायाअपत्यं
पैलः पीलायावेत्यण् तस्यापत्यम्युवाणीञ्चइतिफिञः पैलादिभ्यश्चेतिलुक् पैलस्यछात्राःपैलीयाः अत्रापिगोत्रेलुगितिफिञो
लुकासङ्गः असमासेत्वस्याप्राप्तौअनन्तरङ्कृत्वापैलादिलुगितिउक्तम् तस्यायम्भावः समावेशेद्वितीयाध्यायस्थेसूत्रेस्यमध्येऽप लुक्त्रा०
वादन्यायेनायमलुकस्यात् असमविशेषेतुयुवप्रत्ययेऽस्याप्रवृत्तेस्तेनन्यायेनभङ्क्तिप्राप्तस्येत्यर्थल्लाभइतिनतद्विरोधोलेशतोप्यस्या
कमितिदिक् इहेति द्विगोर्लुगनपत्यइत्युत्तरं अचिसूनिफक् फिञोरन्यतरस्याङ्गोत्रेनेतिकार्य्यमित्यर्थः एतेनैवन्यासेद्विरयइत्यसि
द्धिरित्यपास्तम् ननुद्वयोस्सावकाशयोरेकत्रवृत्तेम्पइत्यत्रदीर्घत्वयोरिवैकस्यद्विकार्य्ययोगमूलकेनासम्भवेनकेवलेनासम्भवेन
ती वाविप्रतिषेधईकोगुणवृद्धीत्यादिषुभाष्येस्पष्टम् एवञ्चप्रकृतेनतस्यविषयोऽतआह अत्रचज्ञापकमिति एवञ्चज्ञापकादेव
वाध्यवाधकभावइतिभावः आदिवृद्धिप्राप्तिविषयेतद्बाधोज्ञाप्यते अतएवआपदिभवम् वै १८९